બીજી તાડપત્રીય પ્રતિઓમાં લેખનસંવત્નો કોઈ સ્પષ્ટ ઉલ્લેખ નથી. એટલે એ પ્રતિઓ આ.ભ.શ્રી હેમચંદ્રસૂરિજી મહારાજની સમકાલીન છે કે ઉત્તરકાલીન એ અમે સ્પષ્ટ કહી શકતા નથી. છતાં પાટણમાં શ્રી હેમચંદ્રાચાર્ય જૈનજ્ઞાનમંદિરમાં રહેલા શ્રી સંઘવીપાડાના ભંડારની પ્રતિઓમાં પેટી નં. ૭૯(૨)માં એક તાડપત્ર ઉપર લખેલી પ્રતિ છે કે જેની અમે પા૩ સંજ્ઞા રાખેલી છે તેમાં ઋદુદિતઃ [૧।૪।૭૦] સૂત્ર પાછળથી ઉમેર્યું છે એમ સ્પષ્ટ જણાઈ આવે છે. તેમાં ડિત્યન્ત્યસ્વરાદેઃ [૨।૧।૧૧૪] સૂત્ર પછી રહસ્યવૃત્તિમાં છે તેમ અઘુટ્ચુપાન્ત્યનો.... સૂત્ર લગભગ દોઢ લીટીમાં લખેલું વૃત્તિસહિત હતું પણ તે ભૂંસી નાખવામાં આવ્યું છે. મૂળ જગ્યા ખાલી પડેલી છે. તે સ્થાને રહસ્યવૃત્તિની જેમ આછા આછા કોઈક કોઈક અક્ષરો વાંચી પણ શકાય છે. અવર્ણાદશ્નો વાંતુરીડચોઃ [૨।૧।૧૧૬] તથા ન શ્યશવઃ [૨।૧।૧૧૬] આ સૂત્રો તથા તેની વૃત્તિ રહસ્યવૃત્તિની જેમ સ્પષ્ટ જ વંચાય છે. છતાં કોઈક લેખકે તેમાં સુધારો-વધારો કરીને વર્તમાનમાં જેવાં આ સૂત્રો અને તેની વૃત્તિ છે તેવાં બનાવવા પ્રયત્ન કર્યો છે એમ બીલકુલ સ્પષ્ટ રીતે દેખાઈ આવે છે. આ ઉપરાંત બીજી તાડપત્ર ઉપર લખેલી લઘુવૃત્તિની અનેક પ્રાચીન પ્રતિઓમાં પણ શંતૃ વગેરે અનુસ્વારસહિત (ઉપાન્ત્યમાં ન્ સહિત) પ્રત્યયોવાળાં સૂત્રો તથા વૃત્તિના પાઠો છે. કોઈક સ્થળે અનુસ્વાર ભૂંસી નાખવામાં આવ્યો છે એમ જોઈ શકાય છે, કોઈક સ્થળે અનુસ્વાર ભૂંસવાનો રહી પણ ગયો છે, તો કોઈ સ્થળે અનુસ્વારરહિત જ પાઠો પણ છે. પરંતુ લઘુવૃત્તિની અર્વાચીન તાડપત્રીય પ્રતિઓમાં કે કાગળ ઉપર લખેલી પ્રતિઓમાં અનુસ્વાર જોવામાં આવતા નથી.

સિદ્ધહેમબૃહદ્વૃત્તિની તાડપત્રીય પ્રતિઓમાં પણ કોઈક કોઈક પ્રતિમાં અનેક સ્થળે અનુસ્વારસહિત પ્રત્યયો છે. કોઈક સ્થળે અનુસ્વાર ભૂંસવાનો પ્રયત્ન પણ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

કરવામાં આવ્યો છે, પણ એ અનુસ્વાર દેખાઈ આવે છે.

સિદ્ધહેમચંદ્રશબ્દાનુશાસનની મૂળમાત્રની અર્વાચીન જણાતી તાડપત્રીય પ્રતિઓમાં પ્રાયઃ અનુસ્વાર નથી, છતાં કોઈક સ્થળે ક્તવંતુમાં અનુસ્વાર સ્પષ્ટ પણે દેખાય છે.

આ બધું જોતાં અને વિચારતાં અમને સ્પષ્ટ રીતે લાગે છે કે પહેલાં ઋદુદિતઃ [૧।૪।૭૦] સૂત્ર આ.ભ.ની હેમચંદ્રસૂરિજી મહારાજે રચ્યું જ નહોતું. શંતૃ, અંતૃ, ક્વંસુ, ક્તવંતુ, મંતુ, ઈયંસુ આદિ પાઠોવાળી ઉપાન્ત્યમાં ન્ સહિત જ પ્રક્રિયા હતી. પણ પાછળથી કોઈક કાળે એ પ્રક્રિયામાં ફેરફાર કરવામાં આવ્યો એટલે ઋદુદિતઃ [૧।૪।૭૦] સૂત્ર ઉમેરવું પડ્યું અને ડિત્યન્ત્યસ્વરાદેઃ [૨।૧।૧૧૪] સૂત્ર પછી अघुटच्युपान्त्यनोऽक्रुञ्चञ्चुदितः સૂત્ર કાઢી નાખવામાં આવ્યું. એટલે અનેક સ્થળોએ સૂત્રમાં તથા વૃત્તિના શબ્દોમાં ફેરફાર કરવામાં આવ્યો. આ ફેરફાર આ.ભ.શ્રી હેમચંદ્રસૂરિજી મહારાજે પોતે જ કર્યો છે એમ જણાય છે. કારણ કે તેમણે જ રચેલા સ્વોપજ્ઞવૃત્તિસહિત પ્રાકૃતવ્યાકરણની વિક્રમ સંવત્ ૧૨૨૪ માં લખેલી ખંભાતની તાડપત્રીય પ્રતિમાં ૮।૨।૧૫૯ સૂત્રમાં **आल्विल्लोलालवंतमंतेत्तेरमणा मतोः** । आलु इत्यादय आदेशा मतोः स्थाने यथाप्रयोगं भवन्ति આ રીતે મતુ જ લખેલો જોવામાં આવે છે, મંતુ દેખાંતો નથી. વિક્રમસંવત્ ૧૨૯૨માં તાડપત્ર ઉપર લખેલી ખંભાતના શાંતિનાથતાડપત્રીયભંડારની ૨૩૯ ક્રમાંકવાળી સિદ્ધહેમચંદ્રશબ્દાનુશાસનના મૂળ સૂત્ર પાઠની ૮૩ પત્રની પ્રતિમાં તથા બીજી પણ અર્વાચીન તાડપત્રીય પ્રતિઓમાં તથા કાગળ ઉપર લખેલી પ્રતિઓમાં ઋદુદિતઃ સૂત્ર છે જ. अघुटच्युपान्त्यनो.... સૂત્ર નથી. અને પ્રત્યયો પણ शतृ વગેરે જ છે એ હકીકત છે. એટલે અમે લગભગ આઠસો વર્ષોથી અને વર્તમાનમાં પણ પ્રચલિત સૂત્રપાઠ તથા વૃત્તિપાઠ પ્રમાણે જ પાઠો લઘુવૃત્તિસહિત શ્રીસિદ્ધહેમચંદ્રાનુશાસનના મુદ્રણમાં આપ્યા છે, અને ન્ વાળા પાઠો પ્રાચીન તાડપત્ર પ્રતિઓમાં મળવા છતાં એનો પાઠાંતર રૂપે પણ નિર્દેશ કર્યો નથી. પરંતુ હમણાં સંશોધિત થઈને પ્રકાશિત થતી રહસ્યવૃત્તિમાં તો અમે शन्तृ अन्तृ વાળા જ પાઠોને સૂત્રો તથા વૃત્તિમાં આપ્યા છે એટલું સ્પષ્ટતા માટે વાચકોને-અભ્યાસીઓને જણાવીએ છીએ. કારણ કે આ.ભ.શ્રી હેમચંદ્રસૂરિજી મહારાજની પ્રક્રિયામાં એ મૌલિક પાઠો હતા. અત્યારે આ પ્રક્રિયા જો કે લુપ્ત થઈ ગઈ છે, છતાં મૌલિક પ્રક્રિયા તો એ જ હતી. અષ્ટાધ્યાયીક્રમથી ભણવા ઇચ્છતા અને આવશ્યક સંસ્કૃત સૂત્રોનું જ જ્ઞાન મેળવવા ઇચ્છતા વિદ્યાર્થીઓ માટે *આ.ભ.શ્રી હેમચંદ્રસૂરિજી મહારાજે રચેલી રહસ્યવૃત્તિ બહુ જ*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ઉપયોગી છે.

ઉપર જણાવેલી તાડપત્રીય પ્રતિઓના આધારે સિદ્ધહેમચંદ્રશબ્દાનુશાસન તથા લઘુવૃત્તિમાં નીચે જણાવેલા પાઠો લગભગ ૩૦ સૂત્રોમાં હતા. (તેના આધારે તે તે સૂત્રની વૃત્તિમાં પણ પાઠભેદો વાચકોએ સ્વયં જ સમજી લેવા.)–

न स्तं मन्त्वर्थे [१।१।२३], डत्यन्तु संख्यावत् [१।१।३९], अभ्वादेरन्त्वसः सौ [१।४।९०], ध्रंस्-ध्वंस्-क्वंस्वनडुहो दः [२।१।६८], मावर्णोपान्तपञ्चमवर्गान् मन्तोर्मो वः [२।१।९४], क्वंसुष् मन्तौ च [२।१।१०५], अघुट्यूपान्त्यनोऽक्रुञ्चञ्चुदितः [२।१।११५], अवर्णादश्नो वान्तुरीङ्योः [२।१।११६], न श्य-शवः [२।१।११७], तृन्नुदन्ताव्यय-क्वंस्वाना-ऽन्तृश्-शन्तृ-ङि-णकच्-खलर्थस्य [२।२।९०], अनजिरादिबहुस्वर-शरादीनां मन्तौ [३।२।७८], नवाद्यानि शन्तृ-क्वंसू च परस्मैपदम् [३।३।१९], घसेकस्वरातः क्वंसोः [४।४।८२], जृषोऽन्तृः [५।१।१७३], क्त-क्तवन्तू [५।१।१७४], तत्र क्वंसु-कानौ तद्वत् [५।२।२], शन्त्रानशावेष्यति तु सस्यौ [५।२।२०], वा वेत्तेः क्वंसुः [५।२।२२], धारीङोऽकृच्छ्रेऽन्तृश् [५।२।२५], वाऽन्तोरिकः [६।४।१३२], इदंकिमोऽन्तुरिय् किय् चास्य [७।१।१४८], अन्तोरिथट् [७।१।१६१], तदस्यास्त्यस्मिन्निति मन्तुः [७।२।१], भवन्त्वायुष्मद्दीर्घार्दैवानांप्रियैकार्थात् [७।२।९१], प्रायोऽन्तोर्द्वयसट्-मात्रट् [७।२।१५५], गुणाङ्गाद्वेष्ठेयंसू [७।३।९], कुमारीक्रीडनेयंसोः [७।३।१६], वयसि दन्तस्य दन्तृः [७।३।१५१], ईयंसोः [७।३।१७७], विन्मन्तोर्णष्ठियंसौ लुप् [७।४।३२]

આ તો સૂત્રોમાં રહેલા પાઠભેદનો જ અહીં નિર્દેશ કર્યો છે. તે તે સૂત્રોની વૃત્તિમાં તથા કોઈ કોઈ અન્યસૂત્રોની વૃત્તિમાં પણ જ્યાં જ્યાં આ પ્રત્યયોનો તથા શબ્દોનો ઉલ્લેખ છે ત્યાં ત્યાં સર્વત્ર આને અનુસારે જ પાઠભેદ સમજી લેવો, જેમકે न स्तं मन्त्वर्थे [१।१।२३] સૂત્રની રહસ્યવૃત્તિમાં પણ सान्तं च तान्तं च मन्त्वर्थे परे पदं न स्यात् । यशस्वी । तडित्वान् । આમ પાઠભેદ સમજવો. ૧।૪।૭ સૂત્રમાં सर्वादिगणમાં પણ भवतु ને બદલે भवन्तु પાઠ સમજવો. गोश्चान्ते ... [२।४।९६] ની રહસ્યવૃત્તિમાં પણ ईयस्वन्त ને બદલે ईयन्स्वन्त શબ્દ સમજવો. ઈત્યાદિ ઈત્યાદિ. આ પાઠભેદો અમારી મતિકલ્પનાથી આપ્યા નથી, પણ પ્રાચીન તાડપત્રીય પ્રતિઓના આધારે આપેલા છે.

વિશેષ શોધ કરતાં અમારા જોવામાં આવ્યું છે કે शन्तृ, अन्तृ, क्तवन्तु આદિ न् ઉપાન્ત્યવાળી પ્રક્રિયા પણ **કાતન્ત્ર**વ્યાકરણમાં છે જ. **કાતન્ત્ર**વ્યાકરણની રચના લગભગ વિક્રમ સંવત્ની પ્રથમ શતાબ્દીમાં શ્રી **શર્વવર્મદેવે** કરેલી છે, એમ સંશોધક વિદ્વાનો માને છે. એટલે આ વિષયમાં આ.ભ.શ્રી **હેમચંદ્રસૂરીશ્વરજી** મહારાજ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

પ્રાચીન વૈયાકરણોની પરંપરાને જ ખરેખર અનુસર્યા છે.

તથા, સામાન્ય રીતે સંસ્કૃતવ્યાકરણમાં ધાતુના વર્તમાનકાળ આદિ અર્થને સૂચવતા દશપ્રકારના પ્રત્યયો આવતા હોય છે. અહીં શ્રી સિદ્ધહેમચંદ્રશબ્દાનુશાસનમાં તેને માટે વર્તમાના, સપ્તમી, પઞ્ચમી, હ્યસ્તની, અદ્યતની, પરોક્ષા, આશીઃ, શ્વસ્તની, ભવિષ્યન્તી, ક્રિયાતિપત્તિઃ એવાં નામો રાખેલાં છે. આમાં બીજાં બધાં નામો તો સાર્થક છે, પણ પઞ્ચમી અને સપ્તમી આ નામો કેમ આપેલાં છે એ એક સામાન્ય અભ્યાસીને ન સમજાય તેવી વાત છે. પરંતુ આની પાછળ પણ એક ઈતિહાસ છે. અત્યારે ઉપલબ્ધ સંસ્કૃત વ્યાકરણોમાં પાણિનિનું વ્યાકરણ સૌથી પ્રાચીન ગણાય છે. તેમાં વર્તમાનકાળ, પરોક્ષકાળ, શ્વસ્તનકાળ વગેરે સૂચવવા માટે પાણિનિએ પ્રત્યયોની લટ્ (વર્તમાન કાળ), લિટ્ (પરોક્ષ), લુટ્ (શ્વસ્તન), લૃટ્ (ભવિષ્ય), લેટ્ (વૈદિકશબ્દો માટે), લોટ્ (વિધ્યાદિ=પંચમી), લઙ્ (હ્યસ્તન), લિઙ્ (વિધ્યાદિ=સપ્તમી), લુઙ્ (અદ્યતન), લૃઙ્ (ક્રિયાતિપત્તિ) આવી જુદીજ સંજ્ઞાઓ રાખેલી છે કે જે દશ લકારના નામથી પ્રસિદ્ધ છે. આમાં લેટ્ તો વૈદિક સંસ્કૃત શબ્દોમાં જ વપરાય છે, અને તે પણ લિઙ્ના અર્થમાંજ વપરાય છે. વળી લૌકિક સંસ્કૃત શબ્દો માટે પણ, આશિષ અર્થમાં લિઙ્ ના પ્રત્યયો જ અમુક સંસ્કાર કરીને પાણિનીયવ્યાકરણમાં વાપરવામાં આવે છે. એટલે લૌકિક સંસ્કૃત શબ્દો માટે પાણિનીયવ્યાકરણમાં લેટ્ સિવાય નવ જ લકારો છે. તેમાં લોટ્ નો નંબર પાંચમો છે, અને લિઙ્ નો નંબર સાતમો છે. એટલે કાતન્ત્રવ્યાકરણ આદિના રચયિતા બીજા વૈયાકરણોએ લોટ્ ના પ્રત્યયો માટે પઞ્ચમી અને લિઙ્ ના પ્રત્યયો માટે સપ્તમી એવી સંજ્ઞા પાણિનીયવ્યાકરણના ક્રમ પ્રમાણે રાખી છે. એ જ પરંપરાને અનુસરીને આ.ભ.શ્રી હેમચંદ્રસૂરિજી મહારાજે પણ અહીં શ્રી સિદ્ધહેમચન્દ્રશબ્દાનુશાસન માં પઞ્ચમી અને સપ્તમી એવી સંજ્ઞા સ્વીકારેલી છે.

પાણિનીયવ્યાકરણમાં ધાતુના દશ ગણો સ્વીકારેલા છે. પરંતુ કાતંત્રવ્યાકરણમાં પાણિનિના ત્રીજા જુહોત્યાદિ ગણનો બીજા અદાદિ ગણમાં જ પેટાગણ તરીકે સમાવેશ કરેલો હોવાથી નવ ગણ થાય છે. આ.ભ.શ્રી. હેમચંદ્રસૂરિજી મહારાજે પણ એ પરંપરાને અનુસરીને અહીં હૈમવ્યાકરણમાં નવ જ ગણ આપેલા છે.

ગ્રંથમાં જે પાઠ કંઈક સુધારવા જેવો લાગ્યો છે ત્યાં તે સુધારેલો પાઠ ( ) આવા કોષ્ઠકમાં આપેલો છે. અમને કોઈક સ્થળે સરળતા માટે કે સ્પષ્ટતા માટે કોઈક પાઠ ઉમેરવા જેવો લાગ્યો છે તે [ ] આવા કોષ્ઠકમાં આપ્યો છે.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

અમે ખૂબ જ ખૂબ કાળજી રાખીને પ્રુફવાંચન કર્યું છે. છતાં પણ તે તે પાઠને સુધારવા જતાં કોમ્પ્યુટરનાં ટાઈપોમાં આગળ-પાછળ હાથ અડી જાય આદિ કારણે કોમ્પ્યુટરમાં નવા અશુદ્ધ પાઠો આવી જાય છે, એટલે તેથી તથા દૃષ્ટિચૂક કે પ્રમાદથી પણ કોઈ પણ પાઠ અશુદ્ધ રહી ગયો હોય તો વાચકો એનું પ્રમાર્જન કરીને શુદ્ધ પાઠ અમને જરૂર જણાવે. અમે આભાર માનીશું અને ભવિષ્યમાં સુધારવા પ્રયત્ન કરીશું.

ધન્યવાદ

તાડપત્ર તથા કાગળ ઉપર લખેલી **જે**સલમેર, **ખં**ભાત તથા **પા**ટણની પ્રતિઓની માઈક્રોફિલ્મ, અથવા ઝેરોક્ષ કોપી તે તે ભંડારના કાર્યવાહકોએ અમને લેવા દીધી છે તે માટે તેમનો ઘણો જ આભાર માનવામાં આવે છે. તેમના સૌજન્યથી જ આ કાર્ય શક્ય બન્યું છે. **જે**સલમેરની તાડપત્રીય પ્રતિઓની માઈક્રોફિલ્મ લેવામાં, સેવામંદિર, રાવટી, **જો**ધપુરના સંચાલક મહાત્યાગી **જો**હરીમલજી પારેખે તથા **ખં**ભાતની તાડપત્રીય પ્રતિઓની માઈક્રોફિલ્મ લેવામાં **આ**દરિયાણાના **જિ**તેન્દ્રભાઈ મણીલાલ સંઘવીએ ઘણો ઘણો પરિશ્રમ લીધો છે.

મારા વિનીત શિષ્ય મુનિશ્રી **ધ**ર્મચંદ્રવિજયજી તથા તેમના શિષ્ય મુનિશ્રી **પું**ડરીકરત્નવિજયજીએ આ કાર્યમાં વિવિધ રીતે ઘણી સહાય કરી છે.

મારાં સંસારી માતાશ્રી સાધ્વીજીશ્રી **મ**નોહરશ્રીજી મહારાજનાં શિષ્યા સાધ્વીજીશ્રી **સૂ**ર્યપ્રભાશ્રીજીનાં શિષ્યા સાધ્વીજીશ્રી **જિ**નેન્દ્રપ્રભાશ્રીજી કે જેઓ મારા વિનીત શિષ્ય મુનિશ્રી ધર્મચંદ્રવિજયજીના શિષ્ય મુનિશ્રી ધર્મઘોષવિજયજીના સંસારી સુપુત્રી છે તેઓએ પાઠભેદો જોવાનું અને નોંધવાનું તેમ જ અનેક અનેક પ્રૂફો વાંચવાનું અત્યંત જટિલ કાર્ય ઘણા અલ્પ સમયમાં ઘણો ઘણો પરિશ્રમ લઈને પૂર્ણ સિદ્ધ કર્યું છે. તેમના પરિવારે પણ આમાં ઘણો સહકાર આપ્યો છે.

મારાં અનંત ઉપકારી વયોવૃદ્ધ સંસારી માતુશ્રી પૂજ્ય સાધ્વીજીશ્રી **મનોહરશ્રીજી** મહારાજ કે જેઓ સ્વ. પૂ. સાધ્વીજીશ્રી **લાભશ્રીજી** મહારાજ (સરકારી ઉપાશ્રયવાળા)નાં શિષ્યા તથા બહેન છે તેમના સતત આશીર્વાદ એ મારૂં અંતરંગ બળ છે.

મારા વયોવૃદ્ધ અત્યંત વિનીત પ્રથમ શિષ્ય દેવતુલ્ય સ્વ. મુનિરાજશ્રી દેવભદ્રવિજયજી કે જેમનો **લોલાડા (શંખેશ્વરજી** તીર્થ પાસે) ગામમાં વિક્રમ સંવત્ ૨૦૪૦માં કાર્તિક સુદિ બીજે, રવિવારે (તા. ૬-૧૧-૮૩) સાંજે છ વાગે સ્વર્ગવાસ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

થયો હતો તેમનું પણ આ પ્રસંગે ખૂબજ સદ્‌ભાવથી સ્મરણ કરૂં છું.

પાટણના શ્રીહેમચંદ્રાચાર્ય જૈન જ્ઞાનમંદિરના વ્યવસ્થાપક **વ્રજલાલ** (વરધીલાલ) **ત્રિકમલાલ** શાહ (વી.ટી.શાહ)ના સુપુત્ર **મયૂરભાઈએ** આ ગ્રંથને કોમ્પ્યુટરથી વ્યવસ્થિત તૈયાર કરવા માટે ઘણો પરિશ્રમ લીધો છે.

મૂળ **પાલનપુરના** વતની હાલ **મુંબઈ** નિવાસી સ્વ. શેઠ **કીર્તિલાલ મણિલાલ મહેતાના** સુપુત્રો **વિજયભાઈ, પ્રબોધભાઈ, કિશોરભાઈ** તથા **રશ્મિભાઈ** આદિ પરિવારે આ ગ્રંથના પ્રકાશનના સંપૂર્ણ ખર્ચનો લાભ લીધો છે.

આ ગ્રંથના મુદ્રણ આદિમાં **નવનીત પબ્લિકેશન્સ** વાળા શ્રી **નવીનભાઈ** એન.શાહ તથા **સંજયભાઈ** નટવરલાલ વોરા (મહુડીવાળા) એ તથા **માંડલના** વતની શ્રી **અશોકભાઈ** ભાઈચંદભાઈ સંઘવીએ ઘણો જ ઘણો સહકાર આપ્યો છે તે માટે તેઓને ખૂબ ખૂબ ધન્યવાદ ઘટે છે.

આ પુણ્યકાર્યમાં દેવ-ગુરૂ કૃપાએ આમ વિવિધ રીતે સહાયક સર્વને મારા હજારો હાર્દિક ધન્યવાદ અને અભિનંદન છે.

મારાં સંસારી માતુશ્રીની જન્મશતાબ્દી નિમિત્તે પ્રગટ થતી આ **માતા સાધ્વીજી શ્રી મનોહરશ્રીજી જન્મશતાબ્દી જૈનગ્રંથમાલા**ના દ્વિતીય પુષ્પ તરીકે આ ગ્રંથના પ્રકાશનની બધી જ જવાબદારી **પાટણના** શ્રી હેમચંદ્રાચાર્ય જૈન જ્ઞાનમંદિરના કાર્યવાહકોએ સહર્ષ સ્વીકારી છે તે માટે તેમને પણ ધન્યવાદ ઘટે છે.

પરમકૃપાળુ દેવાધિદેવશ્રી **શંખેશ્વરપાર્શ્વનાથ** ભગવાન તથા પરમોપકારી પિતાશ્રી સદ્‌ગુરૂદેવ પૂજ્યપાદ પ્રાતઃસ્મરણીય મુનિરાજશ્રી **ભુવનવિજયજી** મહારાજના ચરણકમળમાં અનંતશઃ પ્રણિપાત કરીને, જે પરમાત્માની પરમકૃપાથી અને જેમની છત્રછાયામાં રહીને આ ભગીરથ કાર્ય અલ્પ સમયમાં પૂર્ણ થઈ શક્યું છે તે શ્રી **સિદ્ધાચલમંડન શ્રી ઋષભદેવ ભગવાનના** કરકમળની આ ગ્રંથ રૂપી પુષ્પ દ્વારા પૂજા કરીને આજે અત્યંત આનંદ અને ધન્યતા અનુભવું છું.

વિક્રમ સંવત્ ૨૦૫૧,
માગશરવદિ ૨,
તા. ૨૦-૧૨-૯૪
વીશા-નીમા ઉપાશ્રય
પાલિતાણા
Pin-364 270.

પૂજ્યપાદ આચાર્યદેવશ્રીમદ્વિજયસિદ્ધિસૂરીશ્વરપટ્ટાલંકાર–
પૂજ્યપાદ આચાર્યદેવશ્રીમદ્વિજયમેઘસૂરીશ્વરશિષ્યરત્ન–
પૂજ્યપાદ ગુરૂદેવ મુનિરાજશ્રી **ભુવનવિજયાન્તેવાસી**
મુનિ **જંબૂવિજય.**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रीसिद्धाचलमण्डन-**ऋषभदेव**स्वामिने नमः ।
श्रीशान्तिनाथाय नमः ।
श्रीशङ्खेश्वरपार्श्वनाथाय नमः ।
श्रीमहावीरस्वामिने नमः ।
श्रीगौतमस्वामिने नमः ।
पूज्यपादाचार्यमहाराजश्रीमद्विजय**सिद्धि**सूरीश्वरजीपादपद्मेभ्यो नमः ।
पूज्यपादाचार्यमहाराजश्रीमद्विजय**मेघ**सूरीश्वरजीपादपद्मेभ्यो नमः ।
पूज्यपादसद्गुरुदेवमुनिराजश्री**भुवनविजय**जीपादपद्मेभ्यो नमः ।

आमुखम् ।

अनन्तोपकारिणः परमकृपालोः **परमात्मनः** पूज्यपादानां परमोपकारिणां सद्गुरुदेवानां पितृचरणानां मुनिराजश्री १००८ **भुवनविजयजी**तातपादानां च कृपया साहाय्येन च तालपत्रोपरिलिखितैकमात्रादर्शानुसारेण संशोध्य सम्पाद्य च स्वोपज्ञ**रहस्यवृत्ति**विभूषितं श्री**सिद्धहेमचन्द्रशब्दानुशासनं** विदुषामध्येतॄणां तद्भक्तानां च पुरत उपन्यस्यन्तो वयमद्यामन्दमानन्दमनुभवामः ।

विरचयितारः

परमार्हत**कुमारपाल**भूपालप्रतिबोधकाः कलिकालसर्वज्ञा विश्वविख्याता आचार्यभगवन्तः **श्रीहेमचन्द्रसूरीश्वरा** अस्य विरचयितारः । गुर्जरदेशाधिपतेः **सिद्धराज-जयसिंहदेवस्य** प्रार्थनया ११९४ तमविक्रमसंवत्सरस्य प्रान्ते ११९५ तमविक्रमसंवत्सरस्य प्रारम्भे वा सर्वाङ्गसम्पूर्णमिदं शब्दानुशासनं विरचितमिति ऐतिह्यविद आमनन्ति ।

आचार्यभगवतां श्रीहेमचन्द्रसूरीश्वराणां संक्षिप्तं जीवनवृत्तम् ।

११४५ तमे वैक्रमे वर्षे कार्तिक्यां पूर्णिमायां धंधुकानगरे जन्म । पितुर्नाम **चाचिग** इति, मातुर्नाम **पाहिनी** इति, **चांगदेव** इति पुत्रस्य नाम। परमविदुषामाचार्य-भगवतां **देवचन्द्रसूरीश्वराणां** समीपे केषांचिद् मतेन वैक्रमे ११५० तमे वर्षे, अपरेषां मतेन ११५४ तमे वर्षे माघशुक्लचतुर्दश्यां शनिवासरे **स्तम्भतीर्थे (खंभात**नगरे) प्रव्रज्या। ११६६ तमे वर्षे **नागपुरे** सूरिपदे प्रतिष्ठा, **पाहिन्याश्च** प्रव्रज्या। प्रव्रज्यासमये

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सोमचन्द्र इति नाम गुरुभिः प्रदत्तम्, सूरिपदप्रदानसमये तु **हेमचन्द्र** इति नाम गुरुभिः प्रदत्तम् । १२२९ तमे वर्षे **पत्तने** स्वर्गवासः । विस्तरेण तु जीवनवृत्तं ग्रन्थान्तरेभ्योऽवसेयम् ।

संस्कृत-प्राकृतशब्दानामनुशासनमष्टाध्यायीरूपेण विरचितेऽस्मिन् व्याकरणे अति अति अति सुष्ठुरूपेण विद्यते । अत्र अष्टावध्यायाः, प्रत्यध्यायं चत्वारः पादाः, प्रतिपादं च कतिपयानि सूत्राणि । तत्र कस्मिन्नध्याये कस्मिंश्च पादे कियन्ति सूत्राणीत्येतद् निम्नलिखितकोष्ठकाज्ज्ञातव्यम् —

	पादः १	पादः २	पादः ३	पादः ४	संपूर्णसंख्या
प्रथमोऽध्यायः	४२	४१	६५	९३	२४१
द्वितीयोऽध्यायः	११८	१२४	१०५	११३	४६०
तृतीयोऽध्यायः	१६३	१५६	१०८	९४	५२१
चतुर्थोऽध्यायः	१२१	१२३	११५	१२२	४८१
पञ्चमोऽध्यायः	१७४	९३	१४१	९०	४९८
षष्ठोऽध्यायः	१४३	१४५	२१९	१८५	६९२
सप्तमोऽध्यायः	१९७	१७२	१८२	१२२	६७३
अष्टमोऽध्यायः	२७१	२१८	१८२	४४८	१११९

अत्र सप्तस्वध्यायेषु संस्कृतव्याकरणं वर्तते, अष्टमे तु **प्राकृत-शौरसेनी-मागधी-पैशाची-चूलिकापैशाची-अपभ्रंशभाषाणां** व्याकरणं वर्तते । सामान्यतः प्राकृतव्याकरणत्वेनाष्टमाध्यायस्य प्रसिद्धिः । सर्वसंख्यया ४६८५ सूत्राणि । तत्र ३५६६ संस्कृतव्याकरणसूत्राणि, १११९ प्राकृतव्याकरणसूत्राणि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अत्रायं प्रकरणविभागः

१. संज्ञाप्रकरणम्	अध्याय १	पाद १
२. स्वरसन्धिप्रकरणम्	अध्याय १	पाद २
३.व्यञ्जनसन्धिप्रकरणम्	अध्याय १	पाद ३
४. नामप्रकरणम्	अध्याय १	पाद ४
	अध्याय २	पाद १
५. कारकप्रकरणम्	अध्याय २	पाद २
६. षत्वणत्वप्रकरणम्	अध्याय २	पाद ३
७. स्त्रीप्रत्ययप्रकरणम्	अध्याय २	पाद ४
८. समासप्रकरणम्	अध्याय ३	पाद १-२
९. आख्यातप्रकरणम्	अध्याय ३	पाद ३-४
	अध्याय ४	पाद १-४
१०. कृदन्तप्रकरणम्	अध्याय ५	पाद १-४
११. तद्धितप्रकरणम्	अध्याय ६	पाद १-४
	अध्याय ७	पाद १-४
१२. प्राकृतव्याकरणम्	अध्याय ८	पाद १-४

सकलेऽपि व्याकरणे आचार्यपादैः स्वयमेव विस्तृता वृत्तिर्विरचिता, सेयं वृत्तिः स्वविरचितवृत्त्यन्तरापेक्षया महत्त्वाद् बृहद्वृत्तिरिति प्रसिद्धा। सप्तसु अध्यायेषु स्वोपज्ञवृत्तित्वेन प्रसिद्धा अपरास्तिस्रो लघ्व्यो वृत्तय उपलभ्यन्ते। एका लघुवृत्तित्वेन अत्यन्तं प्रसिद्धा । अपरा मध्यमवृत्तित्वेन सम्प्रति कतिपयैर्व्यवह्रियते, इयं च रहस्यवृत्तित्वेन प्रसिद्धाया वृत्तेः किञ्चिद् बृहत्तरा । अन्या तु रहस्यवृत्तित्वेन प्रसिद्धा, या अस्मिन् ग्रन्थे प्रकाश्यते, इयं तु अतिसंक्षिप्ता ।

इयं रहस्यवृत्तिः प्रायो लघुवृत्तिसदृशी, किन्तु अस्यां रहस्यवृत्तौ बहूनि सूत्राणि न गृहीतानि। श्रीसिद्धहेमचन्द्रशब्दानुशासने संस्कृतभाषासम्बद्धेषु सप्तस्वध्यायेषु सर्वमीलनेन ३५६६ सूत्राणि वर्तन्ते, तन्मध्यादस्यां रहस्यवृत्तौ १६७१ सूत्राण्येव यथाक्रमं गृहीतानि । यानि यानि सूत्राणि न व्याख्यातानि यथाक्रमं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चाऽगृहीतानि तेषां सूचिः पृथगेवात्र प्रदत्ता, जिज्ञासुभिरवश्यं सा विलोकनीया ।

अस्मिन् ग्रन्थे सिद्धहेमचन्द्रशब्दानुशासनस्य सप्ताध्याय्याः संपूर्णः सूत्र-पाठोऽपि अस्माभिः पृथगुपन्यस्त इति कानि कानि सूत्राणि अत्र रहस्यवृत्तौ यथाक्रमं न गृहीतानि न च व्याख्यातानि तदपि स्पष्टं ज्ञास्यते पठितृभिः ।

पठितॄणां संशोधकानां चानुकूल्याय सप्ताध्यायीसूत्राणामकारादिक्रमोऽपि अत्र पृथगुपन्यस्तः ।

किञ्चान्यत्, वैक्रमे १२१८ संवत्सरे लिखिते तालपत्रात्मके प्राचीने हस्तलिखितादर्शे कानिचित् पत्राणि त्रुटितानीति द्वाविंशतिर्नवानि पत्राणि केनचित् पश्चात् संयोजितानि । तानि चेमानि – ३, ५, १७-१९, ४८, ५२, ५३, ६१-६४, ७१, १००, ११८, १२०, १३५, १३७, १३८, १५०, १५८, १६० A । नवीनपत्राणां प्रारम्भे + ईदृशं चिह्नम्, समाप्तौ च ++ ईदृशं चिह्नमस्यां रहस्यवृत्तावस्माभिः उपन्यस्तम् । अतः + ++ एतच्चिह्नान्तर्गतः पाठो नूतनतालपत्रसत्क इति ज्ञेयम् । प्राचीनेषु तालपत्रेषु प्रायः शुद्धः पाठः, नूतनेषु तालपत्रेषु अशुद्धपाठा अपि बहवो दृश्यन्त इत्यपि ध्येयम् ।

ये केचन पाठा मूलादर्शे नासन् किन्तु पश्चात् केनचित् पत्रस्य उपरितने भागे अधस्तने भागे पार्श्वयोर्वा संशोध्य संस्कृत्य वा निर्दिष्टास्ते पाठाः टिप्पणेषु **Jसं०** इति रूपेण **सं०** इति संकेतेन सह अस्माभिरत्र निर्दिष्टाः, ये तु मूलादर्शस्थाः पाठास्ते **Jमू०** इत्येवं **मू०** इति संकेतेन सह निर्दिष्टाः ।

महता प्रयत्नेन विहितेऽपि संशोधने याः काश्चन अशुद्धयः अस्माकं मतिदोषाद् दृष्टिदोषाद्वा जाता यदि दृष्टिगोचरा भवेयुः तर्हि ताः स्वयमेव पठितृभिः प्रमार्जनीया अस्मभ्यमपि च निवेद्याः । वयं तेषामुपकारं मंस्यामहे ।

अस्य ग्रन्थस्य संशोधने सम्पादने च यतो यतः किमपि साहायकं लब्धं तेभ्यः सर्वेभ्यो भूयो भूयो धन्यवादान् वितरामि, विशेषतस्तु इमानत्र वयं संस्मरामः।

परमोपकारिणी परमपूज्या वयोवृद्धा मम माता साध्वीश्री**मनोहरश्री**-रिहलोक-परलोककल्याणकारिभिराशीर्वचनैर्निरन्तरं महत् साहायकं सर्वैः प्रकारैर्विधत्ते ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मम दिवंगतोऽन्तेवासी वयोवृद्धो देवतुल्यो मुनि**देवभद्रविजयः** सदा मे मानसिकं बलं पुष्णाति ।

ममातिविनीतोऽन्तेवासी मुनि**धर्मचन्द्रविजयः** तच्छिष्यश्च मुनि**पुण्डरीकरत्नविजयः** मुद्रितप्रारम्भिकपत्रसमूह(प्रुफ)पठन-परिशिष्टविधानादिषु अनेकविधेषु कार्येषु महद् महत् साहायकमनुष्ठितवन्तौ ।

मम मातुः साध्वीश्री **मनोहरश्रियः** शिष्यायाः साध्वीश्री **सूर्यप्रभाश्रियः** शिष्यया साध्वीश्री **जिनेन्द्रप्रभाश्रिया** पाठभेदसंग्रहादिकं प्रभूतं प्रभूतं कार्यं महता महता परिश्रमेण विहितम् ।

पाटणनिवासिनः **त्रिक्रमलालात्मजश्रेष्ठिश्रीव्रजलाल**महोदयस्य सुपुत्रः **मयूरः** कोम्प्युटरद्वारा सर्वमिदं महता परिश्रमेण मुद्रितवान् ।

मम मातुः पुण्यनाम्ना संकलितायां **माता साध्वीजी श्रीमनोहरश्रीजी-जन्मशताब्दीजैनग्रन्थमालायां** द्वितीयपुष्परूपेण ग्रन्थोऽयं प्रकाश्यत इति मे महानानन्दः ।

परमकृपालूनां परमेश्वराणां देवाधिदेवश्री **शङ्खेश्वरपार्श्वनाथप्रभूणां** परमोपकारिणां पूज्यपादानां पितृचरणानां सद्गुरुदेवानां मुनिराजश्री **भुवनविजयजी**महाराजानां चरणेषु अनन्तशः प्रणिपातं विधाय येषां परमात्मनां कृपया साहाय्याच्च कार्यमिदं सिद्धं तेषां परमकृपालूनां **श्रीसिद्धाचलतीर्थे** मूलनायकरूपेण विराजमानानां श्री **ऋषभदेव**भगवतां करकमलमेतद्ग्रन्थात्मकेन पुष्पेण पूजयित्वा अद्य परममानन्दमनुभवामि ।

विक्रमसंवत् २०५१
मार्गशीर्षकृष्णद्वितीया
(मम मातुर्जन्मतिथिः)
भौमवासरः
ता. २०-१२-९४
पालीताणा
(गुजरातराज्यम्)
Pin 364270

इत्यावेदयति –
पूज्यपादाचार्यदेवश्रीमद्विजय**सिद्धि**सूरीश्वरपट्टालंकार-
पूज्यपादाचार्यदेवश्रीमद्विजय**मेघ**सूरीश्वरशिष्य-
पूज्यपादगुरुदेवमुनिराजश्री**भुवनविजय**ान्तेवासी
मुनि **जम्बूविजयः**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अत्रेदमादावश्यमवधेयम् –

आचार्यभगवतां श्री **हेमचन्द्र**सूरीणां स्वर्गवासो वैक्रमे १२२९ वर्षे समजनि। तेषां विद्यमानतायां तालपत्रोपरि लिखितास्त्रयः **श्रीसिद्धहेमचन्द्रशब्दानुशासनस्य** आदर्शाः समुपलभ्यन्ते । तत्र विक्रमसंवत् १२०६ मध्ये तालपत्रोपरि लिखिते **जेसलमेरस्थे** २९७ ग्रन्थाङ्कयुते J1 आदर्शे ५।१।१ तः ५।४।१० पर्यन्तं सूत्राणि **लघुवृत्ति**सहितानि सन्ति। विक्रमसंवत् १२२१ मध्ये तालपत्रोपरि लिखिते **पाटण**नगरस्थे संघवीपाडाभंडारसत्के १३७(२) ग्रन्थाङ्कयुते P3 आदर्शे ३।३।१ तः ५।४।१० पर्यन्तं सूत्राणि **लघुवृत्ति**सहितानि सन्ति । विक्रमसंवत् १२१८ मध्ये तालपत्रोपरि लिखिते **जेसलमेरस्थे** ३०१ ग्रन्थाङ्कयुते आदर्शे सर्वेऽपि सप्त अध्यायाः **स्वोपज्ञरहस्यवृत्ति**सहिताः सन्ति । **श्रीसिद्धहेमचन्द्रशब्दानुशासने** सप्तसु अध्यायेषु ३५६६ सूत्राणि सन्ति, तेषु प्रायः १६७० सूत्राणि एव अस्यां **रहस्यवृत्तौ** व्याख्यातानि ।

एतदवलोकनेन स्पष्टमेव प्रतिभाति यद् ऋदुदितः [१।४।९०] इति सूत्रं प्रारम्भे आ.भ.श्री **हेमचन्द्रसूरि**भिर्नैव विरचितम् । किन्तु सर्वेऽपि ऋदितः उदितश्च प्रत्ययाः 'शन्तृ, अन्तृ, अन्तृश्, क्वंसु, ईयंसु' ... इत्येवम् उपान्त्य'न्'सहिता एव तैः स्वीकृताः। डित्यन्त्यस्वरादेः [२।१।११४] इति सूत्रानन्तरं च ईदृशानि त्रीणि सूत्राणि **रहस्यवृत्तौ** दृश्यन्ते —

"अघुटयुपान्त्यनोऽक्रुंचुचु(ऽक्रुञ्चञ्चु)दितः [२।१।११५]

क्रुञ्च-[अञ्च्]-उदिद्वर्जस्य उपान्त्यनस्य लुक् स्यात्, न तु घुटि । महतः । श्रेयः । अक्रुंचुंचु(अक्रुञ्चञ्चु)दित इति किम् ? क्रुञ्चा । साध्वञ्चा । सुकन्भ्याम् ।

अवर्णादश्नो वाऽन्तुरीङ्योः [२।१।११६]

श्नावर्जादवर्णात् परस्यान्तुरुपान्त्यनो लुग् वा स्यात् ई-ङ्योः । तुदती तुदन्ती कुले स्त्री वा । एवं भाती भान्ती । अवर्णादिति किम् ? अदती । [अ]श्न इति किम् ? लुनती ।

न श्यशवः [२।१।११७]

श्यान्छवश्च परस्यान्तुरीङ्योः परयोरुपान्त्यनो लुग् न स्यात् । दीव्यन्ती । पचन्ती ।"

उपरिनिर्दिष्टादर्शत्रयानुसारेण प्राचीने **सिद्धहेमचन्द्रशब्दानुशासने** एवंविधानि सूत्राणि आसन् —

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न स्तं मन्त्वर्थे [१।१।२३], डत्यन्तु संख्यावत् [१।१।३९], अभ्वादेरन्त्वसः सौ [१।४।९०], स्रंस्-ध्वंस्-क्वंस्वनडुहो दः [२।१।६८], मावर्णोपान्तपञ्चमवर्गान् मन्तोर्मो वः [२।१।९४], क्वंसुष् मन्तौ च [२।१।१०५], अघुटचुपान्त्यनोऽकुञ्चञ्चुदितः [२।१।११५], अवर्णादस्नो वान्तुरीङचोः [२-१-११६], न श्यशवः [२।१।११७], तृन्नुदन्ताव्यय-क्वंस्वाना-ऽन्तृश्-शन्तृ-ङि-णकच्-खलर्थस्य [२।२।९०], अनजिरादिबहुस्वर-शरादीनां मन्तौ [३।२।७८], नवाद्यानि शन्तृ-क्वंस् च परस्मैपदम् [३।३।१९], घसेकस्वरातः क्वंसु-कानौ तद्वत् [५।२।२], शन्त्रानशावेष्यति तु सस्यौ [५।२।२०], वा वेत्तेः क्वंसुः [५।२।२२], धारीङोऽकृच्छ्रेऽन्तृश् [५।२।२५], वाऽन्तोरिकः [६।४।१३२], इदंकिमोऽन्तुरिय् किय् चास्य [७।१।१४८], अन्तोरिथट् [७।१।१६१], तदस्यास्त्यस्मिन्निति मन्तुः [७।२।१], भवन्त्वायुष्मदीर्घायुर्देवानांप्रियैकार्थात् [७।२।९१], प्रायोऽन्तोर्द्वासट्मात्रट् [७।२।१५५], गुणाङ्गाद्वेष्ठेयंसू [७।३।९], कुमारीक्रीडनेयंसोः [७।३।१६], वयसि दन्तस्य दन्तृः [७।३।१५१], ईयंसोः [७।३।१७७], विन्मन्तोर्णिष्ठेयंसौ लुप् [७।४।३२]

वृत्तावपि च एतदनुसारेणैव सर्वत्र पाठ आसीत् । प्राचीनतमादर्शावलोकनादेतत् स्पष्टमेवावसीयते ।

इयं च **'शन्तृ'** इत्यादिरूपा 'न्' उपान्त्यवती प्रक्रिया **कातन्त्र**व्याकरणेऽस्त्येव । आचार्यश्री**हेमचन्द्रसूरि**भिरपि इयमेव आदौ स्वीकृता, किन्तूत्तरावस्थायां तैरेव परिवर्त्य **'शतृ'** इत्यादिरूपा विहितेति प्रतीयते । **पाणिनीय**व्याकरणे धातूनां रूपाणि 'लट्, लिट्, लुट्, लृट्, लेट्, लोट्, लङ्, लिङ्, लुङ्, लृङ्' इति दशलकारानुसारेण भवन्ति, तत्र 'लेट्' प्रत्यया वैदिकसंस्कृतशब्देष्वेव प्रयुज्यन्ते, अतो लौकिकसंस्कृतशब्देषु नवैव लकाराः, अतो 'लोट्' प्रत्ययानां पञ्चमी इति 'लिङ्' प्रत्ययानां च सप्तमी इति संज्ञा **कातन्त्रे** स्वीकृता । आचार्यश्री-**हेमचन्द्रसूरि**भिरपि सैव आदृता । किञ्च, जुहोत्यादिगणस्य अदादिगणेऽन्तर्भावं विधाय नवैव गणाः **कातन्त्रे** स्वीकृताः । एवमेव हैमव्याकरणेऽपि। एवमनेकेषु स्थलेषु **कातन्त्र**व्याकरणानुसरणं **सिद्धहेमचन्द्रशब्दानुशासने** दृश्यते । **कातन्त्र**-व्याकरणं वैक्रमे प्रथमे शतके ततः प्राग् वा विरचितं **शर्ववर्मणा** इति संशोधकाः कथयन्ति । एतच्च गूर्जरभाषायां लिखितायां प्रस्तावनायां [पृ० ६-११] विस्तरेण चर्चितमस्माभिः । विशेषतो जिज्ञासुभिस्तत्र विलोकनीयम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अनिर्दिष्टसूत्राङ्कसूचिः

[आचार्यश्रीहेमचन्द्रसूरिभिरत्र श्रीसिद्धहेमचन्द्रशब्दानुशासनस्य रहस्य-वृत्तौ यानि सूत्राणि न व्याख्यातानि क्रमशश्चानिर्दिष्टानि तेषां सूत्राणां प्रत्यध्यायं प्रतिपादं च अङ्कात्मिका सूचिरत्रोपन्यस्यते]

अध्यायः	पादः	मूलसूत्र-संख्या	अनिर्दिष्टसूत्राणि	निर्दिष्ट-सूत्राणि
१	१	४२	२५, ३०-३६, ३८-४२ = १३	२९
	२	४१	२-५, ७-११, १४-२०, २२, २५, २६, ३२, ३३, ३६, ३९, ४० = २४	१७
	३	६५	१०-१३, १५-१९, २५, २९, ३१-३८, ४४, ४७, ४८, ५४, ५६, ५८, ५९ = २६	३९
	४	९३	६०, ७० = २	९१
२	१	११८	३०, ३२, ४४, ६१, ९५-१०१ = ११	१०७
	२	१२४	७, १४-२३, २६-२८, ३४-३९, ४६, ४७, ४९, ५६-६०, ६६, ६७, ७२-७४, ७८, ८२, ८४, ८५, ८७, ९७, ९९-१०५, १०७, ११०-११६, ११९-१२४ = ६०	६४
	३	१०५	९-१४, १६-३५, ३७-६२, ६४-९६, १००, १०४, १०५ = ८८	१७
	४	११३	६-१०, १२, १७, २१-३०, ३३, ३४, ३६-७०, ७४, ७५, ७८-८५, ८९, ९०, ९३, ९४,	३४

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अध्यायः	पादः	मूलसूत्र-संख्या	अनिर्दिष्टसूत्राणि	निर्दिष्ट-सूत्राणि
३	१	१६३	३-१७, २३-२५, २७-३६, ३८, ४०, ४१, ४३-४६, ४८, ५३, ५५-५७, ६०, ६१, ६३, ६५-६९, ७४, ७८-८७, ८९-९५, ९७, १००-११५, ११८-१४७, १४९-१५९, १६१-१६३ = १२७	३६
	२	१५६	५, १०-४८, ५१-५६, ६५, ७१, ७३-७६, ८०-८४, ८७, ८९, ९०, ९४-१०३, १०५, १०६, १०९, ११०, ११२, ११४, ११५, ११८, १२०, १२१, १२६-१२८, १३१-१३३, १३९, १४०, १४२, १४४, १४५, १४७, १४८, १५०, १५६ = ९५	६१
	३	१०८	४, २३-९४, ९६-९९, १०१-१०८ = ८५	२३
	४	९४	३१-३३, ४५, ८५, ८७-९४ = १३	८१
४	१	१२१	७-११, १३-१५, २६, ४९, ६१, ६६, ६७, ९३, ९९, १०१, ११२, ११४, १२०, १२१ = २०	१०१
	२	१२३	५, ११, १३-१५, १९, २५, २७-३२, ३६, ३७, ४७, ५४, ७३, ७५, ८०, ११२ = २१	१०२
	३	११५	५६, ५७, ११३-११५ = ५	११०

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अध्यायः	पादः	मूलसूत्र-संख्या	अनिर्दिष्टसूत्राणि	निर्दिष्ट-सूत्राणि
	४	१२२	१३, ६५, ६६, ६९, ७०, ७३, ७७, ९३-९७ = १२	११०
५	१	१७४	४-६, ८, १४, १५, १८, २१-२६, ३२-३४, ३६, ३७, ३९, ४२-४६, ५१, ५५, ५७, ६१, ८४, ८६-८९, ९२-९४, ९८, ९९, १०१-१०४, १०७, १०८, ११४, ११५, ११९-१२७, १३२, १३३, १३९-१४१, १४३, १४४, १४९-१५१, १५६, १६०-१६५ = ७२	१०२
	२	९३	५, ८-१०, १३, १४, १७, १८, २१, २६, २९-३२, ३४-३६, ३९, ६८-७८, ८२, ८३, ८९-९१ = ३४	५९
	३	१४१	२, ३, ६, २०, २१, २५, २७, २९, ३१-८१, ९२-९४, ९९, १०१, ११५, १२५, १२८, १३१, १३४-१३८ = ७३	६८
	४	९०	२-८, ११-२०, २३-२५, ३०-३२, ५८, ५९, ६६, ७२, ७६, ७९, ८०, ८२-८८ = ३७	५३
६	१	१४३	३-५, ९, १०, १२, १४, १६-२३, २६, ३३-४०, ४३-४६, ४९-५२, ५५-५९, ६१-६७, ७३-११३, ११५-११९, १२१-१२३,	३५

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अध्यायः	पादः	मूलसूत्र-संख्या	अनिर्दिष्टसूत्राणि	निर्दिष्ट-सूत्राणि
			१२७, १२९-१३४, १३६-१४३ = १०८	
	२	१४५	२-४, ७, ८, १०, ११, १५-२३, २६, २७, ३२-४४, ४७, ४९, ५१-५४, ५६, ५९-६१, ६४-६८, ७२-८४, ८६-९७, ९९, १००, १०२-११६, ११९-१४४ = ११४	३१
	३	२१९	७, १०-१२, १४, १५, १७-२९, ३४-६६, ६८-७३, ८१-८४, ९१, ९३, ९६, ९७, १००, १०१, १०३-१११, ११४-११७, ११९, १२०, १२५, १२६, १३०-१४७, १५२-१५६, १६१-१६४, १६६-१७४, १७७-१८०, १८२-१९०, १९३-१९७, १९९-२०३, २०५-२१९ = १५९	६०
	४	१८५	४, ६-८, १२-२६, २९-३७, ३९-४१, ४४, ४५, ५२, ५३, ५५, ५६, ५८-६१, ६३-७३, ७५-७९, ८१-१२८, १३१-१३६, १३८, १४२-१४९, १५२-१७६, १७९-१८५ = १५२	३३

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अध्यायः	पादः	मूलसूत्र-संख्या	अनिर्दिष्टसूत्राणि	निर्दिष्ट-सूत्राणि
७	१	१९७	२-११, १४, १७, २०-२४, २६, २७, २९, ३१-३४, ३६-३९, ४२, ४३, ४५-५०, ५६, ५७, ६१-१३७, १३९, १४१, १४४-१४९, १५३, १५४, १५७, १६१, १६९-१९७ = १५६	४१
	२	१७२	७-४४, ४८-५२, ५४-७४, ७६, ७७, ७९, ८०, ८२, ८३, ८५, ८६, १०५-१०८, ११२-१२५, १२७-१२९, १३१, १३४, १३६-१४४, १४७, १५१, १५२, १५४, १६५-१६८, १७१, १७२ = ११४	५८
	३	१८२	१२-१४, १६-२६, ३२, ३५-५१, ५६, ५७, ५९-६८, ७१, ७३, ७५, ७७-९४, ९७, १०७-११५, ११९-१२२, १२६, १२७, १२९, १३१-१४३, १४५, १४६, १४९, १५१-१६८, १७२-१७४, १७८-१८२ = १२४	५८
	४	१२२	२-४, ७, ८, १०-३१, ३३, ३६, ३७, ४२, ४५-४७, ४९, ५०, ५४, ५७-६०, ६२-६६, ७१, ७२, ७६-७८, ८३, ८५, ८६, ८९-९१, ९३-९५, ९७-१०३, ११६, ११७, १२१ = ७०	५२

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विषयानुक्रमः ।

प्रथमोऽध्यायः	पत्राणि	१-२५
द्वितीयोऽध्यायः	,,	२६-५७
तृतीयोऽध्यायः	,,	५८-८६
चतुर्थोऽध्यायः	,,	८७-१३७
पञ्चमोऽध्यायः	,,	१३८-१७०
षष्ठोऽध्यायः	,,	१७१-१८८
सप्तमोऽध्यायः	,,	१८९-२१४
सिद्धहेम०सप्ताध्यायीसूत्रपाठः	,,	१-१०१
सप्ताध्यायीसूत्राणामकारादि-क्रमः	,,	१०२-१७०

रहस्यवृत्तेः शुद्धिपत्रकम्

पृष्ठम्	पंक्तिः	अशुद्धम्	शुद्धम्
१३६	९	ऋतां	ॠतां
१३६	१०	ऋदन्तस्य	ॠदन्तस्य
१३६	१०	ऋत इर्	ॠत इर्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्री ऋषभदेवस्वामिने नमः ।
श्री शान्तिनाथाय नमः । श्री नेमिनाथाय नमः ।
श्री शङ्खेश्वरपार्श्वनाथाय नमः । श्री महावीरस्वामिने नमः ।
श्री गौतमस्वामिने नमः । श्री सद्गुरुभ्यो नमः ॥
ॐ श्रीँ ह्रीँ अर्हँ नमः ।
आचार्यभगवत्-कलिकालसर्वज्ञ-श्रीहेमचन्द्रसूरिप्रणीतं
स्वोपज्ञरहस्यवृत्तिविभूषितं

श्रीसिद्धहेमचन्द्रशब्दानुशासनम् ॥

[प्रथमोऽध्यायः]

[प्रथमः पादः]

प्रणम्य **परमात्मानं** श्रेयः शब्दानुशासनम् ।
आचार्य**हेमचन्द्रेण** स्मृत्वा किञ्चित् प्रकाश्यते ॥१॥

अर्हँ ।१।१।१॥

अर्हँ इत्येतदक्षरं परमेश्वरस्य परमेष्ठिनो वाचकं मङ्गलार्थं शास्त्रस्याऽऽदौ प्रणिदध्महे ॥१॥

सिद्धिः स्याद्वादात् ।१।१।२॥

स्याद्वादाद् अनेकान्तवादात् प्रकृतानां शब्दानां **सिद्धिः** निष्पत्तिर्ज्ञप्तिश्च वेदितव्या ॥२॥

लोकात् ।१।१।३॥

अनुक्तानां संज्ञानां न्यायानां च लोकाद् वैयाकरणादेः **सिद्धिर्ज्ञप्तिर्वेदितव्या** ॥३॥

औदन्ताः स्वराः ।१।१।४॥

औकारावसाना वर्णाः स्वरसंज्ञाः स्युः । अ आ इ ई उ ऊ ऋ ॠ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ऌ ॡ ए ऐ ओ औ ॥४॥

एक-द्वि-त्रिमात्रा ह्रस्व-दीर्घ-प्लुताः ।१।१।५॥

मात्रा कालविशेषः । एक-द्वि-त्र्युच्चारणमात्रा औदन्ता वर्णा यथासङ्ख्यं ह्रस्व-दीर्घ-प्लुतसंज्ञाः स्युः । अ इ उ ऋ ऌ, आ ई ऊ ॠ ॡ, ए ऐ ओ औ, आ ३ ई ३ ऊ ३ इत्यादि ॥५॥

अनवर्णा नामी ।१।१।६॥

अवर्णवर्जा औदन्ता वर्णा नामिसंज्ञाः स्युः । इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ ॥६॥

ऌदन्ताः समानाः ।१।१।७॥

ऌकारावसाना वर्णाः समानाः स्युः । अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ॥७॥

ए-ऐ-ओ-औ सन्ध्यक्षरम् ।१।१।८॥

ए ऐ ओ औ इत्येते वर्णाः सन्ध्यक्षराणि स्युः ॥८॥

अं अः अनुस्वार-विसर्गौ ।१।१।९॥

अकारावुच्चारणार्थौ । अं इति नासिक्यो वर्णः अः इति च कण्ठ्यो यथासङ्ख्यमनुस्वार-विसर्गौ स्याताम् ॥९॥

कादिर्व्यञ्जनम् ।१।१।१०॥

कादिर्वर्णो हपर्यन्तो व्यञ्जनं स्यात् । क ख ग घ ङ, च छ ज झ ञ, ट ठ ड ढ ण, त थ द ध न, प फ ब भ म, य र ल व, श ष स, ह ॥१०॥

अपञ्चमान्तस्थो धुट् ।१।१।११॥

वर्गपञ्चमा-ऽन्तस्थावर्जः कादिर्वर्णो धुट् स्यात् । क ख ग घ, च छ ज झ, ट ठ ड ढ, त थ द ध, प फ ब भ, श ष स, ह ॥११॥

पञ्चको वर्गः ।१।१।१२॥

कादिषु वर्णेषु यो यः पञ्चसङ्ख्यापरिमाणो वर्णः स वर्गः स्यात् । क ख ग घ ङ, च छ ज झ ञ, ट ठ ड ढ ण, त थ द ध न, प फ ब भ म ॥१२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आद्य-द्वितीय-श-ष-सा अघोषाः ।१।१।१३॥

वर्गाणामाद्यद्वितीया वर्णाः श-ष-साश्चाघोषाः स्युः । क ख, च छ, ट ठ, त थ, प फ, श ष स ॥१३॥

अन्यो घोषवान् ।१।१।१४॥

अघोषेभ्योऽन्यो कादिर्वर्णो घोषवान् स्यात् । ग घ ङ, ज झ ञ, ड ढ ण, द ध न, ब भ म ॥१४॥

य-र-ल-वा अन्तस्थाः ।१।१।१५॥

एते अन्तस्थाः स्युः ॥१५॥

अं-अः-क-प-श-ष-साः शिट् ।१।१।१६॥

अ-क-पा उच्चारणार्थाः । अनुस्वार-विसर्गौ वज्र-गजकुम्भाकृती च वर्णौ श-ष-साश्च शिटः स्युः ॥१६॥

तुल्यस्थाना-ऽऽस्यप्रयत्नः स्वः ।१।१।१७॥

स्थानं कण्ठादि । आस्ये प्रयत्न आस्यप्रयत्नः स्पृष्टतादिः । **तुल्यौ** वर्णान्तरेण सदृशौ स्थाना-ऽऽस्यप्रयत्नौ यस्य स वर्णस्तं प्रति स्वः स्यात् ।

तत्र त्रयोऽकारा उदात्ता-ऽनुदात्त-स्वरिताः +प्रत्येकं सानुनासिक-निरनुनासिकभेदात् षट्, एवं दीर्घ-प्लुतौ । इत्यष्टादश भेदा अवर्णस्य । ते सर्वे कण्ठस्थाना विवृतकरणाः परस्परं स्वाः । एवम् इवर्णास्तावन्तस्तालव्या विवृत-करणाः स्वाः । उवर्णा ओष्ठ्या विवृतकरणाः स्वाः । ऋवर्णा मूर्द्धन्या विवृतकरणाः स्वाः । ऌवर्णा दन्त्या विवृतकरणाः स्वाः ।

सन्ध्यक्षराणां ह्रस्वा न सन्तीति तानि प्रत्येकं द्वादशभेदानि । तत्र एकारास्तालव्या विवृततराः स्वाः, ऐकारास्तालव्या अतिविवृततराः स्वाः, ओकारा ओष्ठ्या विवृततराः स्वाः, औकारा ओष्ठ्या अतिविवृततराः स्वाः ।

वर्ग्याः पञ्च परस्परं स्वाः । य-ल-वानामनुनासिकोऽननुनासिकश्च द्वौ भेदौ परस्परं स्वौ ॥१७॥

स्यौजसमौशस्-टाभ्यांभिस्-ङेभ्यांभ्यस्-ङसिभ्यांभ्यस्-ङसोसाम्-ङ्योस्सुपां त्रयी त्रयी प्रथमादिः ।१।१।१८॥

स्यादीनां प्रत्ययानां त्रयी त्रयी यथासङ्ख्यं प्रथमा द्वितीया तृतीया चतुर्थी

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पञ्चमी षष्ठी सप्तमी च स्यात् ॥१८॥

स्त्यादिर्विभक्तिः ।१।१।१९॥

'स्' इति 'ति' इति चेत्युत्सृष्टानुबन्धस्य सेस्तिवश्च ग्रहणम्। स्यादयस्तिवादयश्च सुप्-स्यामहिपर्यन्ता विभक्तयः स्युः ॥१९॥

तदन्तं पदम् ।१।१।२०॥

स्याद्यन्तं त्याद्यन्तं च पदं स्यात् । धर्मो वः स्वम् । ददाति नः शास्त्रम् ॥२०॥

नाम सिदव्यञ्जने ।१।१।२१॥

सिति प्रत्यये यवर्जव्यञ्जनादौ च परे पूर्वं नाम पदं स्यात् । भवदीयः । पयोभ्याम् । अयिति किम् ? वाच्यति ॥२१॥

नं क्ये ।१।१।२२॥

क्ये इति क्यन्-क्यङ्-क्यङ्षां ग्रहणम् । नान्तं नाम क्ये परे पदं स्यात् । राजीयति । राजायते । चर्मायते ॥२२॥

न स्तं मन्त्वर्थे ।१।१।२३॥

सान्तं तान्तं च नाम मन्त्वर्थे परे पदं न स्यात् । यशस्वी । तडित्वान् ॥२३॥

मनुर्नभो-ऽङ्गिरो वति ।१।१।२४॥

एतानि वति परे पदं न स्युः । मनुष्वत् । नभस्वत् । अङ्गिरस्वत् ॥२४॥

सविशेषणमाख्यातं वाक्यम् ।१।१।२६॥

प्रयुज्यमानैरप्रयुज्यमानैर्वा विशेषणैः सहितं प्रयुज्यमानमप्रयुज्यमानं वाऽऽख्यातं वाक्यं स्यात् । धर्मो वो रक्षतु । लुनीहि ३ पृथुकाँश्च खाद । शीलं ते स्वम् ॥२५॥

अधातु-विभक्ति-वाक्यमर्थवन्नाम ।१।१।२७॥

धातु-विभक्त्यन्त-वाक्यवर्जमर्थवच्छब्दरूपं नाम स्यात् । वृक्षः । स्वः । धवश्च । अधातु-विभक्ति-वाक्यमिति किम् ? अहन् । वृक्षान् । साधुर्धर्मं ब्रूते ॥२६॥

शिर्घुट् ।१।१।२८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जस्-शसादेशः शिर्घुट् स्यात् । पद्मानि । पयांसि ॥२७॥++

पुं-स्त्रियोः स्यमौजस् ।१।१।२९॥

स्यादयः पुं-स्त्रीलिङ्गयोर्घुटः स्युः । राजा, राजानम्, राजानौ, राजानः । सीमा, सीमानम्, सीमानौ, सीमानः ॥२८॥

अप्रयोगीत् ।१।१।३७॥

इह शास्त्र उपदिश्यमानो वर्णस्तत्समुदायो वा प्रयोगेऽदृश्यमान इत् स्यात् । एधते । यजते । चित्रीयते, *नमो-वरिवश्चित्रङोऽर्चा-सेवा-ऽऽश्चर्ये* [३।४।३७] इति क्यन् ॥२९॥

इत्याचार्यश्रीहेमचन्द्रविरचितायां स्वोपज्ञसिद्धहेमचन्द्रशब्दानुशासनरहस्यवृत्तौ प्रथमाध्यायस्य प्रथमः॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[प्रथमाध्याये द्वितीयः पादः]

समानानां तेन दीर्घः ॥१।२।१॥

समानानां **तेन** समानेन परेण दीर्घः स्यात् । दण्डाग्रम् । साऽऽगता । दधीदम् । नदीन्द्रः । मधूदकम् । वधूढा । पितॄषभः । ऋकारः । मातॄकारः ॥१॥

अवर्णस्येवर्णादिनैदोदरल् ।१।२।६॥

अवर्णस्य इ-उ-ऋ-ऌवर्णैः सह यथासङ्ख्यम् 'ए ओ अर् अल्' इत्येते स्युः । देवेन्द्रः । तवेहा । मालेयम् । सेक्षते । तवोदकम् । तवोढा । गङ्गोदकम् । सोढा । तवर्षिः । तवर्कारः । महर्षिः । सर्कारः । तवल्कारः । सल्कारेण ॥२॥

ऐदौत् सन्ध्यक्षरैः ।१।२।१२॥

अवर्णस्य सन्ध्यक्षरैः परैः सह 'ऐ औ' इत्येतौ स्याताम् । तवैषा । खट्वैषा । तवैन्द्री । सैन्द्री । तवौदनः । तवौपगवः ॥३॥

ऊटा ।१।२।१३॥

अवर्णस्य परेण ऊटा सह औः स्यात् । धौतः ॥४॥

इवर्णादेरस्वे स्वरे यवरलम् ।१।२।२१॥

इ-उ-ऋ-ऌवर्णानामस्वे स्वरे परे 'य् व् र् ल्' इत्येते स्युः । दध्यत्र । नद्येषा । मध्वत्र । वध्वासनम् । पित्र्यर्थः । क्रादिः । लित् । लाकृतिः ॥५॥

एदैतोऽयाय् ।१।२।२३॥

एदैतोः स्वरे परे यथासङ्ख्यम् 'अय् आय्' इत्येतौ स्याताम् । नयनम् । वृक्षयेव । नायकः । रायैन्द्री ॥६॥

ओदौतोऽवाव् ।१।२।२४॥

ओदौतोः स्वरे परे यथासङ्ख्यम् 'अव् आव्' +इत्येतौ स्याताम् । लवनम् । पटवोतुः । लावकः । गावौ ॥७॥

एदोतः पदान्तेऽस्य लुक् ।१।२।२७॥

एदोद्भ्यां पदान्तस्थाभ्यां परस्याऽकारस्य लुक् स्यात् । तेऽत्र । पटोऽत्र । पदान्त इति किम् ? नयनम् ॥८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गोर्नाम्न्यवोऽक्षे ।१।२।२८॥

गोरोतः पदान्तस्थस्य अक्षे परे संज्ञायाम् अव इति स्यात् । गवाक्षः । नाम्नीति किम् ? गोऽक्षाणि ॥९॥

स्वरे वाऽनक्षे ।१।२।२९॥

गोरोतः पदान्तस्थस्य स्वरे परे अव इति वा स्यात्, स चेत् परोऽक्षस्थो न स्यात् । गवाग्रम् । गोऽग्रम् । गवेशः । गवीशः । अनक्षे इति किम् ? गोऽक्षम् । ओत इत्येव, चित्रग्वर्थः ॥१०॥

इन्द्रे ।१।२।३०॥

गोरोतः पदान्तस्थस्य इन्द्रस्थे स्वरे परे अव इति स्यात् । गवेन्द्रः ॥११॥

वाऽत्यसन्धिः ।१।२।३१॥

गोरोतः पदान्तस्थस्य अकारे परे सन्ध्यभावो वा भवति । गोअग्रम् । गवाग्रम् । गोऽग्रम् । अतीति किम् ? गवेङ्गितम् ॥१२॥

ईदूदेद् द्विवचनम् ।१।२।३४॥

ई ऊ ए इत्येवमन्तं द्विवचनान्तं स्वरे परे असन्धिः स्यात् । मुनी इह । साधू एतौ । माले इमे । पचेते इति । ईदूदेदिति किम् ? वृक्षावत्र । द्विवचनमिति किम् ? कुमार्यत्र ॥१३॥

अदोमुमी ।१।२।३५॥

अदसः सम्बन्धिनौ मु-मी इत्येतौ स्वरे परे असन्धिः स्यात् । अमुमुईचा । अमी अश्वाः ॥१४॥

ओदन्तः ।१।२।३७॥

ओदन्तश्चादिः स्वरे परे असन्धिः स्यात् । अहो अत्र ॥१५॥

सौ नवेतौ ।१।२।३८॥

सिनिमित्त ओदन्त इतौ परे असन्धिर्वा स्यात् । पटो इति । पटविति ॥१६॥

अइउवर्णस्यान्तेऽनुनासिकोऽनीदादेः ।१।२।४१॥

अइउवर्णानामन्ते विरामेऽनुनासिको वा स्यात्, न चेदेते *ईदूदेद् द्विवचनम् [१।२।३४-४०]* इत्यादिसूत्रसम्बन्धिनः स्युः । सामँ, साम । खट्वाँ,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

खट्वा । दधिँ, दधि । कुमारीँ, कुमारी । मधुँ, मधु । अनीदादेरिति किम् ? अग्नी । अमी ॥१७॥

इत्याचार्यश्रीहेमचन्द्रविरचितायां स्वोपज्ञसिद्धहेमचन्द्रशब्दानुशासनरहस्यवृत्तौ प्रथमाध्यायस्य द्वितीयः ।१।२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[प्रथमाध्याये तृतीयः पादः]

तृतीयस्य पञ्चमे ।१।३।१॥

वा इति पदान्त इति अनुनासिक इति चानुवर्त्तते । वर्गतृतीयस्य पदान्तस्थस्य पञ्चमे परेऽनुनासिको वा स्यात् । वाङ् ङ्वते, वाग् ङ्वते । ककुम्मण्डलम्, ककुब्मण्डलम् ॥१॥

प्रत्यये च ॥१।३।२॥

पदान्तस्थस्य तृतीयस्य प्रत्ययपञ्चमे परेऽनुनासिको नित्यं स्यात् । वाङ्मयम् । षण्णाम् । च उत्तरत्र वाऽनुवृत्त्यर्थः ॥२॥

ततो हश्चतुर्थः ।१।३।३॥

पदान्तस्थात् ततस्तृतीयात् परस्य हस्य पूर्वस्ववर्गश्चतुर्थो वा स्यात् । वाग्घीनः, वाग्हीनः । ककुब्भासः, ककुब्हासः ॥३॥

प्रथमादधुटि शश्छः ।१।३।४॥

पदान्तस्थात् प्रथमात् परस्य शस्याधुटि परे छो वा स्यात् । वाक्छूरः, वाक्शूरः । त्रिष्टुप्छ्रुतम्, त्रिष्टुप्श्रुतम् । अधुटीति किम् ? वाक् श्च्योतति ॥४॥

रः क-ख-प-योः ×क-ʊपौ ।१।३।५॥

पदान्तस्थस्य रेफस्य क-खे प-फे च परे यथासंख्यं ×क-ʊपौ वा स्याताम् । क×करोति, कः करोति । क×खनति, कः खनति । कʊपचति, कः पचति । कʊफलति, कः फलति ॥५॥++

श-ष-से श-ष-सं वा ।१।३।६॥

पदान्तस्थस्य रस्य श-ष-सेषु परेषु यथासङ्ख्यं श-ष-सा वा स्युः । कश्शेते, कः शेते । कष्षण्ढः, कः षण्ढः । कस्साधुः, कः साधुः ॥६॥

च-ट-ते सद्वितीये ।१।३।७॥

पदान्तस्य रस्य च-ट-तेषु सद्वितीयेषु परेषु यथासङ्ख्यं श-ष-सा नित्यं स्युः । कश्चरः । कश्छः । कष्टः । कष्ठः । कस्तः । कस्थः ॥७॥

नोऽप्रशानोऽनुस्वारा-ऽनुनासिकौ च पूर्वस्याऽधुट्परे ।१।३।८॥

पदान्तस्य प्रशान्वर्जशब्दसम्बन्धिनो नस्य च-ट-तेषु सद्वितीयेषु अधुट्परेषु परेषु श-ष-सा यथासङ्ख्यं स्युः, अनुस्वारा-ऽनुनासिकौ चागमा-ऽऽदेशौ पूर्वस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्रमेण स्याताम् । भवांश्चरः, भवाँश्चरः । भवांश्छ्यति, भवाँश्छ्यति । भवांष्टकः, भवाँष्टकः । भवांष्ठकारः, भवाँष्ठकारः । भवांस्तनुः, भवाँस्तनुः । भवांस्थुडति, भवाँस्थुडति । अप्रशान इति किम् ? प्रशान् चरः । अधुट्पर इति किम् ? भवान् त्सरुकः । भवाञ्च् छूरः, भवाञ्च् शूर इत्यादौ तु शेषाद्वा *नः शि ञ्च्* [१।३।१९] ॥८॥

पुमोऽशिट्यघोषेऽख्यागि रः ।१।३।९॥

पुमिति पुम्सोः संयोगलुक्यनुकरणम् । अधुट्परे अघोषे शिट्-ख्याग्वर्जे परे पुमित्येतस्य रः स्यात्, अनुस्वारा-ऽनुनासिकौ च पूर्वस्य । पुंस्कामा । पुँस्कामा । अशिटीति किम् ? पुंशरः । अघोष इति किम् ? पुंदासः । अख्यागीति किम् ? पुंख्यातः । अधुट्पर इत्येव, पुंक्षारः ॥९॥

तौ मुमो व्यञ्जने स्वौ ।१।३।१४॥

मोम्र्वागमस्य, पदान्तस्य च मस्य, व्यञ्जने परे तस्यैव स्वौ तावनुस्वारा-ऽनुनासिकौ क्रमेण स्याताम् । चंक्रम्यते, चङ्क्रम्यते । वंवम्यते, ववँवम्यते । त्वं करोषि, त्वङ्करोषि ॥१०॥

अतोऽति रोरुः ।१।३।२०॥

आत् परस्य पदान्तस्थस्य रोरति परे उर्नित्यं स्यात् । कोऽर्थः ॥११॥

घोषवति ।१।३।२१॥

आत् परस्य पदान्तस्थस्य रोर्घोषवति परे उः स्यात् । धर्मो जेता ॥१२॥

अवर्ण-भो-भगो-अघोर्लुगसन्धिः ।१।३।२२॥

अवर्णाद् भो-भगो-ऽघोभ्यश्च परस्य पदान्तस्य रोर्घोषवति परे लुक् स्यात् । स च न सन्धिहेतुः । देवा यान्ति । भो यासि । भगो हस । अघो वद ॥१३॥

व्योः ।१।३।२३॥

अवर्णात् परयोः पदान्तयोर्व-ययोर्घोषवति परे लुक् स्यात्, स चासन्धिः । वृक्षवृश्चम् अव्ययं वाऽऽचक्षाणः वृक्षव्, अव्यय् । वृक्ष याति । अव्य याति ॥१४॥

स्वरे वा ।१।३।२४॥

अवर्ण-भो-भगो-ऽघोभ्यः परयोः पदान्तस्थयोर्व-ययोः स्वरे परे लुग् वा स्यात्,

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

स चासन्धिः । पट इह, पटविह । वृक्षा इह, वृक्षाविह । त आहुः, त याहुः । तस्मा इदम्, तस्मायिदम् । भो अत्र, भोयत्र । भगो अत्र, भगोयत्र । अघो अत्र, अघोयत्र ॥१५॥

रोर्यः ।१।३।२६॥

अवर्ण-भो-भगो-ऽघोभ्यः परस्य पदान्तस्य रोः स्वरे परे यः स्यात् । कयास्ते । देवायासते । भोयत्र । भगोयत्र । अघोयत्र ॥१६॥

ह्रस्वाद् ङ-ण-नो द्वे ।१।३।२७॥

ह्रस्वात् परेषां पदान्तानां ङ-ण-नां स्वरे परे द्वे रूपे स्याताम् । कुङ्ङास्ते । सुगण्णिह । कृषन्नास्ते ॥१७॥

अनाङ्माङो दीर्घाद्वा छः ।१।३।२८॥

आङ्-माङ्वर्जपदस्थाद् दीर्घात् परस्य छस्य द्वे रूपे वा स्याताम् । कन्याच्छत्रम्, कन्याछत्रम् । अनाङ्-माङ इति किम् ? आच्छाया । माच्छिदत् । *ऋदिच्छवि-स्तम्भू-मुचू-म्लुचू-ग्रुचू-ग्लुचू-ग्लुञ्चू-ग्रो वा* [३।४।६५] इत्यङ् ॥१८॥

स्वरेभ्यः ।१।३।३०॥

स्वरात् परस्य छस्य द्वे रूपे स्याताम् । इच्छति ॥१९॥

म्रां धुड्वर्गेऽन्त्योऽपदान्ते ।१।३।३९॥

अपदान्तानां मनां धुटि वर्गे परे निमित्तस्यैवान्त्योऽनु स्यात् । गन्ता । शङ्किता । कम्पिता । धुडिति किम् ? आहन्म्हे । धुड्वर्ग इति किम् ? गम्यते । अपदान्त इति किम् ? भवान् करोति ॥२०॥

शिड्-हेऽनुस्वारः ।१।३।४०॥

अपदान्तानां म्रां शिटि हे च परेऽनुस्वारोऽनु स्यात् । पुंसि । दंशः । बृंहणम् ॥२१॥

रो रे लुग् दीर्घश्चाऽदिदुतः ।१।३।४१॥

रस्य रे परेऽनु लुक् स्यात्, अ-इ-ऊनां च दीर्घः । पुना रात्रिः । अग्नी रथेन । पटू राजा ॥२२॥

ढस्ते ।१।३।४२॥

ढस्य तन्निमित्ते ढे परेऽनु लुक् स्यात्, दीर्घश्चादिदुतः । माढिः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लीढम् । गूढम् । तड्ढे इति किम् ? मधुलिड् ढौकते ॥२३॥

सहिवहेरोच्चाऽवर्णस्य ।१।३।४३॥

सहि-वह्योर्ढस्य तड्ढे परेऽनु लुक् स्यात्, ओच्चावर्णस्य । सोढा । वोढा । उदवोढाम् ॥२४॥

तदः सेः स्वरे पादार्था ।१।३।४५॥

तदः परस्य सेः स्वरे परे लुक् स्यात्, सा चेत् पादपूरणी स्यात् । सैष दाशरथी रामः ॥२५॥

एतदश्च व्यञ्जनेऽनग्-नञ्समासे ।१।३।४६॥

एतदस्तदश्च परस्य सेर्व्यञ्जने परे लुक् स्यात्, अकि नञ्समासे च न । एष दत्ते, स लाति । अनग्-नञ्समास इति किम् ? एषकः कृती । सको याति । अनेषो याति । असो वाति ॥२६॥

तृतीयस्तृतीय-चतुर्थे ।१।३।४९॥

तृतीये चतुर्थे च परेऽर्थात् धुटस्तृतीयः स्यात् । मज्जति, दोग्धा ॥२७॥

अघोषे प्रथमोऽशिटः ।१।३।५०॥

अघोषे परे शिड्वर्जस्य धुटः प्रथमः स्यात् । वाक्पूता । अशिट इति किम् ? पयस्सु ॥२८॥

विरामे वा ।१।३।५१॥

विरामस्थस्याऽशिटो धुटः प्रथमो वा स्यात् । वाक्, वाग् ॥२९॥

न सन्धिः ।१।३।५२॥

उक्तो वक्ष्यमाणश्च सन्धिर्विरामे न स्यात् । दधि अत्र ॥३०॥

रः पदान्ते विसर्गस्तयोः ।१।३।५३॥

पदान्तस्य रस्य **तयोः** विरामा-ऽघोषयोर्विसर्गः स्यात् । वृक्षः । स्वः । कः कृती । पदान्त इति किम् ? ईर्त्ते ॥३१॥

शिट्यघोषात् ।१।३।५५॥

अघोषात् परे शिटि परतः पदान्तस्य रस्य विसर्ग एव स्यात् । पुरुषः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्सरुकः । सर्प्पिः प्साति । वासः क्षौमम् । अद्भिः प्सातम् ॥३२॥

अरोः सुपि रः ।१।३।५७॥

रोरन्यस्य रस्य सुपि परे र एव स्यात् । गीर्षु । धूर्षु । अरोरिति किम् ? पयस्सु ॥३३॥

तवर्गस्य श्ववर्ग-ष्टवर्गाभ्यां योगे च-टवर्गौ ।१।३।६०॥

तवर्गस्य श्-चवर्गाभ्यां ष्-टवर्गाभ्यां च योगे यथासङ्ख्यं चवर्ग-टवर्गौ स्याताम् । तच् शेते । भवाञ् शेते । तच्चारु । तञ्ज्ञकारेण । पेष्टा । पूष्णः । तट्टके । तण्णकारे । ईट्टे ॥३४॥

सस्य श-षौ ।१।३।६१॥

सस्य श्ववर्ग-ष्टवर्गाभ्यां योगे यथासङ्ख्यं श-षौ स्याताम् । चवर्गेण श्च्योतति, वृश्चति । षेण द्योष्षु । टवर्गेण पापट्ष्षि ॥३५॥

न शात् ।१।३।६२॥

शात् परस्य तवर्गस्य चवर्गो न स्यात् । अश्नाति । प्रश्नः ॥३६॥

पदान्ताट्टवर्गादनाम्-नगरी-नवतेः ।१।३।६३॥

पदान्ताट्टवर्गात् परस्य नाम्-नगरी-नवतिवर्जस्थस्य तवर्गस्य सस्य च टवर्ग-षौ न स्याताम् । षट्तयम् । षण्नयाः । षट्सु । अनाम्-नगरी-नवतेरिति किम् ? षण्णाम् । षण्णगरी । षण्णवतिः ॥३७॥

षि तवर्गस्य ।१।३।६४॥

पदान्तस्थस्य तवर्गस्य षे परे टवर्गो न स्यात् । तीर्थकृत् षोडशः शान्तिः । षोडश इति *एकादश-षोडश-षोडत्-षोढा-षड्ढा* [३।२।९१] इति सिद्धम् ॥३८॥

लि लौ ।१।३।६५॥

पदान्तस्थतवर्गस्य ले परे लौ स्याताम् । तल्लूनम् । तल्लूँनम्[1] ॥३९॥

॥ प्रथमाध्यायस्य तृतीयः ॥

---

१. अत्र लेखकदोषः प्रतीयते, लघुवृत्त्यादिषु **'भवाल्लुँनाति'** इति उदाहरणं दृश्यते ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[प्रथमाध्याये चतुर्थः पादः]

अत आः स्यादौ जस्-भ्याम्-ये ।१।४।१॥

स्यादौ जसि भ्यामि ये च परेऽकारस्य आः स्यात् । देवाः । आभ्याम् । सुखाय । स्यादौ इति किम् ? बाणान् जस्यति, किप्, बाणजः ॥१॥

भिस ऐस् ।१।४।२॥

आत् परस्य स्यादेर्भिस ऐस् स्यात् । देवैः । ऐस्करणाद् अतिजरसैः ॥२॥

इदमदसोऽक्येव ।१।४।३॥

इदमदसोरक्येव सति आत् परस्य भिस ऐस् स्यात् । इमकैः । अमुकैः । अक्येव इति किम् ? एभिः । अमीभिः ॥३॥

एद् बहुस्भोसि ।१।४।४॥

बह्वर्थे स्यादौ सादौ भादौ ओसि च परे अत एत् स्यात् । एषु । एभिः । देवयोः ॥४॥

टा-ङसोरिन-स्यौ ।१।४।५॥

आत् परयोः टाङसोर्यथासङ्ख्यं इन-स्यौ स्याताम् । तेन । यस्य ॥५॥

ङे-ङस्योर्या-ऽऽतौ ।१।४।६॥

आत् परस्य ङेर्ङसेश्च यथासङ्ख्यं य आच स्याताम् । देवाय । देवात् ॥६॥

सर्वादेः स्मै-स्मातौ ।१।४।७॥

सर्वादेरदन्तस्य सम्बन्धिनौ ङे-ङस्योर्यथासङ्ख्यं स्मै-स्मातौ स्याताम् । सर्वस्मै । सर्वस्मात् । सर्व विश्व उभ उभयट् अन्य अन्यतर इतर डतर डतम त्व त्वत् नेम । सम-सिमौ सर्वार्थौ । पूर्व-परा-ऽवर-दक्षिणोत्तरा-ऽपरा-ऽधराणि व्यवस्थायाम् । स्वमज्ञाति-धनाख्यायाम् । अन्तरं बहिर्योगोपसंव्यानयोरपुरि । त्यद् तद् यद् अदस् इदम् एतद् एक द्वि युष्मद् भवन्तु अस्मद् किम् इति असंज्ञायां सर्वादिः ॥७॥

ङेः स्मिन् ॥१।४।८॥

सर्वादेरदन्तस्य ङेः स्मिन् स्यात् । सर्वस्मिन् ॥८॥

जस इः ।१।४।९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सर्वादेरदन्तस्य जस इः स्यात् । सर्वे ॥९॥

नेमा-ऽर्द्ध-प्रथम-चरम-तया-ऽया-ऽल्प-कतिपयस्य वा ।१।४।१०॥

नेमादीनि नामानि, तया-ऽयौ प्रत्ययौ, तेषामदन्तानां जस इर्वा स्यात् । नेमे, नेमाः । अर्द्धे, अर्द्धाः । प्रथमे, प्रथमाः । चरमे, चरमाः । द्वितये, द्वितयाः । त्रये, त्रयाः । अल्पे, अल्पाः । कतिपये, कतिपयाः ॥१०॥

द्वन्द्वे वा ।१।४।११॥

द्वन्द्वसमासस्थस्यादन्तस्य सर्वादेर्जस इर्वा स्यात् । पूर्वोत्तरे, पूर्वोत्तराः ॥११॥

न सर्वादिः ।१।४।१२॥

द्वन्द्वे सर्वादिः सर्वादिर्न स्यात् । पूर्वा-ऽपराय, पूर्वा-ऽपरात्, पूर्वा-ऽपरे । कतर-कतमानाम्, कतर-कतमकाः ॥१२॥

तृतीयान्तात् पूर्वा-ऽवरं योगे ।१।४।१३॥

तृतीयान्तात् परौ पूर्वा-ऽवरौ योगे सम्बन्धे सति सर्वादी न स्याताम् । मासेन पूर्वाय, मासपूर्वाय । दिनेनाऽवराय, दिनावराय । दिनेनाऽवराः, दिनावराः । तृतीयान्तादिति किम् ? पूर्वस्मै मासेन ॥१३॥

तीयं ङित्कार्ये वा ।१।४।१४॥

तीयान्तं नाम ङे-ङसि-ङस्-ङीनां कार्ये सर्वादिर्वा स्यात् । द्वितीयस्मै, द्वितीयाय । द्वितीयस्यै, द्वितीयायै । ङित्कार्य इति किम् ? द्वितीयकाय ॥१४॥

अवर्णस्याऽऽमः साम् ।१।४।१५॥

अवर्णान्तस्य सर्वादेरामः साम् स्यात् । सर्वेषाम्, विश्वासाम् ॥१५॥

नवभ्यः पूर्वेभ्य इ-स्मात्-स्मिन् वा ।१।४।१६॥

पूर्वादिभ्यो नवभ्यो ये इ-स्मात्-स्मिनो यथास्थानमुक्ताः ते वा स्युः । पूर्वे, पूर्वाः । पूर्वस्मात्, पूर्वात् । पूर्वस्मिन्, पूर्वे इत्यादि । नवभ्य इति किम् ? त्ये ॥१६॥

आपो ङितां यै-यास्-यास्-याम् ।१।४।१७॥

आबन्तस्य ङितां ङे-ङसि-ङस्-ङीनां यथासङ्ख्यं यै-यास्-यास्-यामः स्युः । खट्वायै । खट्वायाः । खट्वायाः । खट्वायाम् ॥१७॥

सर्वादेर्डस्पूर्वाः ।१।४।१८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सर्वादेराबन्तस्य ङितां यै-यास्-यास्-यामः ते ङस्पूर्वाः स्युः । सर्वस्यै । सर्वस्याः । सर्वस्याः । सर्वस्याम् ॥१८॥

टौस्येत् ।१।४।१९॥

आबन्तस्य टौसोः परयोरेकारः स्यात् । बहुराजया । बहुराजयोः ॥१९॥

औता ।१।४।२०॥

आबन्तस्य औता सहैकारः स्यात् । माले स्तः पश्य वा ॥२०॥

इदुतोऽस्त्रेरीदूत् ।१।४।२१॥

स्त्रेरन्यस्येदन्तस्योदन्तस्य च औता सह यथासङ्ख्यं ईदूतौ स्याताम् । मुनी । साधू । अस्त्रेरिति किम् ? अतिस्त्रियौ नरौ ॥२१॥

जस्येदोत् ।१।४।२२॥

इदुदन्तयोर्जसि परे यथासङ्ख्यमेदोतौ स्याताम् । मुनयः । साधवः ॥२२॥

ङित्यदिति ।१।४।२३॥

अदिति ङिति स्यादौ परे इदुदन्तयोर्यथासङ्ख्यमेदोतौ स्याताम् । अतिस्त्रये । साधवे । अतिस्त्रेः साधोः आगतं स्वं वा । अदितीति किम् ? बुद्ध्याः । धेन्वाः । स्यादौ इत्येव, शुची स्त्री ॥२३॥

टः पुंसि ना ।१।४।२४॥

पुंवृत्तेः इदुदन्तात् परस्याः टाया ना स्यात् । अतिस्त्रिणा । अमुना । पुंसि इति किम् ? बुद्ध्या ॥२४॥

ङिर्डौ ।१।४।२५॥

इदुदन्तात् परो ङिर्डौ स्यात् । मुनौ । धेनौ । अदिदित्येव, बुद्ध्याम् ॥२५॥

केवलसखि-पतेरौ ।१।४।२६॥

केवलसखि-पतिभ्यामिदन्ताभ्यां परो ङिरौः स्यात् । सख्यौ । पत्यौ । इत इत्येव, सखायमिच्छति सख्यि । केवलेति किम् ? प्रियसखौ । नरपतौ ॥२६॥

न ना ङिदेत् ।१।४।२७॥

केवलसखि-पतेर्यः टाया ना ङिति परे एचोक्तः स न स्यात् । सख्या । पत्या । सख्ये । पत्ये । सख्युः पत्युः आगतं स्वं वा । सख्यौ । पत्यौ । ङिदिति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किम् ? पतयः ॥२७॥

स्त्रिया ङितां वा दै-दास्-दास्-दाम् ।१।४।२८॥

स्त्रीलिङ्गादिदुदन्तात् परेषां ङितां ङे-ङसि-ङस्-ङीनां यथासङ्ख्यं दै-दास्-दास्-दामो वा स्युः । बुद्ध्यै, बुद्धये । बुद्ध्याः बुद्धेः आगतं स्वं वा । बुद्ध्याम्, बुद्धौ । धेन्वै, धेनवे । धेन्वाः, धेनोः । धेन्वाम्, धेनौ । प्रियबुद्ध्यै प्रियबुद्धये पुंसे ॥२८॥

स्त्रीदूतः ।१।४।२९॥

नित्यं स्त्रीलिङ्गादीदन्तादूदन्ताच्च परेषां स्यादेर्ङितां यथासङ्ख्यं दै-दास्-दास्-दामः स्युः । नद्यै । नद्याः । नद्याः । नद्याम् । कुर्व्यै । कुर्व्याः । कुर्व्याः । कुर्व्याम् । अतिलक्ष्म्यै पुंसे स्त्रियै वा । स्त्रीति किम् ? ग्रामण्ये खलप्वे स्त्रियै ॥२९॥

वेयुवोऽस्त्रियाः ।१।४।३०॥

इयुवोः स्थानिनौ यौ स्त्रीदूतौ तदन्तात् स्त्रीवर्ज्जात् परेषां स्यादेर्ङितां यथासङ्ख्यं दै-दास्-दास्-दामो वा स्युः । श्रियै, श्रिये । श्रियाः, श्रियः । श्रियाः, श्रियः । श्रियाम्, श्रियि । अतिश्रियै, अतिश्रिये, पुंसे स्त्रियै वा । भ्रुवै, भ्रुवे । भ्रुवाः, भ्रुवः । भ्रुवाः, भ्रुवः । भ्रुवाम्, भ्रुवि । अतिभ्रुवै अतिभ्रुवे पुंसे स्त्रियैवा।इयुवइतिकिम्?आध्यै।*दिद्युद्-दद्दज्जगज्जुहू-वाक्-प्राट्-धी-श्री-द्रू-सू-ज्वायतस्तू-कटप्रू-परिव्राड्-भ्राजादयः क्विप् [५।२।८३]* इति निपातनात् क्विप् । अस्त्रिया इति किम् ? स्त्रियै ॥३०॥

आमो नाम् वा ।१।४।३१॥

इयुवोः स्थानिभ्यां स्त्रीदूदन्ताभ्यां परस्य आमो नाम् वा स्यात्, न तु स्त्रियाः । श्रीणाम्, श्रियाम् । भ्रूणाम्, भ्रुवाम् । अतिश्रीणाम् अतिश्रियाम् अतिभ्रूणाम् अतिभ्रुवाम् नृणां स्त्रीणां वा । इयुव इत्येव ? प्रधीनाम् ॥३१॥

ह्रस्वा-ऽऽपश्च ।१।४।३२॥

ह्रस्वान्तादाबन्तात् स्त्रीदूदन्ताच्च परस्यामो नाम् स्यात् । देवानाम् । मालानाम् । स्त्रीणाम् । वधूनाम् ॥३२॥

सङ्ख्यानां र्ण्याम् ।१।४।३३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

र-ष-नान्तानां सङ्ख्यावाचिनामामो नाम् स्यात् । चतुर्ण्णाम् । षण्णाम् । पञ्चानाम् । अष्टानाम् ॥३३॥

त्रेस्त्रयः ।१।४।३४॥

आमः सम्बन्धिनस्त्रेस्त्रयः स्यात् । त्रयाणाम् ॥३४॥

एदोद्भ्यां ङसि-ङसो रः ।१।४।३५॥

एदोद्भ्यां परयोः प्रत्येकं ङसि-ङसो रः स्यात् । मुनेः । मुनेः । गोः । गोः । द्योः । द्योः ॥३५॥

खि-ति-खी-तीय उर् ।१।४।३६॥

खि-ति-खी-तीसम्बन्धिनो यात् परयोर्ङसि-ङसोरुर् स्यात् । सख्युः । सख्युः । पत्युः । पत्युः । सखायम् पतिं चेच्छतः सख्युः, पत्युः । य इति किम् ? अतिसखेः । अधिपतेः ॥३६॥

ऋतो डुर् ।१।४।३७॥

ऋतः परयोः ङसि-ङसोर्डुर् स्यात् । पितुः । पितुः ॥३७॥

तृ-स्वसृ-नप्तृ-नेष्टृ-त्वष्टृ-क्षत्तृ-होतृ-पोतृ-प्रशास्तॄ घुट्यार् ।१।४।३८॥

तृच्-तृन्नन्तस्य स्वस्रादीनां च ऋतो घुटि परे आर् स्यात् । कर्त्तारम् । कर्त्तारौ । कर्त्तारः । स्वसारम् । नप्तारम् । नेष्टारम् । त्वष्टारम् । क्षत्तारम् । होतारम् । पोतारम् । प्रशास्तारम् । घुटीति किम् ? कर्तृ कुलं पश्य ॥३८॥

अर्डौ च ।१।४।३९॥

ऋतो र्डौ घुटि च परे अर् स्यात् । नरि । नरम् ॥३९॥

मातुर्मातः पुत्रेऽर्हे सिनाऽऽमन्त्र्ये ।१।४।४०॥

मातुरामन्त्र्ये पुत्रे वर्त्तमानस्य सिना सह मातः स्यात्, अर्हे प्रशंसायाम् । हे गार्गीमात ! । पुत्र इति किम् ? हे मातः !, हे गार्गीमातृके वत्से ! । अर्हे इति किम् ? अरे गार्गीमातृक ! ॥४०॥

ह्रस्वस्य गुणः ।१।४।४१॥

आमन्त्र्यार्थवृत्तेर्ह्रस्वान्तस्य सिना सह गुणः स्यात् । हे पितः ! । हे मुने ! ॥४१॥

एदापः ।१।४।४२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आमन्त्र्यार्थवृत्तेराबन्तस्य सिना सह एः स्यात् । हे माले !, हे बहुराजे ! ॥४२॥

नित्यदिद्-द्विस्वराम्बार्थस्य ह्रस्वः ।१।४।४३॥

नित्यं दित् दै-दास्-दास्-दामादेशो येभ्यः तेषां द्विस्वराम्बार्थानां चाऽऽबन्तानामामन्त्र्यवृत्तीनां सिना सह ह्रस्वः स्यात् । हे स्त्रि ! । हे लक्ष्मि ! । हे श्वश्रु ! । हे वधु ! । हे अम्ब ! । हे अक्क ! । नित्यदिद् इति किम् ? हे हूहूः ! । द्विस्वरेति किम् ? हे अम्बाडे ! । आप इत्येव, हे मातः ! ॥४३॥

अदेतः स्यमोर्लुक् ।१।४।४४॥

अदन्तादेदन्ताच्चामन्त्र्यवृत्तेः परस्य सेरमश्च लुक् स्यात् । हे देव ! । हे उपकुम्भ ! । हे अतिहे ! ॥४४॥

दीर्घङ्याब्-व्यञ्जनात् सेः ।१।४।४५॥

दीर्घङ्याबन्ताभ्यां व्यञ्जनाच्च परस्य सेर्लुक् स्यात् । नदी । माला । राजा । दीर्घेति किम् ? निष्कौशाम्बिः । *निर्दुर्बहिराविःप्रादुश्चतुराम्* [२।३।९] इति षः । अतिखट्वः ॥४५॥

समानादमोऽतः ।१।४।४६॥

समानात् परस्याऽमोऽस्य लुक् स्यात् । देवम् । मालाम् । मुनिम् । नदीम् । साधुम् । वधूम् ॥४६॥

दीर्घो नाम्यतिसृ-चतसृ-ष्-रः ।१।४।४७॥

तिसृ-चतसृ-ष-रान्तवर्जस्य समानस्य नामि परे दीर्घः स्यात् । वनानाम् । मुनीनाम् । साधूनाम् । पितॄणाम् । अतिसृ-चतसृ-ष्-र इति किम् ? तिसृणाम् । चतसृणाम् । षण्णाम् । चतुर्णाम् ॥४७॥

नुर्वा ।१।४।४८॥

नुः समानस्य नामि परे दीर्घो वा स्यात् । नृणाम् । नॄणाम् ॥४८॥

शसोऽता, सश्च नः पुंसि ।१।४।४९॥

शसोऽता सह पूर्वसमानस्य दीर्घः स्यात्, तत्सन्नियोगे च पुंसि शसः सो नः । देवान् । वातप्रमीन् । साधून् । हूहून् । पितॄन् । पुंसीति किम् ? शालाः ॥४९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सङ्ख्या-साय-वेरह्नस्याऽहन् ङौ वा ।१।४।५०॥

सङ्ख्यावाचिभ्यः साय-विभ्यां च परस्याऽह्नस्य ङौ परेऽहन् वा स्यात्। द्व्यह्नि, द्व्यहनि, द्व्यह्ने । सायाह्नि, सायाहनि, सायाह्ने । व्यह्नि, व्यहनि, व्यह्ने ॥५०॥

निय आम् ।१।४।५१॥

नियः परस्य ङेराम् स्यात्। नियाम्। ग्रामण्याम्। *ग्रामा-ऽग्रान्नियः* [२।३।७१] इति णत्वम् ॥५१॥

वाष्टन आः स्यादौ ।१।४।५२॥

अष्टनः स्यादौ परे आ वा स्यात्। अष्टाभिः, अष्टभिः। प्रियाष्टाः, प्रियाष्टा ॥५२॥

अष्ट औ जस्-शसोः ।१।४।५३॥

अष्टनः कृतात्वस्य जस्-शसोरौः स्यात्। अष्टौ। अष्टौ ॥५३॥

डति-ष्-णः सङ्ख्याया लुप् ।१।४।५४॥

डति-ष-नां सङ्ख्यानां जस्-शसोर्लुप् स्यात्। कति। कति। षट्। षट्। पञ्च। पञ्च ॥५४॥

नपुंसकस्य शिः ।१।४।५५॥

नपुंसकस्य जस्-शसोः शिः स्यात्। कुण्डानि, पयांसि ॥५५॥

औरी ।१।४।५६॥

नपुंसकस्य औरी स्यात्। कुण्डे। पयसी ॥५६॥

अतः स्यमोऽम् ।१।४।५७॥

अदन्तस्य नपुंसकस्य स्यमोरम् स्यात्। कुण्डम्। हे कुण्ड ! ॥५७॥

पञ्चतोऽन्यादेरनेकतरस्य दः ।१।४।५८॥

पञ्चपरिमाणस्य नपुंसकस्याऽन्यादेः स्यमोर्दः स्यात्, एकतरवर्जम्। अन्यत्। अन्यतरत्। इतरत्। कतरत्। कतमत्। अनेकतरस्येति किम् ? एकतरम् ॥५८॥

अनतो लुप् ।१।४।५९॥

अनकारान्तस्य नपुंसकस्य स्यमोर्लुप् स्यात्। कर्तृ। पयः ॥५९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नामिनो लुग्वा ।१।४।६१॥

नाम्यन्तस्य नपुंसकस्य स्यमोर्लुग्वा स्यात् । हे वारे !, हे वारि ! । प्रियतिसृ प्रियत्रि कुलम् ॥६०॥

वाऽन्यतः पुमांष्टादौ स्वरे ।१।४।६२।

अन्यतो विशेष्यवशान्नपुंसको नाम्यन्तः टादौ स्वरे परे पुंवद्वा स्यात् । ग्रामण्या ग्रामणिना कुलेन । कर्त्रोः कर्तृणोः कुलयोः । अन्यत इति किम् ? पीलुने फलाय । टादाविति किम् ? शुचिनी कुले । नपुंसकस्येत्येव, कल्याण्यै स्त्रियै ॥६१॥

दध्यस्थिसक्थ्यक्ष्णोऽन्तस्याऽन् ।१।४।६३॥

एषां नपुंसकानां नाम्यन्तानामन्तस्य टादौ स्वरे परे अन् स्यात् । दध्ना । अतिदध्ना । अस्थ्ना । अत्यस्थ्ना । सक्थ्ना । अतिसक्थ्ना । अक्ष्णा । अत्यक्ष्णा ॥६२॥

अनामूस्वरे नोऽन्तः ।१।४।६४॥

नाम्यन्तस्य नपुंसकस्याऽऽमूवर्ज्जे स्यादौ स्वरे परे नोऽन्तः स्यात् । वारिणी । वारिणः । कर्तृणी । प्रियतिसृणः । अनामिति किम् ? वारीणाम् । स्वर इति किम् ? हे वारे ! । स्यादौ इत्येव, तौम्बुरवं चूर्णम् ॥६३॥

स्वराच्छौ ।१।४।६५॥

शौ परे स्वरान्तान्नपुंसकात् परो नोऽन्तः स्यात् । कुण्डानि । स्वरादिति किम् ? चत्वारि ॥६४॥

धुटां प्राक् ।१।४।६६॥

स्वरात् परा या धुड्जातिः तदन्तस्य नपुंसकस्य शौ परे धुड्भ्य एव प्राग् नोऽन्तः स्यात् । पयांसि । अतिजरांसि । काष्ठत्वङ्क्षि । स्वरादित्येव, गोमन्ति ॥६५॥

र्लो वा ।१।४।६७॥

र-लाभ्यां परा या धुड्जातिः तदन्तस्य नपुंसकस्य शौ परे धुड्भ्य एव प्राक् नोऽन्तो वा स्यात् । बहूर्ज्जि, बहूर्जि । सुवल्ङ्क्षि, सुवल्गि । र्लो इति किम् ? काष्ठत्वङ्क्षि । धुटामित्येव, सुफुल्लि ॥६६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

घुटि ।१।४।६८॥

निमित्तविशेषोपादानं विना आ पादपरिसमाप्तेर्यत् कार्यं वक्ष्यते तद् घुटि वेदितव्यम् ॥६७॥

अचः ।१।४।६९॥

अञ्चतेर्धातोर्धुडन्तस्य धुटः प्राक् नोऽन्तो घुटि स्यात् । प्राङ् । अतिप्राङ् । प्राञ्चौ । प्राञ्चि कुलानि ॥६८॥

युज्रोऽसमासे ।१।४।७१॥

युजृंपी योगे [हैमधा० १४७६] इत्यस्याऽसमासे धुडन्तस्य धुटः प्राक् घुटि नोऽन्तः स्यात् । युङ् । युञ्जौ । युञ्जि कुलानि । बहुयुङ् । असमास इति किम् ? अश्वयुक् । युज्र इति किम् ? *युजिंच् समाधौ* [हैमधा० १२५४] युजमापन्नाः[मुनयः] ॥६९॥

अनडुहः सौ ।१।४।७२॥

अनडुहो धुडन्तस्य धुटः प्राक् सौ परे नोऽन्तः स्यात् । अनड्वान् । प्रियानड्वान् ॥७०॥

पुंसोः पुमन्स् ।१।४।७३॥

पुंसोः पुमन्स् घुटि स्यात् । पुमान् । प्रियपुमान् । प्रियपुमांसि ॥७१॥

ओत औ ।१।४।७४॥

ओतो घुटि परे औ स्यात् । गौः । गावौ । द्यौः । द्यावौ । प्रियद्यावौ । ओत इति किम् ? चित्रगू ॥७२॥

आ अम्शसोऽता ।१।४।७५॥

ओतोऽम्-शसोरता सह आः स्यात् । गाम् । सुगाम् । गाः । द्याम् । अतिद्याम् । द्याः । +सुद्याः ॥७३॥

पथिन्-मथिन्-ऋभुक्षः सौ ।१।४।७६॥

एषां नान्तानामन्तस्य सौ परे आः स्यात् । पन्थाः । हे पन्थाः ! । मन्थाः ! । हे मन्थाः ! । ऋभुक्षाः । हे ऋभुक्षाः । नान्तनिर्देशादिह न स्यात्,

१. [ ] Jसं० मध्येऽयं पाठः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पन्थानमिच्छन् पथीः ॥७४॥

एः ।१।४।७७॥

पथ्यादीनां नान्तानामितो घुटि परे आः स्यात् । पन्थाः । पन्थानौ । पन्थानः । पन्थानम् । सुपन्थानि कुलानि । मन्थाः । ऋभुक्षाः । नान्तनिर्देशादिह न स्यात्, पथ्यौ । पथ्यः ॥७५॥

थो न्थ् ।१।४।७८॥

पथिन्मथिनोर्नान्तयोस्थस्य घुटि परे न्थ् स्यात् । तथैवोदाहृतम् ॥७६॥

इन् ङी-स्वरे लुक् ।१।४।७९॥

पथ्यादीनां नान्तानां ङ्यां घुट्स्वरादौ च स्यादौ परे इन् लुक् स्यात् । सुपथी स्त्री कुले वा । पथः । सुमथी स्त्री कुले वा । मथः । अनृभुक्षी सेना कुले वा । ऋभुक्षः ॥७७॥

वोशनसो नश्चाऽऽमन्त्र्ये सौ ।१।४।८०॥

आमन्त्र्यवृत्तेरुशनसो न-लुकौ सौ परे वा स्याताम् । हे उशनन् !, हे उशन !, हे उशनः ! । आमन्त्र्ये इति किम् ? उशना ॥७८॥

उतोऽनङुच्-चतुरो वः ।१।४।८१॥

आमन्त्र्यवृत्त्योरनङुच्चतुरोरुतः सौ परे वः स्यात् । हे अनड्वन् ! । हे अतिचत्वः ! ॥७९॥

वाः शेषे ।१।४।८२॥

आमन्त्र्यविहितात् सेरन्यो घुट् शेषः, तस्मिन् परेऽनङुच्चतुरोरुतो वाः स्यात् । अनड्वान्, अनड्वाहौ । प्रियचत्वाः । प्रियचत्वारौ । शेषे इति किम् ? हे अनड्वन् ! । हे प्रियचत्वः ! ॥ ८०॥

सख्युरितोऽशावैत् ।१।४।८३॥

सख्युरिदन्तस्य शिवर्जे शेषे घुटि परे ऐत् स्यात् । सखायौ । सखायः । इत इति किम् ? सख्यौ स्त्रियौ । अशौ इति किम् ? अतिसखीनि । शेषे इत्येव, हे सखे ! ॥८१॥

ऋदुशनस्पुरुदंशोऽनेहसश्च सेर्डाः ।१।४।८४॥

ऋदन्तादुशनसादेः सख्युरितश्च परस्य शेषस्य सेर्डाः स्यात् । पिता ।++

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अतिपिता । कर्त्ता । उशना । पुरुदंशा । अनेहा । सखा ॥८२॥

नि दीर्घः ।१।४।८५॥

शेषे घुटि परे यो नः तस्मिन् परे स्वरस्य दीर्घः स्यात् । राजा । राजानौ । वनानि । कर्तॄणि । शेषे इत्येव, हे राजन् ! ॥८३॥

न्स्-महतोः १।४।८६॥

न्सन्तस्य महतश्च स्वरस्य शेषे घुटि परे दीर्घः स्यात् । श्रेयान् । श्रेयांसौ । महान् । महान्तौ ॥८४॥

इन्-हन्-पूषा-ऽर्यम्णः शि-स्योः ।१।४।८७॥

इन्नन्तस्य हनादेश्च स्वरस्य शि-स्योरेव परयोर्दीर्घः स्यात् । दण्डीनि । स्रग्वीणि । दण्डी । स्रग्वी । भ्रूणहानि । *ब्रह्म-भ्रूण-वृत्रात् क्विप्* [५।१।१६१] इति क्विप् । बहुपूषाणि । पूषा । स्वर्यमाणि । अर्यमा । शिस्योः । एव इति किम् ? दण्डिनौ । वृत्रहणौ, *पूर्वपदस्थान्नाम्नगः* [२।३।६४] इति णत्वम् । पूषणौ । अर्यमणौ ॥८५॥

अपः ।१।४।८८॥

अपः स्वरस्य शेषे घुटि परे दीर्घः स्यात् । आपः । स्वापौ ॥८६॥

नि वा ।१।४।८९॥

अपः स्वरस्य नागमे सति घुटि परे दीर्घो वा स्यात् । स्वाम्पि । + स्वम्पि । बह्वाम्पि । बह्वम्पि ॥८७॥

अभ्वादेरन्त्वसः सौ ।१।४।९०॥

अन्त्वन्तस्याऽसन्तस्य च भ्वादिवर्जस्य शेषे सौ परे दीर्घः स्यात् । भवान् । यवमान् । *नोम्र्यादिभ्यः* [२।१।९९] इति वत्वाभावः । गोमन्तं स्थूलशिरसं वेच्छति गोमान्, स्थूलशिराः । अभ्वादेरिति किम् ? पिण्डग्रः ॥८८॥

क्रुशस्तुनस्तृच् पुंसि ।१।४।९१॥

क्रुशो यस्तुन् तस्य शेषे घुटि परे तृच् स्यात् पुंसि । क्रोष्टा, क्रोष्टारौ । पुंसीति किम् ? कृशक्रोष्टूनि वनानि ॥८९॥ शेषात् क्रोष्ट्रा, क्रोष्टुना इत्यादिषु

टादौ स्वरे वा ।१।४।९२॥ ॥९०॥

स्त्रियाम् ।१।४।९३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्रुशः परस्य तुनः स्त्रीवृत्तेस्तृच् स्यात् निर्निमित्त एव । क्रोष्ट्री, क्रोष्ट्र्यौ, क्रोष्ट्रीभ्याम् ॥९१॥

इत्याचार्यश्रीहेमचन्द्रविरचितायां स्वोपज्ञसिद्धहेमचन्द्रशब्दानुशासनरहस्यवृत्तौ प्रथमस्य चतुर्थः ॥१।४॥

प्रथमोऽध्यायः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[अथ द्वितीयोऽध्यायः]

[प्रथमः पादः]

त्रि-चतुरस्तिसृ-चतसृ स्यादौ ।२।१।१॥

स्त्रियाम् इति वर्त्तते । स्यादौ परे स्त्रीवृत्त्योस्त्रि-चतुरोर्यथासङ्ख्यं तिसृ +चतसृ इत्येतौ स्याताम् । तिस्रः । चतस्रः । तिसृषु । चतसृषु । प्रियतिसा प्रियचतसा ना । प्रियतिसृ कुलम् । स्यादौ इति किम् ? प्रियत्रिकः । प्रियचतुष्कः ॥१॥

ऋतो रः स्वरेऽनि ।२।१।२॥

तिसृ-चतसृस्थस्य ऋतः स्वरादौ स्यादौ परे रः स्यात्, अनि नविषयादन्यत्र । तिस्रः । चतस्रः । प्रियतिस्रौ । प्रियचतस्रौ । स्वरे इति किम् ? तिसृभिः । चतसृभिः । अनि इति किम् ? तिसृणाम् । चतसृणाम् ॥२॥

जराया जरस् वा ।२।१।३॥

स्वरादौ स्यादौ परे जराया जरस् वा स्यात् । जरसौ । जरसः । जरे । जराः । अतिजरसौ । अतिजरौ । अतिजरसम् अतिजरं कुलम् ॥३॥

अपोऽद् भे ।२।१।४॥

भादौ स्यादौ परे अपो अद् स्यात् । अद्भिः । स्वद्भ्याम् । भे इति किम् ? अप्सु ॥४॥

आ रायो व्यञ्जने ।२।१।५॥

व्यञ्जनादौ स्यादौ परे रैशब्दस्य आः स्यात् । राः । रासु । अतिराभ्यां कुलाभ्याम् । व्यञ्जने इति किम् ? रायः ॥५॥

युष्मदस्मदोः ।२।१।६॥

व्यञ्जनादौ स्यादौ परे युष्मदस्मदोराः स्यात् । त्वाम् । माम् । अतित्वाम् । अतिमाम् । युष्मासु । अस्मासु ॥६॥

टा-ङ्योसि यः ।२।१।७॥

टा-ङ्योस्सु परेषु युष्मदस्मदोर्यः स्यात् । त्वया । मया । अतियुवया । अत्यावया । त्वयि । मयि । युवयोः । आवयोः । टा-ङ्योसि इति किम् ? त्वत् । मत् ॥७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शेषे लुक् ।२।१।८॥

यस्मिन्ना-यौ कृतौ ततोऽन्यः शेषः, तस्मिन् स्यादौ परे युष्मदस्मदोर्लुक् स्यात् । युष्मभ्यम् । अस्मभ्यम् । अतित्वत् । अतिमत् । शेषे इति किम् ? त्वयि । मयि । युवयोः । आवयोः ॥८॥

मोर्वा ।२।१।९॥

शेषे स्यादौ परे मान्तयोर्युष्मदस्मदोर्लुग् वा स्यात् । युवां युष्मान् वा आवाम् अस्मान् वा आचक्षाणेभ्यः युष्मभ्यम्, युषभ्यम्, अस्मभ्यम्, असभ्यम् ॥९॥

मन्तस्य युवा-ऽऽवौ द्वयोः ।२।१।१०॥

द्व्यर्थवृत्त्योर्युष्मदस्मदोर्मान्तावयवस्य स्यादौ परे यथासङ्ख्यं 'युव आव' इत्येतौ स्याताम् । युवाम् । आवाम् । अतियुवाम् । अत्यावाम् । अतियुवासु । अत्यावासु । मन्तस्य इति किम् ? युवयोः आवयोः इत्यत्र दस्य यत्वं यथा स्यात् । स्यादौ इत्येव, युवयोः पुत्रः युष्मत्पुत्रः ॥१०॥

त्व-मौ प्रत्ययोत्तरपदे चैकस्मिन् ।२।१।११॥

स्यादौ प्रत्ययोत्तरपदयोश्च परयोरेकार्थवृत्त्योर्युष्मदस्मदोर्मान्तावयवस्य यथासङ्ख्यं 'त्व म' इत्येतौ स्याताम् । त्वाम् । माम् । अतित्वाम् । अतिमाम् । अतित्वासु । अतिमासु । त्वदीयम् । मदीयम् । त्वत्पुत्रः । मत्पुत्रः । प्रत्ययोत्तर++पदे च इति किम् ? अधियुष्मद् । अध्यस्मद् । एकस्मिन् इति किम् ? युष्माकम् । अस्माकम् ॥११॥

त्वमहं सिना प्राक्चाऽकः ।२।१।१२॥

सिना सह युष्मदस्मदोर्यथासङ्ख्यं त्वमहमौ स्याताम्, तौ चाक्प्रसङ्गेऽकः प्रागेव । त्वम् । अहम् । अतित्वम् । अत्यहम् । प्राक्चाऽक इति किम् ? त्वकम् । अहकम् ॥१२॥

यूयं वयं जसा ।२।१।१३॥

जसा सह युष्मदस्मदोर्यथासङ्ख्यं यूयम्-वयमौ स्याताम् । यूयम् । वयम् । प्रिययूयम् । प्रियवयम् । प्राक्चाऽक इत्येव, यूयकम् । वयकम् ॥१३॥

तुभ्यं मह्यं ङया ।२।१।१४॥

ङया सह युष्मदस्मदोर्यथासङ्ख्यं तुभ्यम्-मह्यमौ स्याताम् । तुभ्यम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मह्यम् । प्रियतुभ्यम् । प्रियमह्यम् । प्राक्चाऽक इत्यव, तुभ्यकम् । मह्यकम् ॥१४॥

तव मम ङसा ।२।१।१५॥

ङसा सह युष्मदस्मदोर्यथासङ्ख्यं तव-ममौ स्याताम् । तव । मम । अतितव । अतिमम । प्राक्चाऽक इत्येव, तवक । ममक ॥१५॥

अमौ मः ।२।१।१६॥

युष्मदस्मद्भ्यां परयोः अम्-औ इत्येतयोर्म् स्यात् । त्वाम् । माम् । अतित्वाम् । अतिमाम् । युवाम् । आवाम् । अतियुवाम् । अत्यावाम् ॥१६॥

शसो नः ।२।१।१७॥

युष्मदस्मद्भ्यां परस्य शसो न् स्यात् । युष्मान् । अस्मान् । प्रियत्वान् । प्रियमान् ॥१७॥

अभ्यम् भ्यसः ।२।१।१८॥

युष्मदस्मद्भ्यां परस्य चतुर्थीभ्यसोऽभ्यम् स्यात् । युष्मभ्यम् । अस्मभ्यम् । अतियुवभ्यम् । अत्यावभ्यम् ॥१८॥

ङसेश्चाऽद् ।२।१।१९॥

युष्मदस्मद्भ्यां परस्य ङसेः पञ्चमीभ्यसश्च अद् स्यात् । त्वद् । मद् । अतियुवद् । अत्यावद् । युष्मद् । अस्मद् । अतित्वद् । अतिमद् ॥१९॥

आम आकम् ।२।१।२०॥

युष्मदस्मद्भ्यां परस्य आम आकं स्यात् । युष्माकम् । अस्माकम् । अतियुवाकम् । अत्यावाकम् । युष्मान् अस्मान् वाऽऽचक्षाणानां युष्माकम्, अस्माकम् ॥२०॥

पदाद्युग्विभक्त्यैकवाक्ये वस्नसौ बहुत्वे ।२।१।२१॥

बहुत्वविषयया समविभक्त्या सह पदात् परयोर्युष्मदस्मदोर्यथासङ्ख्यं वस्नसौ वा स्याताम्, तच्चेत्पदं युष्मदस्मदी चैकस्मिन् वाक्ये स्तः, अन्वादेशे नित्यं विधानादिह विकल्पः । धर्मो वो रक्षतु । धर्मो नो रक्षतु । धर्मो युष्मान् रक्षतु । धर्मोऽस्मान् रक्षतु । एवं चतुर्थी-षष्ठीभ्यामपि । पदाद् इति किम् ? युष्मान् पातु । युग्विभक्त्या इति किम् ? तीर्थे यूयं यात । एकवाक्येत्येव, अतियुष्मान् पश्य, ओदनं पचत, युष्माकं भविष्यति ॥२१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्वित्वे वाम्नौ ।२।१।२२॥

पदात् परयोर्युष्मदस्मदोर्द्वित्वविषयया युग्विभक्त्या सह यथासङ्ख्यं 'वाम् नौ' इत्येतौ वा स्याताम्, एकवाक्ये । धर्मो वां पातु । धर्मो युवां पातु । धर्मो नौ पातु । धर्म आवां पातु । एवं चतुर्थी-षष्ठीभ्यामपि ॥२२॥

ङे-ङसा ते-मे ।२।१।२३॥

ङे-ङस्भ्यां सह पदात् परयोर्युष्मदस्मदोर्यथासङ्ख्यं ते मे इत्येतौ वा स्याताम्, एकवाक्ये । धर्मस्ते दीयते । धर्मस्तुभ्यं दीयते । धर्मो मे दीयते । धर्मो मह्यं दीयते । धर्मस्ते स्वम् । धर्मस्तव स्वम् । धर्मो मे स्वम् । धर्मो मम स्वम् ॥२३॥

अमा त्वा मा ।२।१।२४॥

अमा सह पदात् परयोर्युष्मदस्मदोर्यथासङ्ख्यं 'त्वा मा' इत्येतौ वा स्याताम्, एकवाक्ये । धर्मस्त्वा पातु । धर्मस्त्वां पातु । धर्मो मा पातु । धर्मो मां पातु ॥२४॥

असदिवाऽऽमन्त्र्यं पूर्वम् ।२।१।२५॥

आमन्त्र्यार्थं पदं युष्मदस्मद्भ्यां पूर्वमसदिव स्यात् । जना ! युष्मान् पातु धर्मः । साधू ! युवां पातु धर्मः । साधो ! त्वां पातु तपः । पूर्वम् इति किम् ?

मयैतत् सर्व्वमाख्यातं युष्माकं मुनिपुङ्गवाः ॥२५॥

जस्विशेष्यं वाऽऽमन्त्र्ये ।२।१।२६॥

युष्मदस्मद्भ्यां पूर्वं जसन्तमामन्त्र्यार्थं विशेष्यवाचि आमन्त्र्ये पदेऽर्थात् तद्विशेषणे परेऽसदिव वा स्यात् । जिनाः शरण्याः ! युष्मान् शरणं प्रपद्ये । जिनाः शरण्याः ! वः शरणं प्रपद्ये । जिनाः शरण्याः ! अस्मान् रक्षत । जिनाः शरण्याः ! नो रक्षत । जस् इति किम् ? साधो ! सुविहित ! वोऽथो शरणं प्रपद्ये । साधो ! सुविहित ! नोऽथो रक्ष । विशेष्यम् इति किम् ? शरण्याः साधवो ! युष्मान् शरणं प्रपद्ये । आमन्त्र्य इति किम् ? आचार्याः ! युष्मान् शरण्याः ! शरणं प्रपद्ये । अर्थाद् विशेषणभूत इति किम् ? आचार्याः ! उपाध्यायाः ! युष्मान् शरणं प्रपद्ये ॥२६॥

नाऽन्यत् ।२।१।२७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

युष्मदस्मद्भ्यां पूर्वं जसन्तादन्यदामन्त्र्यं विशेष्यमामन्त्र्ये तद्विशेषणे परेऽसदिव न स्यात् । साधो ! सुविहित त्वा शरणं प्रपद्ये । साधो ! सुविहित ! मा रक्ष ॥२७॥

पादाद्योः ।२।१।२८॥

नियतपरिमाणमात्रा-ऽक्षरपिण्डः पादः, पदात् परयोः पादस्यादौ युष्मदस्मदोर्वस्नसादि न स्यात् ।

वीरो विश्वेश्वरो देवो युष्माकं कुलदेवता ।
स एव नाथो भगवानस्माकं पापनाशनः ॥१॥

पादाद्योः इति किम् ?

पान्तु वो देशनाकाले जैनेन्द्रा दशनांशवः ॥२८॥

चाऽहहवैवयोगे ।२।१।२९॥

एभिर्योगे पदात् परयोर्युष्मदस्मदोर्वस्नसादि न स्यात् । ज्ञानं युष्मांश्च रक्षतु, अस्मांश्च रक्षतु । एवं अह-ह-वा-एवैरप्युदाहार्यम् । योग इति किम् ? ज्ञानं च शीलं च ते स्वम् ॥२९॥

नित्यमन्वादेशे ।२।१।३१॥

किञ्चिद्विधातुं कथितस्य पुनरन्यद्विधातुं कथनमन्वादेशः, तस्मिन् विषये पदात् परयोर्युष्मदस्मदोर्वस्नसादि नित्यं स्यात् । यूयं विनीतास्तद्वो गुरवो मानयन्ति । वयं विनीतास्तन्नो गुरवो मानयन्ति । धनवांस्त्वमथो त्वा लोको मानयति । धनवानहमथो मा लोको मानयति ॥३०॥

त्यदामेनदेतदो द्वितीया-टौस्यवृत्त्यन्ते ।२।१।३३॥

त्यदादीनामेतदो द्वितीयायां टायामोसि च परेऽन्वादेशे एनद् स्यात्, न तु वृत्त्यन्ते । उद्दिष्टमेतदध्ययनमथो एनदनुजानीत । एतकं साधुमावश्यकमध्यापय, अथो एनमेव सूत्राणि, अत्र साकः । एतेन रात्रिरधीता, अथो एनेनाहरप्यधीतम् । एतयोः शोभनं शीलम्, अथो एनयोर्महती कीर्तिः । त्यदाम् इति किम् ? संज्ञायाम् एतदं संगृहाण, अथो एतदमध्यापय । अवृत्त्यन्ते इति किम् ? अथो परमैतं पश्य ॥३१॥

इदमः ।२।१।३४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्यदादेरिदमो द्वितीया-टौसि परेऽन्वादेशे एनत् स्यात्, अवृत्त्यन्ते । उद्दिष्टमिदमध्ययनम्, अथो एनदनुजानीत । अनेन रात्रिरधीता, अथो एनेनाहरप्य-धीतम् । अनयोः शोभनं शीलम्, अथो एनयोर्महती कीर्तिः ॥३२॥

अद्व्यञ्जने ।२।१।३५॥

त्यदादेरिदमो व्यञ्जनादौ स्यादौ परेऽन्वादेशे अः स्यात्, अवृत्त्यन्ते । इमकाभ्यां शैक्षकाभ्यां रात्रिरधीता, अथो आभ्यामहरप्यधीतम् । इमकेषु अथो एषु । *अनक्* [२।१।३६] इति वक्ष्यमाणादिह साको विधिः ॥३३॥

अनक् ।२।१।३६॥

त्यदादेर्व्यञ्जनादौ स्यादौ परेऽम्यर्ज इदम् अः स्यात् । आभ्याम् । आभिः । एषु । आसु । अनग् इति किम् ? इमकाभ्याम् । त्यदाम् इत्येव, अतीदंभ्याम् ॥३४॥

टौस्यनः ।२।१।३७॥

त्यदां टायामोसि च परेऽनक इदमोऽनः स्यात् । अनेन । अनया । अनयोः । त्यदाम् इत्येव ? प्रियेदमा । अनक इत्येव, इमकेन ॥३५॥

अयमियम् पुं-स्त्रियोः सौ ।२।१।३८॥

त्यदां सौ परे इदमः पुंस्त्रियोर्यथासङ्ख्यमयमियमौ स्याताम् । अयं ना । इयं स्त्री । त्यदाम् इत्येव, अतीदं ना स्त्री वा ॥३६॥

दो मः स्यादौ ।२।१।३९॥

त्यदां स्यादौ परे इदमो दो मः स्यात् । इमौ । परमेमौ । इमकाभ्याम् । त्यदाम् इत्येव, प्रियेदमौ ॥३७॥

किमः कस्तसादौ च ।२।१।४०॥

त्यदां स्यादौ तसादौ च प्रत्यये परे किमः कः स्यात् । कः । साकोऽपि कः । कदा । कर्हि । तसादौ च इति किम् ? किं पश्य । किन्तराम् । त्यदाम् इत्येव, प्रियकिमौ ॥३८॥

आ द्वेरः ।२।१।४१॥

द्विशब्दमभिव्याप्य त्यदां स्यादौ तसादौ च परे अः स्यात् । स्यः । त्यौ । द्वौ । ततः । त्यदाम् इत्येव, अतितदौ ॥३९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तः सौ सः ।२।१।४२॥

आ द्वेस्त्यदां सौ परे तः स् स्यात् । स्यः । स्या । सः । सा । त्यदाम् इत्येव, प्रियत्यत् ॥४०॥

अदसो दः सेस्तु डौ ।२।१।४३॥

त्यदां सौ परे अदसो दः स् स्यात्, सेस्तु डौ । असौ । असकौ । हे असौ ! । हे असकौ ! । त्यदाम् इत्येव, अत्यदाः ॥४१॥

मोऽवर्णस्य ।२।१।४५॥

अवर्णान्तस्य त्यदामदसो दो म् स्यात् । अमू नरौ स्त्रियौ कुले वा । अमूदृशः । अवर्णस्य इति किम् ? अदः कुलम् ॥४२॥

वाऽद्रौ ।२।१।४६॥

अदसोऽद्रावन्ते सति दो म् वा स्यात् । अदमुयङ्, अमुद्रयङ्, अमुमुयङ्, अदद्रयङ् ॥४३॥

मादुवर्णोऽनु ।२।१।४७॥

अदसो मः परस्य वर्णस्य उवर्णः स्यात्, अनु पश्चात् कार्यान्तरेभ्यः । अमुम् । अमू । अमुमुयङ् । अनु इति किम् ? अमुष्मै । अमुष्मिन् ॥४४॥

प्रागिनात् ।२।१।४८॥

अदसो मः परस्य वर्णस्येनादेशात् प्राक् उवर्णः स्यात् । अमुना । इनाद् इति किम् ? अमुया ॥४५॥

बहुष्वेरी ।२।१।४९॥

बह्वर्थवृत्तेरदसो मः परस्य एत ई स्यात् । अमी । अमीषु । एः इति किम् ? अमूः स्त्रियः । माद् इत्येव, अमुके ॥४६॥

धातोरिवर्णोवर्णस्येयुव् स्वरे प्रत्यये ।२।१।५०॥

धातोरिवर्णोवर्णयोः स्वरादौ प्रत्यये परे यथासङ्ख्यमियुवौ स्याताम् । नियौ । लुवौ । अधीयते । लुलुवुः । प्रत्यय इति किम् ? न्यर्थः । ल्वर्थः । 'नयनम्, नायकः' इत्यादौ तु परत्वाद् गुण-वृद्धी ॥४७॥

इणः ।२।१।५१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इणो धातोः स्वरादौ प्रत्यये परे इय् स्यात् । योऽपवादः । ईयतुः, ईयुः ॥४८॥

संयोगात् ।२।१।५२॥

धातोरिवर्णोवर्णयोः संयोगात् परयोः स्वरादौ प्रत्यये परे इयुवौ स्याताम् । यवक्रियौ । कटप्रुवौ । शिश्रियुः ॥४९॥

भ्रू-श्नोः ।२।१।५३॥

भ्रू-श्नोरुवर्णस्य संयोगात् परस्य स्वरादौ प्रत्यये परे उव् स्यात् । भ्रुवौ । आप्नुवन्ति । संयोगात् इत्येव, चिन्वन्ति ॥५०॥

स्त्रियाः ।२।१।५४॥

स्त्रिया इवर्णस्य स्वरादौ प्रत्यये परे इय् स्यात् । स्त्रियौ । अतिस्त्रियौ ॥५१॥

वाऽम्शसि ।२।१।५५॥

स्त्रिया इवर्णस्याऽम्-शसोः परयोरिय् वा स्यात् । स्त्रियम्, स्त्रीम् । स्त्रियः, स्त्रीः ॥५२॥

योऽनेकस्वरस्य ।२।१।५६॥

अनेकस्वरस्य धातोरिवर्णस्य स्वरादौ प्रत्यये परे यः स्यात् । चिच्युः । निन्युः । पतिमिच्छति पत्यि ॥५३॥

स्यादौ वः ।२।१।५७॥

अनेकस्वरस्य धातोरुवर्णस्य स्वरादौ स्यादौ परे वः स्यात् । वसुमिच्छन्तौ वस्वौ । स्यादौ इति किम् ? लुलुवुः ॥५४॥

किब्वृत्तेरसुधियस्तौ ।२।१।५८॥

किबन्तेनैव या वृत्तिः समासः, तस्याः सुधीशब्दादन्यस्याः सम्बन्धिनो धातोरिवर्णोवर्णस्य स्वरादौ स्यादौ परे तौ 'य व' इत्येतौ स्याताम् । उन्यौ । ग्रामण्यौ । सुल्वः । खलप्वः । किबिति किम् ? परमौ नियौ परमनियौ । वृत्तेरिति किम् ? नियौ कुलस्य । असुधिय इति किम् ? सुधियः ॥५५॥

दृन्पुनर्वर्षाकारैर्भुवः ।२।१।५९॥

दृनादिभिः सह या किब्वृत्तिः, तत्सम्बन्धिन एव भुवो धातोरुवर्णस्य स्वरादौ स्यादौ परे वः स्यात् । दृन्भ्वौ । पुनर्भ्वौ । वर्षाभ्वः । कारभ्वः । दृनादिभिरिति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किम् ? प्रतिभुवे ॥५६॥

णषमसत् परे स्यादिविधौ च ।२।१।६०॥

इतः सूत्रादारभ्य यत् परं कार्यं विधास्यते तस्मिन् स्याद्यधिकारविहिते च पूर्वस्मिन्नपि कर्त्तव्ये णत्वं षत्वं चाऽसद् असिद्धं स्यात्, एतत्सूत्रनिर्दिष्टयोश्च ण-षयोः परे षे णोऽसन् । पूष्णः । तक्ष्णः । पिपठीः । अर्वाणौ । असत्परे इत्यधिकारो *रात्सः [२।१।९०]* इति यावत् । स्यादिविधौ च इति तु *मावर्णान्तेभ्यः* [२।१।९८] प्राक् ॥५७॥

ष-ढोः कस्सि ।२।१।६२॥

से परे ष-ढोः कः स्यात् । पेक्ष्यति, लेक्ष्यति ॥५८॥

भ्वादेर्नामिनो दीर्घोर्वोर्व्यञ्जने ।२।१।६३॥

भ्वादेर्धातोर्यौ र-वौ तयोः परयोस्तस्यैव नामिनो दीर्घः स्याद् व्यञ्जने । हूर्च्छा । आस्तीर्णम् । दीव्यति । भ्वादेरिति किम् ? कुर्कुरीयति । दिव्यति ॥५९॥

पदान्ते ।२।१।६४॥

पदान्तस्थयोर्भ्वादेर्वोः परयोर्भ्वादेर्नामिनो दीर्घः स्यात् । गीः । गीरर्थः । पदान्त इति किम् ? गिरः । लुवः ॥६०॥

न यि तद्धिते ।२।१।६५॥

यादौ तद्धिते परे यौ र-वौ तयोः परयोर्नामिनो दीर्घो न स्यात् । धुर्यः । यि इति किम् ? गीर्वत् । तद्धित इति किम् ? गीर्यति । गीर्यते ॥६१॥

कुरु-च्छुरः ।२।१।६६॥

कुरु-च्छुरोर्नामिनो रे परे दीर्घो न स्यात् । कुर्यात् । छुर्यात् । कुरु इत्युकारः किम् ? *कुरत् शब्दे* [हैमधा० १३९१] कूर्यात् ॥६२॥

मो नो म्वोश्च ।२।१।६७॥

मन्तस्य धातोरन्तस्य पदान्तस्य म्वोश्च परयोर्नः स्यात् । प्रशान् । प्रशान्भ्याम् । जङ्गन्मि । जङ्गन्वः ॥६३॥

स्रंस्-ध्वंस्-क्वंस्सनडुहो दः ।२।१।६८॥

स्रंस्-ध्वंसोः कंसुप्रत्ययान्तस्य च सन्तस्य अनडुहश्च पदान्तस्य दः स्यात् । उखास्रद्, पर्णध्वद्, विद्धत् कुलम् । स्वनडुद् । क्वंस्स इति द्विसकारपाठादिह

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मा भूत्, विद्वान् ॥६४॥

ऋत्विज्-दिश्-दृश्-स्पृश्-स्रज्-दधृषुष्णिहो गः ।२।१।६९॥

एषां पदान्तस्थानां ग् स्यात् । ऋत्विग् । दिग् । दृग् । अन्यादृग् । घृतस्पृग् । स्रग् । दधृग् । उष्णिग् ॥६५॥

नशो वा ।२।१।७०॥

नशः पदान्ते ग् वा स्यात् । जीवनग्, जीवनड् ॥६६॥

युजञ्च-क्रुञ्चो नो ङः ।२।१।७१॥

एषां नस्य पदान्ते ङ् स्यात् । युङ् । प्राङ् । क्रुङ् ॥६७॥

सो रुः ।२।१।७२॥

पदान्ते सो रुः स्यात् । आशीः । वायुः ॥६८॥

सजुषः ।२।१।७३॥

पदान्ते सजुषो रुः स्यात् । सजूः । सजूर्वत् ॥६९॥

अहनः ।२।१।७४॥

अहनः पदान्ते रुः स्यात् । हे दीर्घाहो निदाघ ! । दीर्घाहा निदाघः ॥७०॥

रो लुप्यरि ।२।१।७५॥

अरेफे परे पदान्ते अहो लुपि सत्याम् र स्यात् । अहरधीते । अहर्दत्ते । लुपि इति किम् ? हे दीर्घाहो ! ऽत्र । अरि इति किम् ? अहोरूपम् ॥७१॥

धुटस्तृतीयः ।२।१।७६॥

पदान्ते धुटां तृतीयः स्यात् । वाग् । अज्भिः ॥७२॥

ग-ड-द-बादेश्चतुर्थान्तस्यैकस्वरस्यादेश्चतुर्थः स्ध्वोश्च प्रत्यये ।२।१।७७॥

ग-ड-द-बादेश्चतुर्थान्तस्यैकस्वरस्य धातुरूपशब्दावयवस्यादेश्चतुर्थः स्यात्, पदान्ते सादौ ध्वादौ च प्रत्यये । पर्णधुट् । तुण्डिभमाचक्षाणः तुण्ढिप् । एवं गर्द्धप् । धर्मभुत् । निघोक्ष्यते । न्यघूढ्वम् । धोक्ष्यते । अधुग्ध्वम् । भोत्स्यते, अभुद्ध्वम् । ग-ड-द-बादेरिति किम् ? अजञ्जप् । एकस्वरस्य इति किम् ? दामलिट् ॥७३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

धागस्त-थोश्च ।२।१।७८॥

धागश्चतुर्थान्तस्य दादेरादेर्दस्य त-थोः स्-ध्वोश्च प्रत्यययोः परयोश्चतुर्थः स्यात् । धत्तः । धत्थः । धत्से । धद्ध्वे । त-थोश्च इति किम् ? दध्वः । चतुर्थान्तस्य इत्येव, दधाति ॥७४॥

अधश्चतुर्थात् त-थोर्धः ।२।१।७९॥

चतुर्थात् परयोर्धारूपवर्जाद्धातोर्विहितयोस्त-थोर्धः स्यात् । अदुग्ध । अदुग्धाः । अलब्ध । अलब्धाः । अध इति किम् ? धत्तः । धत्थः । विहितविशेषणं किम् ? ज्ञानभुक्त्वम् ॥७५॥

र्नाम्यन्तात् परोक्षा-ऽद्यतन्याशिषो धो ढः ।२।१।८०॥

रान्तान्नाम्यन्ताच्च धातोः परासां परोक्षा-ऽद्यतन्याशिषां धो ढः स्यात् । अतीर्ढ्वम् । तीर्षीढ्वम् । तुष्टुढ्वे । अदिढ्वम् । चेषीढ्वम् । र्नाम्यन्तात् इति किम् ? अपग्ध्वम् । आसिध्वम् ॥७६॥

हा-न्तस्थाञ्जीङ्भ्यां वा ।२।१।८१॥

हादन्तस्थायाश्च पराञ्जेरिटश्च परासां परोक्षाद्यतन्याशिषां धो ढ् वा स्यात् । अग्राहिढ्वम्, अग्राहिध्वम् । ग्राहिषीढ्वम्, ग्राहिषीध्वम् । अनायिढ्वम्, अनायिध्वम् । नायिषीढ्वम्, नायिषीध्वम् । अकारिढ्वम्, अकारिध्वम् । अलाविढ्वम्, अलाविध्वम् । जगृहिढ्वे, जगृहिध्वे । आयिढ्वम्, आयिध्वम् । हा-ऽन्तस्याद् इति किम् ? धानिषीध्वम् । आसिषीध्वम् ॥७७॥

हो धुट्-पदान्ते ।२।१।८२॥

धुटि प्रत्यये पदान्ते च हो ढ् स्यात् । लेढा । मधुलिट् । गुडलिण्मान् । धुट्-पदान्ते इति किम् ? मधुलिहौ ॥७८॥

भ्वादेर्दर्धः ।२।१।८३॥

भ्वादेर्धातोर्यो दादिरवयवः, तस्य हो धुटि प्रत्यये पदान्ते च घ् स्यात् । दोग्धा । धोक्ष्यति । अधोक् । गोधुक् । भ्वादेरिति किम् ? दामलिहमिच्छति दामलिट् ॥७९॥

मुह-द्रुह-ष्णुह-ष्णिहो वा ।२।१।८४॥

एषां हो धुटि प्रत्यये पदान्ते च घ् वा स्यात् । मोग्धा, मोढा । उन्मुक्,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उन्मुट् । द्रोग्धा, द्रोढा । मित्रध्रुक्, मित्रध्रुट् । स्नोग्धा, स्नोढा । उत्स्नुक्, उत्स्नुट् । स्नेग्धा, स्नेढा । चेलस्निक्, चेलस्निट् ॥८०॥

नहाहोर्ध-तौ ।२।१।८५॥

नहेर्ब्रूस्थानाऽऽहश्च धातोर्हो धुटि प्रत्यये पदान्ते च यथासङ्ख्यं ध-तौ स्याताम् । नद्धा । उपानद्भ्याम् । आत्थ ॥८१॥

च-जः क-गम् ।२।१।८६॥

धुटि प्रत्यये पदान्ते च च-जोः क-गौ स्याताम् । वक्ता, वाक्, त्यक्ता, अर्द्धभाक् ॥८२॥

यज-सृज-मृज-राज-भ्राज-भ्रस्ज-ब्रश्च-परिव्राजः शः षः ।२।१।८७॥

यजादीनां धातूनां च-जोः शस्य च धुटि प्रत्यये पदान्ते च ष् स्यात् । यष्टा, देवेट् ; स्रष्टा, तीर्थसृट् ; मार्ष्टा, कंसपरिमृट् ; राष्टिः, सम्राट् ; भ्राष्टिः, विभ्राट् ; भ्रष्टा, धानाभृट् ; ब्रष्टा, मूलवृट् ; परिव्राट् ; लेष्टा, प्रष्टा, शब्दप्राट् । यजादिसाहचर्याच्छोऽपि धातोरेव स्यात्, इह मा भूत्, निज्म्याम् । *मास-निशा-ऽऽसनस्य शसा-ऽऽदौ लुग्वा [२।१।१००]* इति अन्तस्य लुक् । चज इत्येव, वृक्षवृश्चमाचष्टे वृक्षव् ॥८३॥

संयोगस्यादौ स्कोर्लुक् ।२।१।८८॥

धुट्-पदान्ते संयोगादिस्थयोः स्कोर्लुक् स्यात् । लग्नः, साधुलक्, वृक्णः, मूलवृट्, तष्टः, काष्ठतट् ॥८४॥

पदस्य ।२।१।८९॥

पदस्य संयोगान्तस्य लुक् स्यात् । पुमान्, पुंभिः, महान् । पदस्येति किम् ? स्कन्त्वा ॥८५॥

रात् सः ।२।१।९०॥

पदस्य संयोगान्तस्य यो रस्ततः परस्य सस्यैव लुक् स्यात् । चिकीः, कटचिकीः । स एवेति किम् ? ऊर्क्, न्यमार्ट् ॥८६॥

नाम्नो नोऽनह्नः ।२।१।९१॥

पदस्यान्ते नाम्नो नस्य लुक् स्यात्, स चेदह्नो न स्यात् । राजा, राजपुरुषः । अनह्न इति किम् ? अहेरेति ॥८७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नाऽऽमन्त्र्ये ।२।१।९२॥

आमन्त्र्यार्थस्य नाम्नो नस्य लुक् न स्यात् । हे राजन् ! ॥८८॥

क्लीबे वा ।२।१।९३॥

आमन्त्र्यार्थस्य नाम्नः क्लीबे नस्य लुग् वा स्यात् । हे दाम !, हे दामन् ! ॥८९॥

मावर्णान्तोपान्तापञ्चमवर्गान् मन्तोर्मो वः ।२।१।९४॥

मावर्णौ प्रत्येकमन्तोपान्तौ यस्य तस्मात् पञ्चमवर्जवर्गान्ताच्च नाम्नः परस्य मन्तोर्मो व् स्यात् । किंवान्, शमीवान्, वृक्षवान्, मालावान्, अहर्वान्, भास्वान्, मरुत्वान् ॥९०॥

य-स्वरे पादः पदणि-क्य-घुटि ।२।१।१०२॥

णि-क्य-घुट्वर्जे यादौ स्वरादौ च प्रत्यये पादन्तस्य पद् स्यात् । वैयाघ्रपद्यः । द्विपदः पश्य । पादयतेः क्विपि पाद्, पदी कुले । य-स्वरे इति किम् ? द्विपाद्भ्याम् । अणि-क्य-घुटीति किम् ? पादयति । व्याघ्रपाद्यति । द्विपादौ ॥९१॥

उदच उदीच् ।२।१।१०३॥

अणिक्यघुटि यस्वरे उदच उदीच् स्यात् । उदीच्यः, उदीची । अणिक्यघुटीत्येव, उदयति, उदच्यति, उदञ्चः । उदच इति किम् ? नि मा भूत्, उदञ्चा, उदञ्चे ॥९२॥

अच् प्राग् दीर्घश्च ।२।१।१०४॥

अणिक्यघुटि यस्वरादौ प्रत्ययेऽच् च् स्यात्, प्राक् स्वरश्च दीर्घः । प्राच्यः, दधीचा । अणिक्यघुटीत्येव, दध्ययति, दध्यच्यति, दध्यञ्चः । अचिति किम् ? नि मा भूत्, साध्वञ्चा ॥९३॥

कंसुष् मन्तौ च ।२।१।१०५॥

अणिक्यघुटि य-स्वरे मन्तौ च प्रत्यये कंसु उष् स्यात् । विदुष्यः, विदुषा, विदुष्मान् । अणिक्यघुटीत्येव, विद्वयति, विद्वस्यति, विद्वांसः ॥९४॥

श्वन्-युवन्-मघोनो ङी-स्याद्यघुट्स्वरे व उः ।२।१।१०६॥

ङ्यां स्याद्यघुट्स्वरे च श्वनादीनां व उः स्यात् । शुनी, शुनः । अतियूनी,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यूनः । मघोनी, मघोनः । ङीस्याद्यघुट्स्वर इति किम् ? शौवनम्, यौवनम्, माघवनम् ॥९५॥

लुगातोऽनापः ।२।१।१०७॥

आप्वर्जस्याऽऽतो ङीस्याद्यघुट्स्वरे लुक् स्यात् । कीलालपः । हाहे देहि । अनाप इति किम् ? शालाः ॥९६॥

अनोऽस्य ।२।१।१०८॥

ङीस्याद्यघुट्स्वरेऽनोऽस्य लुक् स्यात् । राज्ञी, राज्ञः ॥९७॥

ई-ङौ वा ।२।१।१०९॥

ईकारे ङौ च परेऽनोऽस्य लुग् वा स्यात् । साम्नी, सामनी । राज्ञि, राजनि ॥९८॥

न व-मन्तसंयोगात् ।२।१।१११॥

वान्तान्मान्ताच्च संयोगात् परस्याऽनोऽस्य लुग् न स्यात् । पर्वण्ना, चर्मण्णी ॥९९॥

हनो ह्नो घ्न् ।२।१।११२॥

हन्तेर्ह्नो घ्न् स्यात् । भ्रूणघ्नी, घ्नन्ति । ह्न इति किम् ? वृत्रहणौ ॥१००॥

लुगस्यादेत्यपदे ।२।१।११३॥

अपदादावकारे एकारे च परेऽस्य लुक् स्यात् । सः, पचन्ति, पचे । अपद इति किम् ? दण्डाग्रम् ॥१०१॥

डित्यन्त्यस्वरादेः ।२।१।११४॥

स्वराणां योऽन्त्यस्वरस्तदादेः शब्दस्य डिति परे लुक् स्यात् । मुनौ, साधौ, पितुः ॥१०२॥

अघुट्चुपान्त्यनोऽक्रुञ्चुचु(ञ्चञ्चु)दितः ।२।१।११५॥

क्रुञ्च्-[अञ्च्]-उदिद्वर्जस्य उपान्त्यनस्य लुक् स्यात्, न तु घुटि । महतः । श्रेयः । अक्रुञ्चु(ञ्च)ञ्चुदित इति किम् ? क्रुञ्चा । साध्वञ्चा । सुकन्भ्याम् ॥१०३॥

---

१. इदं सूत्रं श्रीसिद्धहेमचन्द्रशब्दानुशासनस्य सम्प्रति प्रचलिते सूत्रपाठे न विद्यते ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अवर्णादश्नो वाऽन्तुरी-ङ्योः ।२।१।११६॥

श्नावर्जादवर्णात् परस्यान्तुरुपान्त्यनो लुग् वा स्यात् ई-ङ्योः । तुदती तुदन्ती कुले स्त्री वा । एवं भाती भान्ती । अवर्णादिति किम् ? अदती । [अ]श्न इति किम् ? लुनती ॥१०४॥

न श्य-शवः ।२।१।११७॥

श्याच्छवश्च परस्यान्तुरी-ङ्योः परयोरुपान्त्यनो लुग् न स्यात् । दीव्यन्ती । पचन्ती ॥१०५॥

दिव औः सौ ।२।१।११८॥

दिवः सौ परे औः स्यात् । द्यौः ॥१०६॥

उः पदान्तेऽनूत् ।२।१।११९॥

पदान्तस्य दिव उः स्यात्, **अनूत्** स तु दीर्घो न स्यात् । द्युभ्याम्, सुद्यु । पदान्त इति किम् ? दिवि । अनूदिति किम् ? द्युभवति ॥१०७॥

द्वितीयस्य प्रथमपादः ॥२।१॥

---

१. श्री सिद्धहेमचन्द्रशब्दानुशासनस्य रहस्यवृत्तौ **'अतृ शतृ क्वसु'** इत्यादि प्रत्ययानां स्थाने **'अन्तृ शन्तृ क्वंसु'** इत्यादयः प्रत्ययाः स्वीकृताः । अतस्तदनुसारेण सूत्राणि । सम्प्रति तु सिद्धहेमचन्द्रशब्दानुशासनसूत्रपाठे लघुवृत्तौ बृहद्वृत्तौ मध्यमवृत्तौ च **'अतृ शतृ क्वसु'** इत्यादय एव प्रत्ययाः, अतस्तदनुसारीण्येव सूत्राणि । लघुवृत्तिसहितानि सूत्राणि ईदृशानि —

अवर्णादश्नोऽन्तो वाऽतुरीङ्योः ।२।१।११५॥

श्नावर्जादवर्णात् परस्याऽतुः स्थानेऽन्तो वा स्यात्, ई-ङ्योः । तुदन्ती, तुदती कुले स्त्री वा । एवं भान्ती, भाती । अवर्णादिति किम् ? अदती । अश्न इति किम् ? लुनती ॥१०७॥

श्य-शवः ।२।१।११६॥

श्याच्छवश्च परस्याऽतुरीङ्योः परयोरन्त इत्यादेशः स्यात् । दीव्यन्ती, पचन्ती ॥१०८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[द्वितीयाध्याये द्वितीयः पादः]

क्रियाहेतुः कारकम् ।२।२।१॥

क्रियाया हेतुर्निमित्तं कर्त्रादि कारकं स्यात् । अन्वर्थाश्रयणाच्च निमित्तत्वमात्रेण हेत्वादेः [कारकसंज्ञा] न स्यात् ॥१॥

स्वतन्त्रः कर्त्ता ।२।२।२॥

क्रियाहेतुः क्रियासिद्धौ स्वप्रधानो यः स कर्त्ता स्यात् । मैत्रेण कृतः ॥२॥

कर्तुर्व्याप्यं कर्म ।२।२।३॥

कर्त्रा क्रियया यद्विशेषेणाप्नुमिष्यते तत् कारकं व्याप्यं कर्म च स्यात् । तत् त्रेधा—निर्वर्त्त्यं विकार्यं प्राप्यञ्च । कटं करोति, काष्ठं दहति, ग्रामं याति ॥३॥

वाऽकर्मणामणिकर्त्ता णौ ।२।२।४॥

अविवक्षितकर्मणां धातूनां णिगः प्राग् यः कर्त्ता स णिगि सति कर्म वा स्यात् । पचति चैत्रः, पाचयति चैत्रं चैत्रेण वा मैत्रः ॥४॥ नित्याकर्मणां तु

गति-बोधा-ऽऽहारार्थ-शब्दकर्म-नित्याकर्मणामनीखाद्यदि-ह्वा-शब्दाय-क्रन्दाम् ।२।२।५॥

इति सूत्रेण नित्यमेव कर्म्म, शाययति मैत्रं चैत्रः ॥५॥

भक्षेर्हिंसायाम् ।२।२।६॥

भक्षेर्हिंसार्थस्यैवाणिकर्त्ता णौ कर्म स्यात् । भक्षयति सस्यं बलीवर्दान् मैत्रः । हिंसायामिति किम् ? भक्षयति पिण्डीं शिशुना । *गति-बोधा-ऽऽहारार्थ०* [२।२।५] इति कर्मत्वे सिद्धे नियमार्थो योगः ॥६॥

हृ-क्रोर्नवा ।२।२।८॥

हृ-क्रोरणिकर्त्ता णौ कर्म वा स्यात् । विहारयति देशं गुरुं गुरुणा वा, आहारयत्योदनं बालं बालेन वा, कारयति कटं चैत्रं चैत्रेण वा ॥७॥

दृश्यभिवदोरात्मने ।२।२।९॥

दृश्यभिवदोरात्मनेपदविषयेऽणिकर्त्ता णौ कर्म वा स्यात् । दर्शयते राजा भृत्यान् भृत्यैर्वा, अभिवादयते गुरुः शिष्यं शिष्येण वा । *अणिक्कर्म-णिक्कर्तृकाण्णिगो-*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ऽस्मृतौ [३।३।८८] इत्यात्मनेपदम् । आत्मन इति किम् ? दर्शयति रूपतर्कं रूपम् ॥८॥

नाथः ।२।२।१०॥

आत्मनेपदविषयस्य नाथो व्याप्यं कर्म वा स्यात् । सर्पिषो नाथते, सर्पिर्नाथते । आत्मन इत्येव, पुत्रमुपनाथति पाठाय ॥९॥

स्मृत्यर्थ-दयेशः ।२।२।११॥

स्मृत्यर्थानां दयेशोश्च व्याप्यं कर्म वा स्यात् । मातुः स्मरति, मातरं स्मरति ; मातुः स्मर्यते, माता स्मर्यते ; सर्पिषो दयते, सर्पिर्दयते ; लोकानामीष्टे, लोकानीष्टे ॥१०॥

कृगः प्रतियत्ने ।२।२।१२॥

पुनर्यत्नः प्रतियत्नः, तद्वृत्तेः कृगो व्याप्यं कर्म वा स्यात् । एधोदकस्यैधोदकं वोपस्कुरुते ॥११॥

रुजार्थस्याऽज्वरि-सन्तापेर्भावे कर्त्तरि ।२।२।१३॥

रुजा पीडा, तदर्थस्य ज्वरि-सन्तापिवर्जस्य धातोर्व्याप्यं कर्म वा स्यात्, भावश्चेद्रुजायाः कर्त्ता । चौरस्य चौरं वा रुजति रोगः । अज्वरि-सन्तापेरिति किम् ? आद्यूनं ज्वरयति सन्तापयति वा । भाव इति किम् ? मैत्रं रुजति श्लेष्मा ॥१२॥

साधकतमं करणम् ।२।२।२४॥

क्रियायां प्रकृष्टोपकारकं करणं स्यात् । दानेन भोगानाप्नोति ॥१३॥

कर्माभिप्रेयः संप्रदानम् ।२।२।२५॥

कर्मणा व्याप्येन क्रियया वा यमभिप्रेयते स सम्प्रदानं स्यात् । देवाय बलिं दत्ते, राज्ञे कार्यमाचष्टे ॥१४॥

अपायेऽवधिरपादानम् ।२।२।२९॥

अपाये विश्लेषे योऽवधिस्तद् अपादानं स्यात् । वृक्षात् पर्णं पतति, व्याघ्राद् बिभेति, अधर्माज्जुगुप्सते विरमति वा, धर्मात् प्रमाद्यति, चौरेभ्यस्त्रायते, अध्ययनात् पराजयते, यवेभ्यो गां रक्षति, उपाध्यायादन्तर्धत्ते, शृङ्गाच्छरो जायते, हिमवतो गङ्गा प्रभवति, **वलभ्याः शत्रुञ्जयः षड् योजनानि,** कार्त्तिक्या आग्रहायणी मासे,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चैत्रान्मैत्रः पटुः, माथुराः पाटलिपुत्रकेभ्य आढ्यतराः ॥१५॥

क्रियाश्रयस्याऽऽधारोऽधिकरणम् ।२।२।३०॥

क्रियाश्रयस्य कर्तुः कर्मणो वाऽऽधारोऽधिकरणं स्यात् । कटे आस्ते, स्थाल्यां तण्डुलान् पचति ॥१६॥

नाम्नः प्रथमैक-द्वि-बहौ ।२।२।३१॥

एक-द्वि-बहावर्थमात्रे वर्त्तमानान्नाम्नः परा यथासङ्ख्यं सि-औ-जस्लक्षणा प्रथमा स्यात् । डित्थः, गौः, शुक्लः, कारकः, दण्डी ॥१७॥

आमन्त्र्ये ।२।२।३२॥

आमन्त्र्यार्थवृत्तेर्नाम्नः प्रथमा स्यात् । हे देव ! । [आमन्त्र्य इति किम् ? राजा भव J सं.] ॥१८॥

गौणात् समया-निकषा-हा-धिगन्तरा-ऽन्तरेणा-ऽति-येन-तेनैर्द्वितीया ।२।२।३३॥

समयादिभिर्युक्ताद् गौणान्नाम्न एक-द्वि-बहौ यथासङ्ख्यममौ-शसिति द्वितीया स्यात् । समया ग्रामम् । निकषा गिरिं नदीं । हा ! मैत्रं व्याधिः । धिग् जाल्मम् । अन्तराऽन्तरेण वा निषधं नीलं च विदेहाः । अन्तरेण धर्मं सुखं न स्यात् । अतिवृद्धं कुरून् महद् बलम् । येन पश्चिमां गतः । तेन पश्चिमां नीतः ॥१९॥

कर्मणि ।२।२।४०॥

नाम्नः कर्मणि द्वितीया स्यात् । कटं करोति, रविं पश्यति, अजां नयति ग्रामम्, गां दोग्धि पयः ॥२०॥

क्रियाविशेषणात् ।२।२।४१॥

क्रियाया यद्विशेषणं तद्वाचिनो द्वितीया स्यात् । स्तोकं पचति । सुखं स्थाता ॥२१॥

काला-ऽध्वनोर्व्याप्तौ ।२।२।४२॥

व्याप्तिरत्यन्तसंयोगः, व्याप्तौ द्योत्यायां कालाध्ववाचिभ्यां द्वितीया स्यात् । मासं गुडधानाः कल्याणी अधीते वा । क्रोशं गिरिः कुटिला नदी अधीते वा । व्याप्ताविति किम् ? मासस्य मासे वा द्व्यहं गुडधानाः । क्रोशस्य क्रोशे वा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एकदेशे कुटिला नदी ॥२२॥

सिद्धौ तृतीया ।२।२।४३॥

सिद्धौ फलनिष्पत्तौ द्योत्यायां कालाध्ववाचिभ्यां टा-भ्याम्-भिस्लक्षणा तृतीया यथासंख्यमेक-द्वि-बहौ स्यात् । मासेन मासाभ्यां मासैर्वाऽऽवश्यकमधीतम् । सिद्धाविति किम् ? मासमधीत **आचारो** न तु गृहीतः ॥२३॥

हेतु-कर्तृ-करणेत्थम्भूतलक्षणे ।२।२।४४॥

फलसाधनयोग्यो हेतुः, कञ्चित् प्रकारमापन्नस्य चिह्नमित्थम्भूतलक्षणः । हेत्वादिवृत्तेर्नाम्नस्तृतीया स्यात् । धनेन कुलम्, चैत्रेण कृतम्, दात्रेण लुनाति, अपि त्वं कमण्डलुना छात्रमद्राक्षीः ? ॥२४॥

सहार्थे ।२।२।४५॥

सहार्थे तुल्ययोगे विद्यमानतायां च गम्यमाने नाम्नस्तृतीया स्यात् । पुत्रेण सहाऽऽगतः स्थूलो गोमान् ब्राह्मणो वा । *सहैव दशभिः पुत्रैर्भारं वहति गर्दभी* ॥२५॥

काले भान्नवाऽऽधारे ।२।२।४८॥

कालवृत्तेर्नक्षत्रार्थादाधारे तृतीया वा स्यात् । पुष्येण पुष्ये वा पायसमश्नीयात् । काले इति किम् ? पुष्येऽर्कः । भादिति किम् ? तिलपुष्पेषु यत् क्षीरम् । आधार इति किम् ? अद्य पुष्यं विद्धि ॥२६॥

व्याप्ये द्विद्रोणादिभ्यो वीप्सायाम् ।२।२।५०॥

व्याप्यवृत्तिभ्यो द्विद्रोणादिभ्यो वीप्सायां तृतीया वा स्यात् । द्विद्रोणेन द्विद्रोणं वा धान्यं क्रीणाति । पञ्चकेन पञ्चकं वा पशून् क्रीणाति ॥२७॥

समो ज्ञोऽस्मृतौ वा ।२।२।५१॥

अस्मृत्यर्थस्य संजानातेर्यद् व्याप्यं तद्वृत्तेस्तृतीया वा स्यात् । मात्रा मातरं वा संजानीते । अस्मृताविति किम् ? मातरं संजानाति ॥२८॥

दामः संप्रदानेऽधर्म्य आत्मने च ।२।२।५२॥

दामः संप्रदानेऽधर्म्ये वर्त्तमानात् तृतीया स्यात्, तत्सन्नियोगे च दाम आत्मनेपदम् । दास्या संप्रयच्छते कामुकः । अधर्म्य इति किम् ? पत्न्यै संप्रयच्छति ॥२९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चतुर्थी ।२।२।५३॥

संप्रदाने वर्त्तमानादेक-द्वि-बहौ यथासङ्ख्यं ङे-भ्याम्-भ्यस्लक्षणा चतुर्थी स्यात् । द्विजाय गां दत्ते, पत्ये शेते ॥३०॥

तादर्थ्ये ।२।२।५४॥

तस्मा इदं तदर्थम्, तद्भावे सम्बन्धविशेषे द्योत्ये चतुर्थी स्यात् । यूपाय दारु, रन्धनाय स्थाली ॥३१॥

रुचि-कृप्यर्थ-धारिभिः प्रेय-विकारोत्तमर्णेषु ।२।२।५५॥

रुच्यर्थैः कृप्यर्थैर्धारिणा च योगे यथासङ्ख्यं प्रेय-विकारोत्तमर्णवृत्तेश्चतुर्थी स्यात् । मैत्राय रोचते धर्मः, मूत्राय कल्पते यवागूः, चैत्राय शतं धारयति ॥३२॥

तुमोऽर्थे भाववचनात् ।२।२।६१॥

क्रियायां क्रियार्थायामुपपदे तुम् वक्ष्यते, तस्यार्थे ये भाववाचिनो घञादयस्तदन्तात् स्वार्थे चतुर्थी स्यात् । पाकाय इज्यायै वा व्रजति । तुमोऽर्थ इति किम् ? पाकस्य । भाववचनादिति किम् ? पक्ष्यतीति पाचकस्य व्रज्या ॥३३॥

गम्यस्याऽऽप्ये ।२।२।६२॥

यस्यार्थो गम्यते न चासौ प्रयुज्यते स गम्यः, गम्यस्य तुमो व्याप्ये वर्त्तमानाच्चतुर्थी स्यात् । एधेभ्यः फलेभ्यो वा व्रजति । गम्यस्येति किम् ? एधानाहर्तुं याति ॥३४॥

गतेर्नवाऽनाप्ते ।२।२।६३॥

गतिः पादविहरणम्, तस्या आप्येऽनाप्ते वर्तमानाच्चतुर्थी वा स्यात् । ग्रामं ग्रामाय वा याति । गतेरिति किम् ? स्त्रियं गच्छति, मनसा मेरुं गच्छति । अनाप्त इति किम् ? संप्राप्ते मा भूत्, पन्थानं याति ॥३५॥

मन्यस्याऽनावादिभ्योऽतिकुत्सने ।२।२।६४॥

अतीवकुत्स्यतेयेनतदतिकुत्सनम्, तस्मिन्मन्यतेर्व्याप्येवर्तमानान्नावादिवर्जाच्चतुर्थी वा स्यात् । न त्वा तृणाय तृणं वा मन्ये । मन्यस्येति किम् ? न त्वा तृणं मन्ये । अनावादिभ्य इति किम् ? न त्वा नावम् अन्नं शुकं काकं शृगालं वा मन्ये । कुत्सन इति किम् ? न त्वा तृणाय मन्ये, युष्मदो मा भूत् । अतीति

१. क्रियायां क्रियार्थायां तुम् णकच् भविष्यन्ती ५।३।१३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किम् ? त्वां तृणं मन्ये ॥३६॥

हित-सुखाभ्याम् ।२।२।६५॥

आभ्यां युक्ताच्चतुर्थी वा स्यात् । आमयाविने आमयाविनो वा हितम् । चैत्राय चैत्रस्य वा सुखम् ॥३७॥

शक्तार्थ-वषड्-नमः-स्वस्ति-स्वाहा-स्वधाभिः ।२।२।६८॥

शक्तार्थैर्वषडादिभिश्च युक्ताच्चतुर्थी नित्यं स्यात् । शक्तः प्रभुर्वा मल्लो मल्लाय । वषडग्नये । नमोऽर्हद्भ्यः । स्वस्ति प्रजाभ्यः । स्वाहेन्द्राय । स्वधा पितृभ्यः ॥३८॥

पञ्चम्यपादाने ।२।२।६९॥

अपादाने एक-द्वि-बहौ यथासंख्यं ङसि-भ्याम्-भ्यस्लक्षणा पञ्चमी स्यात् । ग्रामाद् गोदाभ्यां वनेभ्यो वा आगच्छति ॥३९॥

आङाऽवधौ ।२।२।७०॥

अवधिर्मर्यादाऽभिविधिश्च, तद्वृत्तेराङा युक्तात् पञ्चमी स्यात् । आ पाटलिपुत्राद् वृष्टो मेघः ॥४०॥

पर्यपाभ्यां वर्ज्ये ।२।२।७१॥

वर्ज्ये वर्जनीयेऽर्थे वर्त्तमानात् पर्यपाभ्यां युक्तात् पञ्चमी स्यात् । परि अप वा पाटलिपुत्राद् वृष्टो मेघः । वर्ज्य इति किम् ? अपशब्दो मैत्रस्य ॥४१॥

प्रभृत्यन्यार्थ-दिक्शब्द-बहिरारादितरैः ।२।२।७५॥

प्रभृत्यर्थैरन्यार्थैर्दिक्शब्दैर्बहिरादिभिश्च युक्तात् पञ्चमी स्यात् । ततः प्रभृति, ग्रीष्मादारभ्य, अन्यो भिन्नो वा मैत्रात् ; ग्रामात् पूर्वस्यां दिशि वसति, उत्तरो विन्ध्यात् पारियात्रः, पश्चिमो रामाद् युधिष्ठिरः, बहिर् आरात् इतरो वा ग्रामात् ॥४२॥

ऋणाद्धेतोः ।२।२।७६॥

हेतुभूतऋणवाचिनः पञ्चमी स्यात् । शताद् बद्धः । हेतोरिति किम् ? शतेन बद्धः ॥४३॥

गुणादस्त्रियां नवा ।२।२।७७॥

अस्त्रीवृत्तेर्हेतुभूतगुणवाचिनः पञ्चमी वा स्यात् । जाड्यात् जाड्येन वा बद्धः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ज्ञानात् ज्ञानेन वा मुक्तः । अस्त्रियामिति किम् ? बुद्ध्या मुक्तः ॥४४॥

स्तोका-ऽल्प-कृच्छ्र-कतिपयादसत्त्वे करणे ।२।२।७९॥

यतो द्रव्ये शब्दप्रवृत्तिः स गुणोऽसत्त्वं तेनैव वा रूपेणाऽभिधीयमानं द्रव्यादि, तस्मिन् करणे वर्त्तमानेभ्यः स्तोकादिभ्यः पञ्चमी वा स्यात् । स्तोकात् स्तोकेन वा, अल्पादल्पेन वा, कृच्छ्रात् कृच्छ्रेण वा, कतिपयात् कतिपयेन वा मुक्तः । असत्त्व इति किम् ? स्तोकेन विषेण हतः ॥४५॥

अज्ञाने ज्ञः षष्ठी ।२।२।८०॥

अज्ञानार्थस्य ज्ञो यत् करणं तद्वाचिन एक-द्वि-बहौ यथासंख्यं ङसोसाम्लक्षणा षष्ठी नित्यं स्यात् । सर्पिषः सर्पिषोः सर्पिषां वा जानीते । अज्ञान इति किम् ? स्वरेण पुत्रं जानाति । करण इत्येव, तैलं सर्पिषो जानाति ॥४६॥

शेषे ।२।२।८१॥

कर्मादिभ्योऽन्यस्तदविवक्षारूपः स्व-स्वामिभावादिसम्बन्धः शेषः, तत्र षष्ठी स्यात् । राज्ञः पुरुषः, उपगोरपत्यम्, माषाणामश्नीयात् ॥४७॥

कर्मणि कृतः ।२।२।८३॥

कृदन्तस्य कर्मणि षष्ठी स्यात् । अपां स्रष्टा, गवां दोहः । कर्मणीति किम् ? शस्त्रेण भेत्ता, स्तोकं पक्ता । कृत इति किम् ? भुक्तपूर्वी ओदनम् ॥४८॥

कर्तरि ।२।२।८६॥

कृदन्तस्य कर्त्तरि षष्ठी स्यात् । भवत आसिका । कर्त्तरीति किम् ? गृहे शायिका ॥४९॥

कृत्यस्य वा ।२।२।८८॥

कृत्यस्य कर्त्तरि षष्ठी वा स्यात् । त्वया तव वा कृत्यः कटः ॥५०॥

नोभयोर्हेतोः ।२।२।८९॥

उभयोः कर्तृ-कर्मणोः षष्ठीहेतोः कृत्यस्योभयोरेव षष्ठी न स्यात् । नेतव्या ग्राममजा मैत्रेण ॥५१॥

तृन्नुदन्ता-ऽव्यय-कंस्वाना-ऽन्तृ[श्]-शन्तृ-ङि-णकच्-खलर्थस्य ।२।२।९०॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तृन्नादीनां कृतां कर्मकर्त्रोः षष्ठी न स्यात् । तृन्- वदिता जनापवादान् । उदन्त- कन्यामलङ्करिष्णुः, श्रद्धालुस्तत्त्वम् । अव्यय- कटं कृत्वा, ओदनं भोक्तुं व्रजति । कंसु- ओदनं पेचिवान् । आन- कटं चक्राणः, मलयं पवमानः, ओदनं पचमानः, चैत्रेण पच्यमानः । अन्तृ[श्]- अधीयंस्तत्त्वार्थम् । शन्तृ- कटं कुर्वन् । ङि- परीषहान् सासहिः । णकच्- कटं कारको व्रजति । खलर्थ- ईषत्करः कटो भवता, सुज्ञानं तत्त्वं त्वया ॥५२॥

क्तयोरसदाधारे ।२।२।९१॥

सतो वर्त्तमानादाधाराच्चान्यत्रार्थे यौ क्त-क्तवन्तू तयोः कर्म-कर्त्रोः षष्ठी न स्यात् । कटः कृतो मैत्रेण, ग्रामं गतवान् । असदाधार इति किम् ? राज्ञां पूजितः, इदं सक्तूनां पीतम् ॥५३॥

वा क्लीबे ।२।२।९२॥

क्लीबे विहितस्य क्तस्य कर्त्तरि षष्ठी वा न स्यात् । मयूरस्य मयूरेण वा नृत्तम् ॥५४॥

अकमेरुकस्य ।२।२।९३॥

कमेरन्यस्योकप्रत्ययान्तस्य कर्मणि षष्ठी न स्यात् । स्वमभिलाषुकः । अकमेरिति किम् ? दास्याः कामुकः ॥५५॥

एष्यदृणेनः ।२।२।९४॥

एष्यत्यर्थे ऋणे च विहितस्येनः कर्मणि षष्ठी न स्यात् । ग्रामं गमी आगामी वा, शतं दायी । एष्यदृणेति किम् ? साधु दायी वित्तस्य ॥५६॥

सप्तम्यधिकरणे ।२।२।९५॥

अधिकरणे एक-द्वि-बहौ यथासङ्ख्यं ङ्योस्-सुबूरूपा सप्तमी स्यात् । कटे आस्ते । दिवि देवाः । तिलेषु तैलम् ॥५७॥

नवा सुजर्थैः काले ।२।२।९६॥

सुचोऽर्थो वारो येषां तत्प्रत्ययान्तैर्युक्तात् कालेऽधिकरणे वर्त्तमानात् सप्तमी वा स्यात् । द्विरह्नि अह्नो वा भुङ्क्ते, पञ्चकृत्वो मासे मासस्य वा भुङ्क्ते । काल इति किम् ? द्विः कांस्यपात्र्यां भुङ्क्ते ॥५८॥

स्वामीश्वराधिपति-दायाद-साक्षि-प्रतिभू-प्रसूतैः ।२।२।९८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एभिर्युक्तात् सप्तमी वा स्यात् । गोषु गवां वा स्वामी, ईश्वरः, अधिपतिः, दायादः, साक्षी, प्रतिभूः, प्रसूतो वा ॥५९॥

यद्भावो भावलक्षणम् ।२।२।१०६॥

भावः क्रिया, यस्य भावेनाऽन्यो भावो लक्ष्यते तद्वाचिनः सप्तमी स्यात् । गोषु दुह्यमानासु गतः ॥६०॥

षष्ठी वाऽनादरे ।२।२।१०८॥

यद्भावो भावलक्षणं तद्वृत्तेरनादरे षष्ठी वा स्यात् । रुदतो लोकस्य रुदति वा लोके प्राव्राजीत् ॥६१॥

सप्तमी चाऽविभागे निर्धारणे ।२।२।१०९॥

जाति-गुण-क्रियादिभिः समुदायादेकदेशस्य बुद्ध्या पृथक्करणं निर्द्धारणम्, तस्मिन् गम्ये षष्ठी-सप्तम्यौ स्याताम्, अविभागे निर्द्धार्यमाणैकदेशस्य समुदायेन सह कथञ्चिदैक्ये शब्दाद् गम्ये । क्षत्रियो नृणां नृषु वा शूरः, कृष्णा गवां गोषु [वा] बहुक्षीरा, धावन्तो यातां यात्सु वा शीघ्रतमाः, युधिष्ठिरः श्रेष्ठतमः कुरूणां कुरुषु वा । अविभागे इति किम् ? मैत्रश्चैत्रात् पटुः ॥६२॥

द्वितीया-षष्ठ्यावेनेनाऽनञ्चेः ।२।२।११७॥

एनप्रत्ययान्तेन युक्ताद् द्वितीया-षष्ठ्यौ स्याताम्, न चेत् सोऽञ्चेः परः स्यात् । पूर्वेण ग्रामं ग्रामस्य वा । अनञ्चेरिति किम् ? प्राग् ग्रामात् ॥६३॥

हेत्वर्थैस्तृतीयाद्याः ।२।२।११८॥

हेतुर्निमित्तम्, तद्वाचिभिर्युक्तात् तृतीयाद्याः स्युः । धनेन हेतुना, धनाय हेतवे, धनाद्धेतोः, धनस्य हेतोः, धने हेतौ वा वसति । एवं निमित्तादिभिरपि ॥६४॥

द्वितीयस्य द्वितीयः पादः समाप्तः ॥२।२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[द्वितीयाध्याये तृतीयः पादः]

नमस्-पुरसो गतेः क-ख-प-फि रः सः ।२।३।१॥

गतिसंज्ञनमस्-पुरसोः क-ख-प-फि रस्य स् स्यात् । नमस्कृत्य, पुरस्कृत्य । *साक्षादादिश्च्व्यर्थे* [३।१।१४] *पुरो-ऽस्तमव्ययम्* [३।१।७] इति च गतिसंज्ञा ॥१॥

तिरसो वा ।२।३।२॥

गतेस्तिरसो रस्य कखपफि स् वा स्यात् । तिरस्कृत्य, तिरःकृत्य । *कृगो न वा* [३।१।१०] इति गतित्वम् । गतेरित्येव, तिरः कृत्वा काष्ठं गतः ॥२॥

पुंसः ।२।३।३॥

पुम्सः सम्बन्धिनो रस्य कखपफि स् स्यात् । पुंस्कोकिलः, पुंस्खातः, पुंस्पाकः, पुंस्फलम् ॥३॥

शिरो-ऽधसः पदे समासैक्ये ।२।३।४॥

अनयो रेफस्य पदशब्दे परे स् स्यात् समासैक्ये । शिरस्पदम्, अधस्पदम् । *अव्ययं प्रवृद्धादिभिः* [३।१।४८] इति तत्पुरुषः । समासेति किम् ? शिरः पदम् । ऐक्य इति किम् ? परमशिरःपदम् ॥४॥

अतः कृ-कमि-कंस-कुम्भ-कुशा-कर्णी-पात्रेऽनव्ययस्य ।२।३।५॥

आत् परस्याऽनव्ययस्थस्य रस्य क्रादिस्थे कखपफि परे स् स्यात् समासैक्ये । अयस्कृत्, यशस्कामः, पयस्कंसः, अयस्कुम्भः, अयस्कुशा, पयस्कर्णी, अयस्पात्रम् । अत इति किम् ? वाःपात्रम् । अनव्ययस्येति किम् ? स्वःकारः । समासैक्य इत्येव, उपपयःकारः ॥५॥

प्रत्यये ।२।३।६॥

अनव्ययस्य रस्य प्रत्ययविषये कखपफि स् स्यात् । पयस्पाशम्, पयस्कल्पम् । अनव्ययस्येत्येव, स्वःपाशम् ॥६॥

रोः काम्ये ।२।३।७॥

अनव्ययस्य रस्य रोरेव काम्ये प्रत्यये स् स्यात् । पयस्काम्यति । रोरिति किम् ? अहः काम्यति ॥७॥

नामिनस्तयोः षः ।२।३।८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तयोः प्रत्ययस्थे कखपफि रोरेव च काम्ये, नामिनः परस्य रस्य षू स्यात् । सर्पिष्पाशम्, धनुष्कल्पम्, धानुष्कः, सर्पिष्काम्यति । नामिन इति किम् ? अयस्कल्पम् । रोः काम्य इत्येव, गीरकाम्यति ॥८॥

नाम्यन्तस्था-कवर्गात् पदान्तः कृतस्य सः शिड्-नान्तरेऽपि ।२।३।१५॥

एभ्यः परस्य पदस्यान्तर्मध्ये कृतस्य कृतस्थस्य वा सस्य षू स्यात्, शिटा नकारेण चाऽन्तरेऽपि । आशिषा, नदीषु, वायुषु, वधूषु, पितृषु, एषा, गोषु, नौषु, सिषेव[1] ; गीर्षु, हल्षु ; शक्ष्यति, क्रुङ्क्षु । शिड्नान्तरेऽपि, सर्पिष्षु, यजूंषि । पदान्तरिति किम् ? दधिसेक् *वृत्र्यन्तोऽसषे* [१।१।२५] इति सेचः पदत्वात् सस्य पदादित्वम् । कृतस्येति किम् ? बिसम् ॥९॥

घस्-वसः ।२।३।३६॥

नाम्यादेः परस्य घस्-वसोः सः षू स्यात् । जक्षुः, उषितः ॥१०॥

र-षृवर्णान्नो ण एकपदेऽनन्त्यस्याऽल-च-ट-तवर्ग-श-सान्तरे ।२।३।६३॥

एभ्यः परस्यैभिः सहैकस्मिन्नेव पदे स्थितस्याऽनन्त्यस्य नो णः स्यात्, ल-च-ट-तवर्गान् श-सौ च मुक्त्वाऽन्यस्मिन्निमित्त-कार्यिणोरन्तरेऽपि सति । तीर्णम्, पुष्णाति, नृणाम्, नॄणाम्, करणम्, बृंहणम्, अर्केण । एकपद इति किम् ? अग्निर्नयति, चर्मनासिकः । अनन्त्यस्येति किम् ? वृक्षान् । लादिवर्जनं किम् ? विरलेन, मूर्च्छनम्, दृढेन, तीर्थेन, रशना, रसना ॥११॥

पाठे धात्वादेर्णो नः ।२।३।९७॥

पाठे धात्वादेर्णो न् स्यात् । नयति । पाठ इति किम् ? णकारीयति । आदेरिति किम् ? रणति ॥१२॥

षः सोऽष्टचै-ष्ठिव-ष्वष्कः ।२।३।९८॥

पाठे धात्वादेः षः स् स्यात्, न तु ष्टचै-ष्ठिव-ष्वष्काम् । सहते । आदेरित्येव, लषति । ष्टचादिवर्जनं किम् ? स्त्यायति, ष्ठीव्यति, ष्वष्कते ॥१३॥

ऋ-र ल-लं कृपोऽकृपीटादिषु ।२।३।९९

कृपेर्ऋतः लत्, रस्य च ल् स्यात्, न तु कृपीटादिविषयस्य । क्लृप्तः, क्लृप्यते,

१. "षिवूच् उतौ [है०धा० ११६४] परोक्षा णव्" इति J टिप्पने ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कल्पते, कल्प[य]ति । अकृपीटादिष्विति किम् ? कृपीटः, कृपणः ॥१४॥

ग्रो यङि ।२।३।१०१॥

यङि परे गिरते रो ल् स्यात् । निजेगिल्यते ॥१५॥

नवा स्वरे ।२।३।१०२॥

ग्रो रः स्वरादौ प्रत्यये विहितस्य ल् वा स्यात् । गिरति, गिलति ; निगाल्यते, निगार्यते । विहितविशेषणं किम् ? गिरः ॥१६॥

परेर्घा-ऽङ्क-योगे ।२।३।१०३॥

परिस्थस्य रो घादौ परे ल् वा स्यात् । पलिघः, परिघः ; परेर्घः [५।३।४०] इत्यल् घश्चादेशः, पल्यङ्कः, पर्यङ्कः ; पलियोगः, परियोगः ॥१७॥

द्वितीयस्य तृतीयः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[द्वितीयाध्याये चतुर्थः पादः]

स्त्रियां नृतोऽस्वस्रादेर्ङी ।२।४।१॥

स्त्रीवृत्तेर्नान्ताद् ऋदन्ताच्च स्वस्रादिवर्जाद् ङीः स्यात् । राज्ञी, अतिराज्ञी, कर्त्री । स्त्रियामिति किम् ? पञ्च नद्यः । अस्वस्रादेरिति किम् ? स्वसा, दुहिता ॥१॥

अधातूदितः ।२।४।२॥

अधातुर्य उदिद् ऋदिच्च तदन्तात् स्त्रीवृत्तेर्ङीः स्यात् । भवती, अतिमहती, पचन्ती । अधात्विति किम् ? सुकन् स्त्री ॥२॥

अञ्चः ।२।४।३॥

अञ्चन्तात् स्त्रियां ङीः स्यात् । प्राची, उदीची ॥३॥

ण-स्वरा-ऽघोषाद् वनो रश्च ।२।४।४॥

एतदन्ताद् विहितो यो वन् तदन्तात् स्त्रियां ङीः स्यात्, तद्योगे वनोऽन्तस्य रश्च । अवावरी, धीवरी, मेरुदश्वरी । ण-स्वरा-ऽघोषादिति किम् ? सहयुध्वा स्त्री । विहितविशेषणं किम् ? शर्वरी ॥४॥

वा बहुव्रीहेः ।२।४।५॥

ण-स्वरा-ऽघोषाद् विहितो यो वन् तदन्ताद् बहुव्रीहेः स्त्रियां ङीर्वा स्यात्, रश्चान्तस्य । प्रियावावरी, प्रियावावा । बहुधीवरी, बहुधीवा । बहुमेरुदश्वरी, बहुमेरुदश्वा ॥५॥

अनो वा ।२।४।११॥

अन्नन्ताद् बहुव्रीहेः स्त्रियां ङीर्वा स्यात् । बहुराज्ञ्यौ, बहुराजे, बहुराजानौ ॥६॥

नोपान्त्यवतः ।२।४।१३॥

यस्योपान्त्यलुग् नास्ति तस्मादन्नन्ताद् बहुव्रीहेः स्त्रियां ङीर्न स्यात् । सुपर्वा, सुशर्मा । उपान्त्यवत इति किम् ? बहुराज्ञी ॥७॥

मनः ।२।४।१४॥

मन्नन्ताद् स्त्रियां ङीर्न स्यात् । सीमानौ ॥८॥

ताभ्यां वाऽऽप् ङित् ।२।४।१५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मत्रन्तात् बहुव्रीहेश्चाऽन्नन्तात् स्त्रियाम् आप् वा स्यात्, स च डित्। सीमे, सुपर्वे। पक्षे सीमानौ, सुपर्वाणौ ॥९॥

अजादेः ।२।४।१६॥

अजादेस्तस्यैव स्त्रियाम् आप् स्यात्। अजा, बाला, ज्येष्ठा, कुञ्चा ॥१०॥

आत् ।२।४।१८॥

अकारान्तात् स्त्रियाम् आप् स्यात्। खट्वा, या, सा ॥११॥

गौरादिभ्यो मुख्यान्ङी ।२।४।१९॥

गौरादिगणान्मुख्यात् स्त्रियां ङीः स्यात्। गौरी, शबली। मुख्यादिति किम्? बहुनदा भूमिः ॥१२॥

अणञेयेकण्-नञ्-स्नञ्-टिताम् ।२।४।२०॥

अणादीनां योऽत् तदन्तात्तेषामेव स्त्रियां ङीः स्यात्। औपगवी, बैदी, सौपर्णेयी, आक्षिकी, स्त्रैणी, पौंस्नी, जानुदघ्नी ॥१३॥

नवा शोणादेः ।२।४।३१॥

शोणादेः स्त्रियां ङीर्वा स्यात्। शोणी, शोणा; चण्डी, चण्डा ॥१४॥

इतोऽक्त्यर्थात् ।२।४।३२॥

क्त्यर्थप्रत्ययान्तवर्जाद् इदन्तात् स्त्रियां ङीर्वा स्यात्। भूमी, भूमिः। अक्त्यर्थादिति किम्? कृतिः, हानिः ॥१५॥

स्वरादुतो गुणादखरोः ।२।४।३५॥

स्वरात् परो य उत् तदन्ताद् गुणवचनात् खरुवर्जात् स्त्रियां ङीर्वा स्यात्। पट्वी, पटुः। स्वरादिति किम्? पाण्डुर्भूमिः। गुणादिति किम्? आखुः स्त्री। अखरोरिति किम्? खरुरियम् ॥१६॥

इञ इतः ।२।४।७१॥

इञन्ताद् इदन्तात् स्त्रियां ङीः स्यात्। सौतङ्गमी। इत इति किम्? कारीषगन्ध्या, *अनार्षे वृद्धेऽणिञो बहुस्वरगुरूपान्त्यस्यान्तस्य ष्यः* [२।४।७८] *इति ष्यः, दुनादिकुर्वित्कोशलाजादाञ्ञ्यः* [६।१।११८] इति ञ्यः। *कुन्त्यवन्तेः स्त्रियाम्* [६।१।१२१] इति तस्य लुक् ॥१७॥

नुर्जातेः ।२।४।७२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मनुष्यजातिवाचिन इदन्तात् स्त्रियां ङीः स्यात् । कुन्ती, दाक्षी । इत इत्येव, दरत् । नुरिति किम् ? तित्तिरिः । जातेरिति किम् ? निष्कौशाम्बिः ॥१८॥

उतोऽप्राणिनश्चाऽयु-रज्ज्वादिभ्य ऊङ् ।२।४।७३॥

उदन्तान्नृजात्यप्राणिजातिवाचिनः स्त्रियाम् ऊङ् स्यात्, न तु य्वन्ताद् रज्ज्वादिभ्यश्च । कुरूः, *कुरोर्वा* [६।१।११२] इति य्यस्य लुप् । ब्रह्मबन्धूः ; अलाबूः, कर्कन्धूः । उत इति किम् ? वधूः । अप्राणिनश्चेति किम् ? आखुः । जातेरित्येव, पटुः स्त्री । यु-रज्ज्वादिवर्जनं किम् ? अध्वर्युः स्त्री, रज्जुः ॥१९॥

नारी-सखी-पङ्गू-श्वश्रू ।२।४।७६॥

एते ङ्यन्ता ऊङन्ताश्च स्त्रियां निपात्यन्ते ॥२०॥

यूनस्तिः ।२।४।७७॥

यूनः स्त्रियां तिः स्यात् । युवतिः । मुख्यादित्येव, निर्यूनी ॥२१॥

अस्य ङ्यां लुक् ।२।४।८६॥

ङ्यां परेऽतो लुक् स्यात् । मद्रचरी ॥२२॥

मत्स्यस्य यः ।२।४।८७॥

मत्स्यस्य यो ङ्यां लुक् स्यात् । मत्सी ॥२३॥

व्यञ्जनात् तद्धितस्य ।२।४।८८॥

व्यञ्जनात् परस्य तद्धितस्य यो ङ्यां लुक् स्यात् । गार्गी । व्यञ्जनादिति किम् ? कारिकेयी । तद्धितस्येति किम् ? वैश्यी ॥२४॥

आपत्यस्य क्य-च्व्योः ।२।४।९१॥

व्यञ्जनात् परस्याऽऽपत्यस्य यः क्ये च्वौ च परे लुक् स्यात् । गार्गीयति, गार्गायते, गार्गीभूतः । आपत्यस्येति किम् ? साङ्काश्यीयति । व्यञ्जनादित्येव, कारिकेयायते ॥२५॥

तद्धितयस्वरेऽनाति ।२।४।९२॥

व्यञ्जनात् परस्याऽऽपत्य[स्य] यो यादावादादिवर्जस्वरादौ च तद्धिते लुक् स्यात् । गार्ग्यः, गार्गकम् । आपत्यस्येत्येव, काम्पील्यकः । *प्रस्थ-पुरवहान्तयोपान्त्यधन्वार्थात्* [६।३।४३] इत्यकञ् । तद्धितेति किम् ? वात्स्येन । अनातीति किम् ? गार्ग्यायणः ॥२६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ङ्यादेर्गौणस्याकिपस्तद्धितलुक्यगोणी-सूच्योः ।२।४।९५॥

ङ्यादेः प्रत्ययस्य गौणस्याकिबन्तस्य तद्धितलुकि लुक् स्यात्, न तु गोणी-सूच्योः । सप्तकुमारः, पञ्चयुवा, द्विपङ्गुः । गौणस्येति किम् ? अवन्ती । अकिप इति किम् ? पञ्चकुमारी । अगोणी-सूच्योरिति किम् ? पञ्चगोणिः, दशसूचिः ॥२७॥

गोश्चान्ते ह्रस्वोऽनंशिसमासेयोबहुव्रीहौ ।२।४।९६॥

गौणस्याऽकिपो गोर्ङ्याद्यन्तस्य चान्ते वर्त्तमानस्य ह्रस्वः स्यात्, न चेदसावंशि-समासान्त ईयंस्वन्तबहुव्रीह्यन्तो वा । चित्रगुः, निष्कौशाम्बिः, अतिखट्वः, अतिब्रह्मबन्धुः । गौणस्येत्येव, सुगौः, राजकुमारी । अकिप इत्येव, प्रियगौः, प्रियकुमारी चैत्रः । गोश्चेति किम् ? अतितन्त्रीः । अन्त इति किम् ? गोकुलम्, कन्यापुरम् । अंशिसमासादिवर्जनं किम् ? अर्द्धपिप्पली, बहुश्रेयसी ना ॥२८॥

क्लीबे ।२।४।९७॥

नपुंसकवृत्तेः स्वरान्तस्य नाम्नो ह्रस्वः स्यात् । कीलालपम्, अतिनु कुलम् ॥२९॥

ङ्यादीदूतः के ।२।४।१०४॥

ङ्या आदीदूतां च के प्रत्यये ह्रस्वः स्यात् । पट्विका, सोमपका, लक्ष्मिका, वधुका ॥३०॥

न कचि ।२।४।१०५॥

ङ्यादीदूतः कचि परे ह्रस्वो न स्यात् । बहुकुमारीकः, बहुकीलालपाकः, बहुलक्ष्मीकः, बहुब्रह्मबन्धूकः ॥३१॥

नवाऽऽपः ।२।४।१०६॥

आपः कचि परे ह्रस्वो वा स्यात् । प्रियखट्वकः, प्रियखट्वाकः ॥३२॥

इचाऽपुंसोऽनित्ख्याप्परे ।२।४।१०७॥

आबेव परो यस्मान्न विभक्तिस्तस्मिन्ननितः प्रत्ययस्यावयवे कि परेऽपुंलिङ्गार्थाद् विहितस्याऽऽपस्स्थाने इ-ह्रस्वौ वा स्याताम् । खट्विका, खट्वका, खट्वाका । अपुंस इति किम् ? सर्विका । अनिदिति किम् ? दुर्गका । *ते लुग्वा* [३।२।१०८] इति लुकि, *लुक्युत्तरपदस्य कप्* [७।३।३८] इति कप् । आप्पर इति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किम् ? प्रियखट्वाको ना, अतिप्रियखट्वाका स्त्री । आप इत्येव, मातृका ॥३३॥

अस्याऽयत्-तत्-क्षिपकादीनाम् ।२।४।११९॥

यदादिवर्जस्याऽतोऽनित्क्याप्पेरे इः स्यात् । पाचिका, मद्रिका । अनित्कीत्येव, जीवका । आप्पर इत्येव, बहुपरिव्राजका । यदादिवर्जनं किम् ? यका, सका, क्षिपका, ध्रुवका ॥३४॥

इत्याचार्यश्रीहेमचन्द्रानुस्मृतायां सिद्धहेमचन्द्रशब्दानुशासनरहस्यवृत्तौ द्वितीयस्य चतुर्थः । द्वितीयोऽध्यायः ॥२।४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[अथ तृतीयोऽध्यायः] [प्रथमः पादः]

धातोः पूजार्थस्वति-गतार्थाधिपर्यतिक्रमार्थातिवर्जः प्रादिरुपसर्गः प्राक् च ।३।१।१॥

धातोः सम्बन्धी तदर्थद्योती प्रादिरुपसर्गः स्यात्, स च धातोः प्राक्, न परे, न व्यवहितः, पूजार्थौ स्वती, गतार्थावधिपरी, अतिक्रमार्थमतिं च वर्जयित्वा । प्रणयति, परिणयति । *अदुरुपसर्गाऽन्तरो ण- हिनु-मीना-ऽऽनेः* [२।३।७७] इति णत्वम् । धातोरिति किम् ? वृक्षं वृक्षमभि सेकः । पूजार्थस्वत्यादिवर्जनं किम् ? सुसिक्तम्, अतिसिक्तं भवता ; अध्यागच्छति, आगच्छत्यधि, पर्यागच्छति, आगच्छति परि ; अतिसिक्त्वा । धातोरिति प्राक् चेति च गतिसंज्ञां यावत् ॥१॥

ऊर्यादिच्व्यनुकरण-च्वि-डाचश्च गतिः ।३।१।२॥

एते उपसर्गाश्च धातोः सम्बन्धिनो गतयः स्युः, ते च प्राग् धातोः । ऊर्यादि- ऊरीकृत्य, उररीकृत्य ; अनुकरण- खाट्कृत्य ; च्व्यन्त- शुक्लीकृत्य ; डाजन्त- पटपटाकृत्य ; उपसर्ग- प्रकृत्य ॥२॥

नाम नाम्नैकार्थ्ये समासो बहुलम् ।३।१।१८॥

नाम नाम्नैकार्थ्ये सामर्थ्यविशेषे सति समासो बहुलं स्यात्, लक्षणमिदमधिकारश्च, तेन बहुव्रीह्यादिसंज्ञाऽभावे यत्रैकार्थता तत्रानेनैव समासः । विस्पष्टपटुः, दारुणाध्यायकः, कन्येइव, श्रुतपूर्वः । नामेति किम् ? चरन्ति गावो धनमस्य । नाम्नेति किम् ? चैत्रः पचति ॥३॥

सुज्-वार्थे संख्या संख्येये संख्यया बहुव्रीहिः ।३।१।१९॥

सुजर्थो वारः, वार्थो विकल्पः संशयो वा, तद्वृत्ति सङ्ख्यावाचि नाम सङ्ख्येयार्थेन सङ्ख्यानाम्ना सहैकार्थ्ये समासो बहुव्रीहिश्च स्यात् । द्विदशाः, द्वित्राः । सङ्ख्येति किम् ? गावो वा दश वा । सङ्ख्ययेति किम् ? दश वा गावो वा । सङ्ख्येय इति किम् ? द्विर्विंशतिर्गवाम् ॥४॥

आसन्ना-ऽदूरा-ऽधिका-ऽध्यर्द्धा-ऽर्द्धादिपूरणं द्वितीयाद्यन्यार्थे । ३।१।२०॥

आसन्नादि अर्द्धपूर्वपदं च पूरणप्रत्ययान्तं नाम संख्यानाम्नैकार्थ्ये समासः स्यात्,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्वितीयाद्यन्तस्यान्यपदस्यार्थे सङ्ख्येये वाच्ये, स च बहुव्रीहिः । आसन्नदशाः, अदूरदशाः, अधिकदशाः, अध्यर्द्धविंशाः, अर्द्धपञ्चमविंशाः ॥५॥

अव्ययम् ।३।१।२१॥

अव्ययं नाम सङ्ख्यानाम्नैकार्थे समस्यते द्वितीयाद्यन्यार्थे सङ्ख्येये वाच्ये, स च बहुव्रीहिः । उपदशाः ॥६॥

एकार्थं चाऽनेकं च ।३।१।२२॥

एकमनेकं च **एकार्थं** समानाधिकरणम् अव्ययं च द्वितीयाद्यन्तान्यपदस्यार्थे समस्यते, स च बहुव्रीहिः । आरूढवानरो वृक्षः, सुसूक्ष्मजटकेशः, उच्चैर्मुखः ॥७॥

तत्राऽऽदाय मिथस्तेन प्रहृत्येति सरूपेण युद्धेऽव्ययीभावः ।३।१।२६॥

तत्रेति सप्तम्यन्तं **मिथ आदायेति** क्रियाव्यतिहारे, **तेनेति** तृतीयान्तं **मिथः प्रहृत्येति** क्रियाव्यतिहारे, समानरूपेण नाम्ना युद्धविषयेऽन्यपदार्थे वाच्ये समासोऽव्ययीभावश्च स्यात् । केशाकेशि, दण्डादण्डि । तत्रेति तेनेति च किम् ? केशांश्च केशांश्च गृहीत्वा, मुखं च मुखं च प्रहृत्य कृतं युद्धम् । आदायेति प्रहृत्येति च किम् ? केशेषु च केशेषु च स्थित्वा, दण्डैश्च दण्डैश्चागत्य कृतं युद्धं गृहकोकिलाभ्याम् । सरूपेणेति किम् ? हस्ते च पादे च गृहीत्वा कृतं युद्धम् । युद्ध इति किम् ? हस्ते च हस्ते चाऽऽदाय सख्यं कृतम् ॥८॥

नित्यं प्रतिनाऽल्पे ।३।१।३७॥

अल्पार्थेन प्रतिना नाम नित्यं समासोऽव्ययीभावः स्यात् । शाकप्रति । अल्प इति किम् ? वृक्षं प्रति विद्युत् ॥९॥

विभक्ति-समीप-समृद्धि-व्यृद्ध्यर्थाभावा-ऽत्यया-ऽसंप्रति-पश्चात्-क्रम-ख्याति-युगपत्-सदृक्-सम्पत्-साकल्या-ऽन्तेऽव्ययम् ।३।१।३९॥

एष्वर्थेषु वर्त्तमानमव्ययं नाम्ना सह पूर्वपदार्थे वाच्ये नित्यं समासोऽव्ययीभावः स्यात् । विभक्ति- विभक्त्यर्थः कारकम्, अधिस्त्रि । समीप- उपकुम्भम् । समृद्धि- सुमद्रम् । विगता ऋद्धिर्व्यृद्धिः- दुर्वनम् । अर्थाभाव- निर्मक्षिकम् । अत्ययोऽतीतत्वम्- अतिवर्षम् । असम्प्रतीति सम्प्रत्युपभोगाद्यभावः- अतिकम्बलम् । पश्चात्- अनुरथम् । क्रम- अनुज्येष्ठम् । ख्याति- इतिभद्रबाहु । युगपत्- सचक्रं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

धेहि । सदक्- सव्रतम् । सम्पत्- सब्रह्म साधूनाम् । साकल्य- सतृणमभ्यवहरति । अन्त- सपिण्डैषणमधीते ॥१०॥

गति-कन्यस्तत्पुरुषः ।३।१।४२॥

गतयः कुश्च नाम्ना सह नित्यं समासस्तत्पुरुषः स्यात्, अन्यः बहुव्रीह्यादिलक्षणहीनः । ऊरीकृत्य, खाट्कृत्य, प्रकृत्य, कुब्राह्मणः, कोष्णम् । अन्य इति किम् ? कुपुरुषकः ॥११॥

प्रात्यव-परि-निरादयो गत-क्रान्त-क्रुष्ट-ग्लान-क्रान्ताद्यर्थाः प्रथमाद्यन्तैः ।३।१।४७॥

प्रादयो गताद्यर्थाः प्रथमान्तैः, अत्यादयः क्रान्ताद्यर्था द्वितीयान्तैः, अवादयः क्रुष्टाद्यर्थास्तृतीयान्तैः, पर्यादयो ग्लानाद्यर्थाश्चतुर्थ्यन्तैः, निरादयः क्रान्ताद्यर्थाः पञ्चम्यन्तैर्नित्यं समासस्तत्पुरुषः स्यात् । प्राचार्यः, समर्थः ; अतिखट्वः, उद्वेलः ; अवकोकिलः, परिवीरुत् ; पर्यध्ययनः, उत्सङ्घामः ; निष्कौशाम्बिः, अपशाखः ; बाहुलकात् षष्ठ्याऽपि, अन्तर्गार्ग्यः । गताद्यर्था इति किम् ? वृक्षं प्रति विद्युत् । अन्य इत्येव, प्राचार्यको देशः ॥१२॥

ङस्युक्तं कृता ।३।१।४९॥

कृत्प्रत्ययविधायकेसूत्रेङस्यन्तनाम्नोक्तंकृदन्तेननाम्नानित्यंसमासोऽन्यस्तत्पुरुषः स्यात् । कुम्भकारः । अग्निचित् ॥१३॥

तृतीयोक्तं वा ।३।१।५०॥

दंशेस्तृतीयया [५।४।७३] इत्यारभ्य यत्तृतीयोक्तं तत् कृदन्तेन वा समासोऽन्यस्तत्पुरुषः स्यात् । मूलकेनोपदंशं मूलकोपदंशं भुङ्क्ते ॥१४॥

नञ् ।३।१।५१॥

नञ् नाम नाम्ना समासस्तत्पुरुषः स्यात् । अगौः ; असूर्यंपश्या राजदाराः ॥१५॥

पूर्वा-ऽपरा-ऽधरोत्तरमभिन्नेनांशिना ।३।१।५२॥

पूर्वादयोऽशार्था अंशवद्भाचिना समासस्तत्पुरुषः स्युः, न चेत् सोंऽशी भिन्नः । पूर्वकायः, अपरकायः, अधरकायः, उत्तरकायः । अभिन्नेनेति किम् ? पूर्वं छात्राणामामन्त्रयस्व । अंशिनेति किम् ? पूर्वो नाभेः कायस्य ॥१६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

समेंऽशेऽर्द्धं नवा ।३।१।५४॥

समांशार्थमर्द्धमंशिनाऽभिन्नेन वा समासस्तत्पुरुषः स्यात् । अर्द्धपिप्पली, पिप्पल्यर्द्धम् । समेंऽश इति किम् ? ग्रामार्द्धः ॥१७॥

स्वयं-सामी क्तेन ।३।१।५८॥

एते अव्यये क्तान्तेन समासस्तत्पुरुषः स्याताम् । स्वयंधौतम्, सामिकृतम् । क्तेनेति किम् ? स्वयं कृत्वा ॥१८॥

द्वितीया खट्वा क्षेपे ।३।१।५९॥

खट्वेति द्वितीयान्तं **क्षेपे** निन्दायां क्तान्तेन सहैकार्थे समासस्तत्पुरुषः स्यात् । खट्वारूढः । क्षेप इति किम् ? खट्वामारूढः पिताऽध्यापयति ॥१९॥

श्रितादिभिः ।३।१।६२॥

द्वितीयान्तं श्रितादिभिः समासस्तत्पुरुषः स्यात् । धर्मश्रितः, शिवगतः ॥२०॥

ईषद् गुणवचनैः ।३।१।६४॥

ईषदव्ययं गुणवचनैः + समासस्तत्पुरुषः स्यात् । ये गुणे वर्त्तित्वा तद्योगाद् गुणिनि वर्त्तन्ते ते गुणवचनाः । ईषत्पिङ्गलः, ईषद्रक्तः । गुणवचनैरिति किम् ? ईषद् गार्ग्यः ॥२१॥

चतुर्थी प्रकृत्या ।३।१।७०॥

प्रकृतिः परिणामिकारणम्, एतद्वाचिनैकार्थे चतुर्थ्यन्तं विकारार्थं समासस्तत्पुरुषः स्यात् । यूपदारु । प्रकृत्येति किम् ? रन्धनाय स्थाली ॥२२॥

हितादिभिः ।३।१।७१॥

चतुर्थ्यन्तं हितादिभिः समासस्तत्पुरुषः स्यात् । गोहितम्, गोसुखम् ॥२३॥

तदर्थार्थेन ।३।१।७२॥

चतुर्थ्यर्थो[ऽर्थो?] यस्य तेनार्थेन चतुर्थ्यन्तं समासस्तत्पुरुषः स्यात् । पित्रर्थं पयः, आतुरार्था यवागूः । तदर्थेति किम् ? पित्रेऽर्थः ॥२४॥

पञ्चमी भयाद्यैः ।३।१।७३॥

पञ्चम्यन्तं भयाद्यैरेकार्थैः समासस्तत्पुरुषः स्यात् । वृकभयम्, वृकभीरुः ॥२५॥

परःशतादिः ।३।१।७५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अयं पञ्चमीतत्पुरुषः साधुः स्यात् । परःशताः, परःसहस्राः ॥२६॥

षष्ठ्यत्नाच्छेषे ।३।१।७६॥

शेषे [२।२।८१] या षष्ठी तदन्तं नाम्नैकार्थ्ये समासस्तत्पुरुषः स्यात्, न चेत् स शेषः *नाथ* [२।२।१०] इत्यादेर्यत्नात् । राजपुरुषः । अयत्नादिति किम् ? सर्पिषो नाथितम् । शेष इति किम् ? गवां कृष्णा सम्पन्नक्षीरा ॥२७॥

कृति ।३।१।७७॥

कर्मणि कृतः [२।२।८३] *कर्त्तरि* [२।२।८६] इति च या कृन्निमित्ता षष्ठी तदन्तं नाम्ना समासस्तत्पुरुषः स्यात् । सर्पिर्ज्ञानम्, गणधरोक्तिः ॥२८॥

सप्तमी शौण्डाद्यैः ।३।१।८८॥

एभिः सहैकार्थ्ये सप्तम्यन्तं समासस्तत्पुरुषः स्यात् । पानशौण्डः, अक्षधूर्तः ॥२९॥

विशेषणं विशेष्येणैकार्थं कर्मधारयश्च ।३।१।९६॥

भिन्नप्रवृत्तिनिमित्तयोः शब्दयोरेकस्मिन्नर्थे वृत्तिरैकार्थ्यम्, तद्वद् विशेषणवाचि विशेष्यवाचिनैकार्थ्ये समासस्तत्पुरुषः कर्मधारयश्च स्यात् । नीलोत्पलम्, खञ्जकुण्टः, कुण्टखञ्जः । एकार्थमिति किम् ? वृद्धस्योक्षा वृद्धोक्षा ॥३०॥

दिगधिकं संज्ञा-तद्धितोत्तरपदे ।३।१।९८॥

दिग्वाच्यधिकं चैकार्थ्ये(र्थं) नाम्ना समासस्तत्पुरुषः कर्मधारयश्च स्यात्, ++ संज्ञायां तद्धिते च विषयभूते उत्तरपदे च परतः । दक्षिणकोशलाः, पूर्वेषुकामशमी, दाक्षिणशालः, *दिक्पूर्वादनाम्नः* [६।३।२३] इति णः । अधिकषाष्टिकः, *तं भावि भूते* [६।४।१०४] इति इकण् । *मान-संवत्सरस्या-ऽज्ञाण-कुलिजस्याऽनाम्नि* [७।४।१९] इत्युत्तरपदवृद्धिः । उत्तरगवधनः, अधिकगवप्रियः ॥३१॥

संख्या समाहारे च द्विगुश्चाऽनाम्ययम् ।३।१।९९॥

संख्यावाचिपरेणनाम्नासमासस्तत्पुरुषःकर्म्मधारयश्चस्यात्,संज्ञातद्धितयोर्विषये, उत्तरपदे च परे, समाहारे चार्थे, अयमेव चाऽसंज्ञायां द्विगुश्च । पञ्चाम्राः, सप्तर्षयः ; पञ्चगवधनः, पञ्चराजी । समाहारे चेति किम् ? अष्टौ प्रवचनमातरः । अनाम्नीति किम् ? पञ्चार्षम्(पाञ्चर्षम्) ॥३२॥

मयूरव्यंसकेत्यादयः ।३।१।११६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एते तत्पुरुषसमासा निपात्यन्ते । मयूरव्यंसकः, कम्बोजमुण्डः, एहीडं कर्म, अश्नीतपिबता क्रिया, कुरुकटो वक्ता, गतप्रत्यागतम्, क्रयाक्रयिका, शाकपार्थिवः, त्रिभागः, सर्वश्वेतः ॥३३॥

चार्थे द्वन्द्वः सहोक्तौ ।३।१।११७॥

नाम नाम्ना सह सहोक्तिविषये चार्थवृत्तिः समासो द्वन्द्वः स्यात् । प्लक्षन्यग्रोधौ, वाक्त्वचम् । *नाम नाम्ना*[३।१।१९] इत्यनुवृत्तावपि *लघ्वक्षरा०*[*३। १। १६०*] दिसूत्रे एकग्रहणाद् बहूनामपि धव-खदिर-पलाशाः । चार्थ इति किम् ? वीप्सासहोक्तौ मा भूत्, ग्रामो ग्रामो रमणीयः । सहोक्ताविति किम् ? प्लक्षश्च न्यग्रोधश्च वीक्ष्यताम् ॥३४॥

प्रथमोक्तं प्राक् ।३।१।१४८॥

अत्र समासप्रकरणे प्रथमान्तेन यन्निर्दिष्टं तत् प्राक् स्यात् । आसन्नदशाः, उपगङ्गम् ॥३५॥

लघ्वक्षरा-ऽसखीदुत्-स्वराद्यदल्पस्वरा-ऽर्च्यमेकम् ।३।१।१६०॥

लघ्वक्षरं सखिवर्जेदुदन्तं स्वराद्यकारान्तमल्पस्वरं पूज्यवाचि चैकं मण्डूकप्लुत्या द्वन्द्वे प्राक् स्यात् । शरशीर्षम्, अग्नीषोमौ, *ईः षोम-वरुणेऽग्नेः* [३।२।४२] इति ईत्वं षत्वं च । वायुतोयम् । असखीति किम् ? सुतसखायौ । अस्त्र-शस्त्रम्, प्लक्ष-न्यग्रोधौ, श्रद्धा-मेधे । लघ्वादीति किम् ? कुक्कुट-मयूरौ । एकमिति किम् ? शङ्ख-दुन्दुभि-वीणाः । द्वन्द्व इत्येव, विस्पष्टपटुः ॥३६॥

तृतीयस्य प्रथमः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[तृतीयाध्याये द्वितीयः पादः]

परस्परा-ऽन्योन्येतरेत्तरस्याम् स्यादेर्वाऽपुंसि ।३।२।१॥

एषामपुंवृत्तीनां स्यादेराम् वा स्यात् । इमे सख्यौ कुले वा परस्परां परस्परम्, अन्योन्यामन्योन्यम्, इतरेतरामितरेतरं [भोजयतः] । परस्परां परस्परेण, अन्योन्यामन्योन्येन, इतरेतरामितरेतरेण भोक्ष्येते । अपुंसीति किम् ? नराः परस्परं भोजयन्ति ॥१॥

अमव्ययीभावस्याऽतोऽपञ्चम्याः ।३।२।२॥

अदन्तस्याव्ययीभावस्य स्यादेरम् स्यात्, न तु पञ्चम्याः । उपकुम्भमस्ति, उपकुम्भं धेहि । अव्ययीभावस्येति किम् ? प्रियोपकुम्भोऽयम् । अत इति किम् ? अधिस्त्रि । अपञ्चम्या इति किम् ? उपकुम्भात् ॥२॥

वा तृतीयायाः ।३।२।३॥

अदन्तस्याव्ययीभावस्य तृतीयाया अम् वा स्यात् । किं नः उपकुम्भम् ? किं नः उपकुम्भेन ? अव्ययीभावस्येत्येव, प्रियोपकुम्भेन ॥३॥

सप्तम्या वा ।३।२।४॥

अदन्तस्याव्ययीभावस्य सप्तम्या अम् वा स्यात् । उपकुम्भम्, उपकुम्भे धेहि । अव्ययीभावस्येत्येव, प्रियोपकुम्भे ॥४॥

अनतो लुप् ।३।२।६॥

अदन्तवर्जस्याऽव्ययीभावस्य स्यादेर्लुप् स्यात् । उपवधु, उपकर्तृ । अनत इति किम् ? उपकुम्भात् । अव्ययीभावस्येत्येव, प्रियोपवधुः ॥५॥

अव्ययस्य ।३।२।७॥

अव्ययानां स्यादेर्लुप् स्यात् । स्वः, प्रातः । अव्ययस्येति किम् ? अत्युच्चैसः ॥६॥

ऐकार्थ्ये ।३।२।८॥

ऐकार्थ्यम् ऐकपद्यम्, तन्निमित्तस्य स्यादेर्लुप् स्यात् । चित्रगुः, पुत्रीयति, औपगवः । अत एव लुबविधानाद् *नाम नाम्रा० [३।१।१९]* इत्युक्तावपि स्याद्यन्तानां समासः स्यात् । ऐकार्थ्य इति किम् ? चित्रा गावो यस्येत्यादिवाक्ये मा भूत् ॥७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न नाम्येकस्वरात् खित्युत्तरपदेऽमः ।३।२।९॥

समासारम्भकमन्त्यं पदम् उत्तरपदम्, तस्मिन् खित्प्रत्ययान्ते परे नाम्यन्तादेकस्वरात् पूर्वपदात् परस्याऽमो लुब् न स्यात् । स्त्रियंमन्यः, नावंमन्यः । नामीति किम् ? क्ष्मंमन्यः । एकस्वरादिति किम् ? वधुंमन्या । खितीति किम् ? स्त्रीमानी ॥८॥

परतः स्त्री पुंवत् स्त्र्येकार्थेऽनूङ् ।३।२।४९॥

परतः विशेष्यवशात् स्त्रीलिङ्गः स्त्रीवृत्तावेकार्थे उत्तरपदे पुंवत् स्यात्, अनूङन्तः । दर्शनीयभार्यः । परत इति किम् ? द्रोणीभार्यः । स्त्रीति किम् ? खलपुदृष्टिः । स्त्र्येकार्थ इति किम् ? गृहिणीनेत्रः, कल्याणीमाता । अनूङिति किम् ? ब्रह्मबन्धूभार्यः ॥९॥

क्यङ्-मानि-पित्तद्धिते ।३।२।५०॥

क्यङि मानिनि चोत्तरपदे पिति तद्धिते च परतः स्त्रीलिङ्गोऽनूङ् पुंवत् स्यात् । श्येतायते, श्येनायते । *श्येतैत-हरित-भरत-रोहिताद्वर्णात्तो नश्च* [२।४।३६] इति ङीर्नश्च । दर्शनीयमानी अयमस्याः । अजथ्यं यूथम् *अव्यजात् थ्यप्* [७।१।३८। इति थ्यप् ॥१०॥

+ पुंवत् कर्म्मधारये ।३।२।५७॥

परतः स्त्री अनूङ् कर्मधारये सति स्त्र्येकार्थे उत्तरपदे पुंवत् स्यात् । कल्याणप्रिया, मद्रकभार्या, माथुरवृन्दारिका, चन्द्रमुखवृन्दारिका । अनूङित्येव, ब्रह्मबन्धुवृन्दारिका ॥११॥

रिति ।३।२।५८॥

परतः स्त्री अनूङ् रिति प्रत्यये पुंवत् स्यात् । पटुजातीया, कठदेशीया ॥१२॥

त्व-ते गुणः ।३।२।५९॥

परतः स्त्र्यनूङ् गुणवचनस्त्व-तयोः प्रत्ययोः पुंवत् स्यात् । पटुत्वम्, पटुता । गुण इति किम् ? कठीत्वम् ॥१३॥

च्वौ क्वचित् ।३।२।६०॥

परतः स्त्र्यनूङ् च्वौ क्वचित् पुंवत् स्यात् । महद्भूता कन्या । क्वचिदिति किम् ? गोमतीभूता ॥१४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सर्वादयोऽस्यादौ ।३।२।६१॥

सर्वादिः परतः स्त्री पुंवत् स्यात्, न तु स्यादौ । सर्वस्त्रियः, भवत्पुत्रः । अस्यादाविति किम् ? सर्वस्यै ॥१५॥

मृगक्षीरादिषु वा ।३।२।६२॥

एषु समासेषु परतः स्त्री उत्तरपदे पुंवद् वा स्यात् । मृगक्षीरम्, मृगीक्षीरम्, काकशावः, काकीशावः ॥१६॥

ऋदुदित् तर-तम-रूप-कल्प-ब्रुव-चेलड्-गोत्र-मत-हते वा ह्रस्वश्च ।३।२।६३॥

ऋदुदित् परतः स्त्री तरादिषु प्रत्ययेषु ब्रुवादौ च स्त्र्येकार्थे उत्तरपदे ह्रस्वान्तः पुंवच्च वा स्यात् । पचन्तितरा, पचत्तरा, पचन्तीतरा ; श्रेयसितरा, श्रेयस्तरा, श्रेयसीतरा । पचन्तितमा, पचत्तमा, पचन्तीतमा ; श्रेयसितमा, श्रेयस्तमा, श्रेयसीतमा । पचन्तिरूपा, पचद्रूपा, पचन्तीरूपा ; विदुषिरूपा, विद्वद्रूपा ; विदुषीरूपा । पचन्तिकल्पा, पचत्कल्पा, पचन्तीकल्पा ; विदुषिकल्पा, विद्वत्कल्पा, विदुषीकल्पा । पचन्तिब्रुवा, पचद्ब्रुवा, पचन्तीब्रुवा ; श्रेयसिब्रुवा, श्रेयोब्रुवा, श्रेयसीब्रुवा । पचन्तिचेली, पचच्चेली, पचन्तीचेली ; श्रेयसिचेली, श्रेयश्चेली, श्रेयसीचेली । पचन्तिगोत्रा, पचद्गोत्रा, पचन्तीगोत्रा ; श्रेयसिगोत्रा, श्रेयोगोत्रा, श्रेयसीगोत्रा । पचन्तिमता, पचन्मता, पचन्तीमता ; श्रेयसिमता, श्रेयोमता, श्रेयसीमता । पचन्तिहता, पचद्धता, पचन्तीहता ; श्रेयसिहता, श्रेयोहता, श्रेयसीहता ॥१७॥

ङ्यः ।३।२।६४॥

ङ्यन्तायाः परतः स्त्रियास्तरादिषु प्रत्ययेषु ब्रुवादिषु चोत्तरपदेषु एकार्थेषु ह्रस्वः स्यात् । गौरितरा, गौरितमा, नर्त्तकिरूपा, कुमारिकल्पा, ब्राह्मणिब्रुवा, गार्गिचेली, ब्राह्मणिगोत्रा, गार्गिमता, गौरिहता ॥१८॥

नवैकस्वराणाम् ।३।२।६६॥

एकस्वरस्य ङ्यन्तस्य तरादौ प्रत्यये ब्रुवादौ चोत्तरपदे स्त्र्येकार्थे वा ह्रस्वः स्यात् । स्त्रितरा, स्त्रीतरा ; ज्ञितमा, ज्ञीतमा ; ज्ञिब्रुवा, ज्ञीब्रुवा । एकस्वराणामिति किम् ? कुटीतरा ॥१९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ऊङः ।३।२।६७॥

ऊङन्तस्य तरादौ [ब्रुवादौ] चोत्तरपदे स्त्र्येकार्थे वा ह्रस्वः स्यात् । ब्रह्मबन्धुतरा, ब्रह्मबन्धूतरा ; कद्रुब्रुवा, कद्रूब्रुवा ॥२०॥

महतः कर-घास-विशिष्टे डाः ।३।२।६८॥

करादावुत्तरपदे महतो डा वा स्यात् । महाकरः, महत्करः ; महाघासः, महद्घासः ; महाविशिष्टः, महद्विशिष्टः ॥२१॥

स्त्रियाम् ।३।२।६९॥

स्त्रीवृत्तेर्महतः करादावुत्तरपदे नित्यं डाः स्यात् । महाकरः, महाघासः, महाविशिष्टः ॥२२॥

जातीयैकार्थेऽच्वेः ।३।२।७०॥

महतोऽच्व्यन्तस्य जातीयरि एकार्थे चोत्तरपदे डाः स्यात् । महाजातीयः, महावीरः । जातीयैकार्थे इति किम् ? महत्तरः । अच्वेरिति किम् ? महद्भूता कन्या ॥२३॥

इच्यस्वरे दीर्घ आच्च ।३।२।७२॥

इजन्तेऽस्वरादावुत्तरपदे पूर्वपदस्य दीर्घ आच्च स्यात् । मुष्टीमुष्टि, मुष्टामुष्टि । अस्वर इति किम् ? अस्यसि ॥२४॥

अञ्जनादीनां गिरौ ।३।२।७७॥

एषां गिरावुत्तरपदे नाम्नि दीर्घः स्यात् । अञ्जनागिरिः, कुक्कुटागिरिः ॥२५॥

अनजिरादिबहुस्वर-शरादीनां मन्तौ ।३।२।७८॥

अजिरादिवर्जबहुस्वराणां शरादीनां च मन्तौ प्रत्यये नाम्नि दीर्घः स्यात् । उदुम्बरावती, शरावती, वंशावती । अनजिरादीति किम् ? अजिरवती, हिरण्यवती ॥२६॥

ऋषौ विश्वस्य मित्रे ।३।२।७९॥

ऋषावर्थे मित्रे उत्तरपदे विश्वस्य नाम्नि दीर्घः स्यात् । विश्वामित्रः ॥२७॥

गति-कारकस्य नहि-वृति-वृषि-व्यधि-रुचि-सहि-तनौ कौ ।३।२।८५॥

गति-कारकयोर्नह्यादौ किबन्ते उत्तरपदे दीर्घः स्यात् । उपानत्, नीवृत्, प्रावृट्,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्वावित्, नीरुक्, ऋतीषट्, जलासट्, परीतत् ॥२८॥

घञ्युपसर्गस्य बहुलम् ।३।२।८६॥

घञन्ते उत्तरपदे उपसर्गस्य बहुलं दीर्घः स्यात्। नीक्लेदः, नीवारः। बाहुलकात् क्वचिद् वा - प्रतीवेशः, प्रतिवेशः। क्वचिन्न - निषादः, विषादः ॥२९॥

दस्ति ।३।२।८८॥

दो यस्तादिरादेशस्तस्मिन् परे नाम्यन्तस्योपसर्गस्य दीर्घः स्यात्। नीत्तम्, वीत्तम्। द इति किम् ? वितीर्णम्। तीति किम् ? सुदत्ता ॥३०॥

एकादश-षोडश-षोडत्-षोढा-षड्ढा ।३।२।९१॥

एकादयो दशादिषु कृतदीर्घत्वादयो निपात्यन्ते। एकादश, षोडश, षड् दन्ता अस्य षोडन्, षोढा, षड्ढा ॥३१॥

द्वित्र्यष्टानां द्वा-त्रयो-ऽष्टाः प्राक् शतादनशीति-बहुव्रीहौ ।३।२।९२॥

एषां यथासंख्यमेते प्राक् शतात् संख्यायामुत्तरपदे स्युः, न तु अशीतौ बहुव्रीहिविषये च। द्वादश, त्रयोविंशतिः, अष्टाविंशतिः। प्राक् शतादिति किम् ? द्विशतम्, त्रिशतम्, अष्टसहस्रम्। अनशीतिबहुव्रीहाविति किम् ? द्व्यशीतिः, द्वित्राः ॥३२॥

चत्वारिंशदादौ वा ।३।२।९३॥

द्वित्र्यष्टानां प्राक् शताच्चत्वारिंशदादावुत्तरपदे यथासंख्यं द्वा-त्रयो-ऽष्टा वा स्युः, अनशीतिबहुव्रीहौ। द्वाचत्वारिंशत्, द्विचत्वारिंशत् ; त्रयश्चत्वारिंशत्, त्रिचत्वारिंशत् ; अष्टाचत्वारिंशत्, अष्टचत्वारिंशत् ॥३३॥

उदकस्योदः पेषं-धि-वास-वाहने ।३।२।१०४॥

उदकस्य पेषमादावुत्तरपदे उदः स्यात्। उदपेषं पिनष्टि, उदधिर्घटः, उदवासः, उदवाहनः ॥३४॥

नाम्युत्तरपदस्य च ।३।२।१०७॥

उदकस्य पूर्वपदस्योत्तरपदस्य च संज्ञायामुदः स्यात्। उदमेघः, उदवाहः, उदपानम्, उदधिः, लवणोदः, कालोदः ॥३५॥

ते लुग् वा ।३।२।१०८॥

संज्ञाविषये पूर्वोत्तरपदे लुग् वा स्यात्। देवदत्तः। देवः। दत्तः ॥३६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

खित्यनव्यया-ऽरुषो मोऽन्तो ह्रस्वश्च ।३।२।१११॥

स्वरान्तस्यानव्ययस्यारुषश्च खित्प्रत्ययान्ते उत्तरपदे मोऽन्तो यथासम्भवं ह्रस्वादेशश्च स्यात् । क्षंमन्यः, कालिंमन्या, अरुन्तुदः । खितीति किम् ? क्षमानी । अनव्ययेति किम् ? दोषामन्यमहः ॥३७॥

लोकम्पृण-मध्यन्दिना-ऽनभ्याशमित्यम् ।३।२।११३॥

एते कृतपूर्वपदमन्ता निपात्यन्ते । लोकम्पृणः, मध्यन्दिनम्, अनभ्याशमित्यः ॥३८॥

भद्रोष्णात् करणे ।३।२।११६॥

आभ्यां परे करणे उत्तपदे मोऽन्तः स्यात् । भद्रंकरणम् । उष्णंकरणम् ॥३९॥

न वाऽखित्कृदन्ते रात्रेः ।३।२।११७॥

खिद्वर्जकृदन्ते उत्तरपदे रात्रेर्मोऽन्तो वा स्यात् । रात्रिंचरः, रात्रिचरः । खिद्वर्जनं किम् ? रात्रिंमन्यमहः । कृदन्त इति किम् ? रात्रिसुखम् । अन्तग्रहणं किम् ? रात्रयिता ॥४०॥

अषष्ठीतृतीयादन्याद् दोऽर्थे ।३।२।११९॥

अषष्ठ्यन्तादतृतीयान्ताच्चान्यादर्थे उत्तरपदे [द्] अन्तो वा स्यात् । अन्यदर्थः, अन्यार्थः । षष्ठ्यादिवर्जनं किम् ? अन्यस्यान्येन वार्थोऽन्यार्थः ॥४१॥

सर्वादि-विश्वग्-देवाड्डद्रिः क्वचञ्चौ ।३।२।१२२॥

सर्वादेर्विश्वग्-देवाभ्यां च परः किबन्ते ++ अञ्चावुत्तरपदे डद्रिरन्तः स्यात् । सर्वद्रीचः, द्वद्रञ्चङ् ; विश्वद्रीचः, देवद्रञ्चङ् । क्वीति किम् ? विश्वगञ्चनम् ॥४२॥

सह-समः सध्रि-समि ।३।२।१२३॥

अनयोः स्थाने किबन्ते अञ्चावुत्तरपदे यथासंख्यं सध्रि-समी स्याताम् । सध्र्यङ्, सम्यङ् । क्वचञ्चावित्येव, सहाञ्चनम् ॥४३॥

तिरसस्तिर्यति ।३।२।१२४॥

अकारादौ क्व्यञ्चावुत्तरपदे तिरसस्तिरिः स्यात् । तिर्यङ् । अतीति किम् ? तिरश्चः ॥४४॥

नञ्अत् ।३।२।१२५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उत्तरपदे परे नञ् अत् स्यात् । अचौरः पन्थाः । उत्तरपद इत्येव, न भुङ्क्ते ॥४५॥

अन् स्वरे ।३।२।१२९॥

स्वरादावुत्तरपदे नञोऽन् स्यात् । अनन्तो जिनः ॥४६॥

कोः कत् तत्पुरुषे ।३।२।१३०॥

स्वरादावुत्तरपदे कोस्तत्पुरुषे कत् स्यात् । कदश्वः । तत्पुरुष इति किम् ? कूष्ट्रो देशः । स्वर इत्येव, कुब्राह्मणः ॥४७॥

काऽक्ष-पथोः ।३।२।१३४॥

अनयोरुत्तरपदयोः कोः काः स्यात् । काक्षः, कापथम् ॥४८॥

पुरुषे वा ।३।२।१३५॥

पुरुषे उत्तरपदे कोः का वा स्यात् । कापुरुषः, कुपुरुषः ॥४९॥

अल्पे ।३।२।१३६॥

ईषदर्थस्य कोरुत्तरपदे काः स्यात् । कामधुरम्, काच्छम् ॥५०॥

का-कवौ वोष्णे ।३।२।१३७॥

उष्णे उत्तरपदे कोः का-कवौ वा स्याताम् । कोष्णम्, कवोष्णम् । पक्षे यथाप्राप्तमिति तत्पुरुषे कदुष्णम् । बहुव्रीहौ कूष्णो देशः ॥५१॥

कृत्येऽवश्यमो लुक् ।३।२।१३८॥

कृत्यान्ते उत्तरपदेऽवश्यमो लुक् स्यात् । अवश्यकार्यम् । कृत्य इति किम् ? अवश्यंलावकः ॥५२॥

मांसस्याऽनड्-घञि पचि नवा ।३।२।१४१॥

अनड्-घञन्ते पचावुत्तरपदे मांसस्य लुग् वा स्यात् । मांस्पचनम्, मांसपचनम् ; मांस्पाकः, मांसपाकः ॥५३॥

सहस्य सोऽन्यार्थे ।३।२।१४३॥

उत्तरपदे परे बहुव्रीहौ सहस्य सो वा स्यात् । सपुत्रः, सहपुत्रः । अन्यार्थ इति किम् ? सहजः ॥५४॥

अकालेऽव्ययीभावे ।३।२।१४६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अकालवाचिन्युत्तरपदे सहस्याव्ययीभावे सः स्यात् । सब्रह्म साधूनाम् । अकाल इति किम् ? सहपूर्वाह्णं शेते । अव्ययीभाव इति किम् ? सहयुध्वा ॥५५॥

समानस्य धर्मादिषु ।३।२।१४९॥

धर्मादावुत्तरपदे समानस्य सः स्यात् । सधर्मा, सनामा ॥५६॥

दृक्-दृश-दृक्षे ।३।२।१५१॥

एषूत्तरपदेषु समानस्य सः स्यात् । सदृक्, सदृशः, सदृक्षः ॥५७॥

अन्य-त्यदादेराः ।३।२।१५२॥

अन्यस्य त्यदादेश्च दृगादावुत्तरपदे आः स्यात् । अन्यादृक्, अन्यादृशः, अन्यादृक्षः ; त्यादृक्, त्यादृशः, त्यादृक्षः ; अस्मादृक्, अस्मादृशः, अस्मादृक्षः ॥५८॥

इदं-किमीत्-की ।३।२।१५३॥

दृगादावुत्तरपदे इदम्-किमौ यथासङ्ख्यम् ईत्-कीरूपौ स्यातां । ईदृक्, ईदृशः, ईदृक्षः ; कीदृक्, कीदृशः, कीदृक्षः ॥५९॥

अनञः क्त्वो यप् ।३।२।१५४॥

नञोऽन्यस्मादव्ययात् पूर्वपदात् परं यदुत्तरपदं तदवयवस्य क्त्वो यप् स्यात् । प्रकृत्य । अनञ इति किम् ? अकृत्वा, परमकृत्वा । उत्तरपदस्येत्येव, अलं कृत्वा ॥६०॥

पृषोदरादयः ।३।२।१५५॥

एते साधवः स्युः । पृषोदरः, बलाहकः ॥६१॥

तृतीयस्य अध्यायस्य द्वितीयः पादः समाप्तः । मङ्गलमस्तु ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[तृतीयाध्याये तृतीयः पादः]

वृद्धिराऽऽरैदौत् ।३।३।१॥

आ आर् ऐ औ एते प्रत्येकं वृद्धिः स्युः । मार्ष्टि, कार्यम्, नायकः, औपगवः ॥१॥

गुणोऽरेदोत् ।३।३।२॥

एते प्रत्येकं गुणः स्युः । कर्ता, चेता, स्तोता ॥२॥

क्रियार्थो धातुः ।३।३।३॥

कृतिः क्रिया पूर्वापरीभूता, साऽर्थो यस्य स धातुः स्यात् । भवति, अत्ति, गोपायति, जुगुप्सते, पापच्यते, पुत्रकाम्यति, मुण्डयति, जवनः ॥३॥

अवौ दा-धौ दा ।३।३।५॥

दाधारूपौ धातू अवितौ दा स्याताम् । दाम् -प्रणिदाता । देङ्-प्रणिदयते । डुदांग् - प्रणिददाति । दों - प्रणिद्यति । टूधें - प्रणिधयति । डुधांग् - प्रणिदधाति । अवाविति किम् ? दांव् -दातं बर्हिः । दैंव् - अवदातं मुखम् ॥४॥

वर्तमाना–तिव् तस् अन्ति, सिव् थस् थ, मिव् वस् मस् ; ते आते अन्ते, से आथे ध्वे, ए वहे महे ।३।३।६॥

इमानि वचनानि वर्त्तमाना स्युः ॥५॥

सप्तमी–यात् याताम् युस्, यास् यातम् यात, याम् याव याम ; ईत ईयाताम् ईरन्, ईथास् ईयाथाम् ईध्वम्, ईय ईवहि ईमहि ।३।३।७॥

इमानि वचनानि सप्तमी स्युः ॥६॥

पञ्चमी–तुव् ताम् अन्तु, हि तम् त, आनिव् आवव् आमव् ; ताम् आताम् अन्ताम्, स्व आथाम् ध्वम्, ऐव् आवहैव् आमहैव् ।३।३।८॥

इमानि वचनानि पञ्चमी स्युः ॥७॥

ह्यस्तनी–दिव् ताम् अन्, सिव् तम् त, अम्व् व म ; त आताम् अन्त, थास् आथाम् ध्वम्, इ वहि महि ।३।३।९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इमानि वचनानि ह्यस्तनी स्युः ॥८॥

एताः शितः ।३।३।१०॥

एताश्चतस्रः शितो ज्ञेयाः । भवति, भवेत्, भवतु, अभवत् ॥९॥

अद्यतनी–दि ताम् अन्, सि तम् त, अम् व म ; त आताम् अन्त, थास् आथाम् ध्वम्, इ वहि महि ।३।३।११॥

इमानि वचनानि अद्यतनी स्युः ॥१०॥

परोक्षा- णव् अतुस् उस्, थव् अथुस् अ, णव् व म ; ए आते इरे, से आथे ध्वे, ए वहे महे ।३।३।१२॥

इमानि वचनानि परोक्षा स्युः ॥११॥

आशीः- क्यात् क्यास्ताम् क्यासुस्, क्यास् क्यास्तम् क्यास्त, क्यासम् क्यास्व क्यास्म ; सीष्ट सीयास्ताम् सीरन्, सीष्ठास् सीयास्थाम् सीध्वम्, सीय सीवहि सीमहि ।३।३।१३॥

इमानि वचनानि आशीः स्युः ॥१२॥

श्वस्तनी- ता तारौ तारस्, तासि तास्थस् तास्थ, तास्मि तास्वस् तास्मस् ; ता तारौ तारस्, तासे तासाथे ताध्वे, ताहे तास्वहे तास्महे ।३।३।१४॥

इमानि वचनानि श्वस्तनी स्युः ॥१३॥

भविष्यन्ती- स्यति स्यतस् स्यन्ति, स्यसि स्यथस् स्यथ, स्यामि स्यावस् स्यामस् ; स्यते स्येते स्यन्ते, स्यसे स्येथे स्यध्वे, स्ये स्यावहे स्यामहे ।३।३।१५॥

इमानि वचनानि भविष्यन्ती स्युः ॥१४॥

क्रियातिपत्तिः- स्यत् स्यताम् स्यन्, स्यस् स्यतम् स्यत, स्यम् स्याव स्याम ; स्यत स्येताम् स्यन्त, स्यथास् स्येथाम् स्यध्वम्, स्ये स्यावहि स्यामहि ।३।३।१६॥

इमानि वचनानि क्रियातिपत्तिः स्युः ॥१५॥

त्रीणि त्रीण्यन्ययुष्मदस्मदि ।३।३।१७॥

सर्वासां विभक्तीनां त्रीणि त्रीणि वचनानि, अन्यस्मिन्नर्थे युष्मदर्थेऽस्मदर्थे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

च वाच्ये यथाक्रमं स्युः । *स पचति, तौ पचतः, ते पचन्ति । पचते, पचेते,* पचन्ते । त्वं पचसि, युवां पचथः, यूयं पचथ । पचसे, पचेथे, पचध्वे । अहं पचामि, आवां पचावः, वयं पचामः । पचे, पचावहे, पचामहे । एवं सर्वासु । द्वययोगे त्रययोगे च पराश्रयमेव वचनम् । स च त्वं च पचथः, स च त्वं न अहं च पचामः ॥१६॥

एक-द्वि-बहुषु ।३।३।१८॥

अन्यादिषु यानि त्रीणि त्रीण्युक्तानि तान्येक-द्वि-बहुष्वर्थेषु स्युः । स पचति, तौ पचतः, ते पचन्तीत्यादि ॥१७॥

नवाऽऽद्यानि शन्तृ-कंसू च परस्मैपदम् ।३।३।१९॥

सर्वविभक्तीनामाद्यानि नव नव वचनानि शन्तृ-कंसू च परस्मैपदानि स्युः । तिव्, तस्, अन्ति ; सिव्, थस्, थ ; मिव् वस्, मस् । एवं सर्वासु ॥१८॥

पराणि काना-ऽऽनशौ चाऽऽत्मनेपदम् ।३।३।२०॥

सर्वविभक्तीनां पराणि नव नव वचनानि कानानशौ चाऽऽत्मनेपदानि स्युः । ते, आते, अन्ते ; से, आथे, ध्वे ; ए, वहे, महे । एवं सर्वासु ॥१९॥

तत् साप्या-ऽनाप्यात् कर्म-भावे, कृत्य-क्त-खलर्थाश्च ।३।३।२१॥

तद् आत्मनेपदं कृत्य-क्त-खलर्थाश्च प्रत्ययाः सकर्मकाद्धातोः **कर्मणि** , अकर्मकादविवक्षितकर्मकाच्च **भावे** स्युः । क्रियते कटश्चैत्रेण, चक्राणः, क्रियमाणः, भूयते त्वया, भूयमानम्, क्रियते, मृदु पच्यते । कार्यः कर्त्तव्यः करणीयः देयः कृत्यः कटस्त्वया, शयितव्यम्, शयनीयम्, शेयम्, कार्यम्, कर्त्तव्यम्, करणीयम्, देयम्, कृत्यं त्वया । कृतः कटः, शयितम्, कृतं त्वया । सुकरः कटस्त्वया, सुशयम्, सुकरं त्वया, सुकटंकराणि वीरणानि, ईषदाढ्यम्भवं भवता, सुज्ञानं तत्त्वं मुनिना, सुग्लानं दीनेन ॥२०॥

इङितः कर्त्तरि ।३।३।२२॥

इदितो ङितश्च धातोः कर्त्तर्यात्मनेपदं स्यात् । एधते, एधमानः, शेते, शयानः ॥२१॥

ई-गितः ।३।३।९५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ईदितो गितश्च धातोः फलवति कर्त्तर्यात्मनेपदं स्यात् । यजते, कुरुते । फलवतीत्येव, यजन्ति, कुर्वन्ति । पृथग्योगः फलवत्कर्त्रर्थः ॥२२॥

शेषात् परस्मै ।३।३।१००॥

येभ्यो धातुभ्यो येन विशेषेणाऽऽत्मनेपदमुक्तं ततोऽन्यस्मात् कर्त्तरि परस्मैपदं स्यात् । भवति, अत्ति ॥२३॥

तृतीयस्य तृतीयः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[तृतीयाध्याये चतुर्थः पादः]

गुपौ-धूप-विच्छि-पणि-पनेरायः ।३।४।१॥

एभ्यो धातुभ्यः स्वार्थे आयः स्यात् । गोपायति, धूपायति, विच्छायति, पणायति, पनायति ॥१॥

कमेर्णिङ् ।३।४।२॥

कमेः स्वार्थे णिङ् स्यात् । कामयते ॥२॥

ऋतेर्डीयः ।३।४।३॥

ऋतेः स्वार्थे डीयः स्यात् । ऋतीयते ॥३॥

अशवि ते वा ।३।४।४॥

गुपादिभ्योऽशव्विषये ते आयादयो वा स्युः । गोपायिता, गोप्ता ; कामयिता, कमिता ; ऋतीयिता, अर्त्तिता ॥४॥

गुप्-तिजो गर्हा-क्षान्तौ सन् ।३।४।५॥

गुपो गर्हायां तिजः क्षान्तौ वर्त्तमानात् स्वार्थे सन् स्यात् । जुगुप्सते, तितिक्षते । गर्हा-क्षान्ताविति किम् ? गोपनम्, तेजनम् ॥५॥

कितः संशय-प्रतीकारे ।३।४।६॥

कितः संशय-प्रतीकारार्थात् स्वार्थे सन् स्यात् । विचिकित्सति, व्याधिं चिकित्सति । संशयप्रतीकारे इति किम् ? केतयति ॥६॥

शान्-दान्-मान्-बधान्निशाना-ऽऽर्जव-विचार-वैरूप्ये दीर्घश्चेतः ।३।४।७॥

एभ्यो यथासङ्ख्यं निशानाद्यर्थेभ्यः स्वार्थे सन् स्यात्, दीर्घश्चैषां द्वित्वे पूर्वस्येतः । शीशांसति, दीदांसति, मीमांसते, बीभत्सते । अर्थोक्तिः किम् ? अर्थान्तरे मा भूत्, निशानम्, अवदानम्, मानयति, बाधयति ॥७॥

धातोः कण्ड्वादेर्यक् ।३।४।८॥

एभ्यो धातुभ्यः स्वार्थे यक् स्यात् । कण्ड्यति, कण्ड्यते, महीयते । धातोरिति किम् ? कण्डूः ॥८॥

व्यञ्जनादेरेकस्वराद् भृशा-ऽऽभीक्ष्ण्ये यङ् वा ।३।४।९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गुणक्रियाणामधिश्रयणादीनांक्रियान्तराव्यवधानेनसाकल्येनसंपत्तिःफलाति-रेको वा भृशत्वम्, प्रधानक्रियाया विक्लेदादेः क्रियान्तराव्यवधानेनाऽऽवृत्तिराभी-क्ष्ण्यम्, तद्विशिष्टार्थवृत्तेर्धातोर्व्यञ्जनादेरेकस्वराद् यङ् वा स्यात् । पापच्यते । व्यञ्जनादेरिति किम् ? भृशमीक्षते । एकस्वरादिति किम् ? भृशं चकास्ति । भृशाभीक्ष्ण्य इति किम् ? पचति । वेति किम् ? लुनीहि लुनीहीत्येवायं लुनातीत्यादि ॥९॥

अटर्त्ति-सूत्रि-मूत्रि-सूच्यशूर्णोः ।३।४।१०॥

एभ्यो भृशा-ऽऽभीक्ष्ण्यार्थवृत्तिभ्यो यङ् स्यात् । अटाट्यते, अरार्यते, सोसूत्र्यते, मोमूत्र्यते, सोसूच्यते, अशाश्यते, प्रोण्णोन्यूयते ॥१०॥

गत्यर्थात् कुटिले ।३।४।११॥

व्यञ्जनादेरेकस्वराद् गत्यर्थात् कुटिले एवार्थे वर्त्तमानाद् धातोर्यङ् स्यात् । चङ्क्रम्यते । कुटिल इति किम् ? भृशं क्रामति ॥११॥

गृ-लुप-सद-चर-जप-जभ-दश-दहो गर्ह्ये ।३।४।१२॥

गर्ह्यार्थेभ्य एव एभ्यो यङ् स्यात् । निजेगिल्यते, लोलुप्यते, सासद्यते, चञ्चूर्यते, जञ्जप्यते, जञ्जभ्यते दन्दश्यते, दन्दह्यते । गर्ह्ये इति किम् ? साधु जपति, भृशं निगिरति ॥१२॥

न गृणा-शुभ-रुचः ।३।४।१३॥

एभ्यो यङ् न स्यात् । निन्द्यं गृणाति, भृशं शोभते, भृशं रोचते ॥१३॥

बहुलं लुप् ।३।४।१४॥

यङो लुप् बहुलं स्यात् । बोभूयते, बोभवीति । बहुलवचनात् क्वचिन्न भवति—लोलूया, पोपूया ॥१४॥

अचि ।३।४।१५॥

यङोऽचि परे लुप् स्यात् । चेच्यः ॥१५॥

नोतः ।३।४।१६॥

उदन्ताद् विहितस्य यङोऽचि लुब् न स्यात् । रोरूयः ॥१६॥

चुरादिभ्यो णिच् ।३।४।१७॥

एभ्यो धातुभ्यः स्वार्थे णिच् स्यात् । चोरयति । पदयते ॥१७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

युजादेर्नवा ।३।४।१८॥

एभ्यः स्वार्थे णिच् वा स्यात् । योजयति, साहयति, योजति, सहति ॥१८॥

भूङः प्राप्तौ णिङ् ।३।४।१९॥

भुवः प्राप्त्यर्थाण्णिङ् वा स्यात् । भावयते, भवते । प्राप्ताविति किम् ? भवति ॥१९॥

प्रयोक्तृव्यापारे णिग् ।३।४।२०॥

कुर्वन्तं यः प्रयुङ्क्ते तद्व्यापारे वाच्ये धातोर्णिग् वा स्यात् । कारयति, भिक्षा वासयति, राजानमागमयति, कंसं घातयति, पुष्येण चन्द्रं योजयति, उज्जयन्याः प्रस्थितो माहिष्मत्यां सूर्यमुद्गमयति ॥२०॥

+ तुमर्हादिच्छायां सन्नतत्सनः ।३।४।२१॥

यो धातुरिषेः कर्म इषिणैव च समानकर्तृकः स तुमर्हः, तस्मादिच्छायामर्थे सन् वा स्यात्, न त्विच्छासन्नन्तात् । चिकीर्षति । गन्तुमिच्छति जिगमिषति । तुमर्हादिति किम् ? यानेनेच्छति, भुक्तिमिच्छति मैत्रस्य । इच्छायामिति किम् ? भोक्तुं याति । अतत्सन इति किम् ? चिकीर्षितुमिच्छति । तदिति किम् ? जुगुप्सिषते ॥२१॥

द्वितीयायाः काम्यः ।३।४।२२॥

द्वितीयान्तादिच्छायां काम्यो वा स्यात् । इदंकाम्यति । द्वितीयाया इति किम् ? इष्टः पुत्रः ॥२२॥

अमाव्ययात् क्यन् च ।३।४।२३॥

मान्ता-ऽव्ययाभ्यामन्यस्माद् द्वितीयान्तादिच्छायां क्यन् काम्यश्च वा स्यात् । पुत्रीयति, पुत्रकाम्यति । अमाव्ययादिति किम् ? इदमिच्छति, स्वरिच्छति ॥२३॥

आधाराच्चोपमानादाचारे ।३।४।२४॥

अमाव्ययादुपमानाद् द्वितीयान्तादाधाराच्चाऽऽचारार्थे क्यन् वा स्यात् । पुत्रीयति च्छात्रम्, प्रासादीयति कुटीम् ॥२४॥

कर्तुः किप्, गल्भ-क्लीब-होडात्तु ङित् ।३।४।२५॥

कर्तुरुपमानान्नाम्न आचारेऽर्थे किप् वा स्यात्, गल्भ-क्लीब-होडेभ्यस्तु स

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एव ङित् । अश्वति, गल्भते, क्लीबते, होडते ॥२५॥

क्यङ् ।३।४।२६॥

कर्तुरुपमानादाचारेऽर्थे क्यङ् वा स्यात् । हंसायते ॥२६॥

सो वा लुक् च ।३।४।२७॥

सन्तात् कर्तुरुपमानादाचारेऽर्थे क्यङ् वा स्यादन्तस्य च सो वा लुक् । पयायते, पयस्यते ॥२७॥

ओजोऽप्सरसः ।३।४।२८॥

आभ्यां कर्तुरुपमानाभ्यामाचारे क्यङ् वा स्यात्, सश्च लुक् । ओजायते, अप्सरायते ॥२८॥

च्व्यर्थे भृशादेः स्तोः ।३।४।२९॥

भृशादेः कर्तुश्च्व्यर्थे क्यङ् वा स्यात्, यथासम्भवं स्तोर्लुक् च । भृशायते, उन्मनायते, वेहायते । कर्तुरित्येव, अभृशं भृशं करोति । च्व्यर्थ इति किम् ? भृशो भवति ॥२९॥

डाच्-लोहितादिभ्यः षित् ।३।४।३०॥

डाजन्तेभ्यो लोहितादिभ्यश्च कर्तृभ्यश्च्व्यर्थे क्यङ् षित् स्यात् । पटपटायति, पटपटायते ; लोहितायति, लोहितायते । कर्तुरित्येव, अपटपटा पटपटा करोति । च्व्यर्थ इत्येव, लोहितो भवति ॥३०॥

सुखादेरनुभवे ।३।४।३४॥

साक्षात्कारेऽर्थे सुखादेः कर्मणः क्यङ् वा स्यात् । सुखायते, दुःखायते ॥३१॥

शब्दादेः कृतौ वा ।३।४।३५॥

एभ्यः कर्मभ्यः कृतावर्थे क्यङ् वा स्यात् । शब्दायते, वैरायते ॥३२॥

तपसः क्यन् ।३।४।३६॥

अस्मात् कर्मणः कृतावर्थे क्यन् वा स्यात् । तपस्यति ॥३३॥

नमो-वरिवश्चित्रङोऽर्चा-सेवा-ऽऽश्चर्ये ।३।४।३७॥

एभ्यः कर्मभ्यो यथासंख्यमर्चादिष्वर्थेषु क्यन् वा स्यात् । नमस्यति, वरिवस्यति, चित्रीयते ॥३४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अङ्गान्निरसने णिङ् ।३।४।३८॥

अङ्गवाचिनः कर्मणो निरसनेऽर्थे णिङ् वा स्यात् । हस्तयते, पादयते ॥३५॥

पुच्छादुत्-परि-व्यसने ।३।४।३९॥

पुच्छात् कर्मण उदसने पर्यसने व्यसनेऽसने चार्थे णिङ् वा स्यात् । उत्पुच्छयते, परिपुच्छयते, विपुच्छयते, पुच्छयते ॥३६॥

भाण्डात् समाचितौ ।३।४।४०॥

भाण्डात् कर्मणः समाचितावर्थे णिङ् वा स्यात् । सम्भाण्डयते, परिभाण्डयते ॥३७॥

चीवरात् परिधा-ऽर्जने ।३।४।४१॥

अस्मात् कर्मणः परिधानेऽर्जने चार्थे णिङ् [वा] स्यात् । परिचीवरयते, चीवरयते ॥३८॥

णिज्बहुलं नाम्नः कृगादिषु ।३।४।४२॥

कृगादीनां धातूनामर्थे नाम्नो णिच् बहुलं स्यात् । मुण्डं करोति मुण्डयति च्छात्रम्, पटुमाचष्टे पटयति, वृक्षं रोपयति वृक्षयति, कृतं गृह्णाति कृतयति ॥३९॥

व्रताद् भुजि-तन्निवृत्त्योः ।३।४।४३॥

व्रतं शास्त्र(स्त्रि ?)तो नियमः, व्रताद् भुज्यर्थात् तन्निवृत्त्यर्थाच्च कृगादिष्वर्थेषु णिज्बहुलं स्यात् । पयो व्रतयति, सावद्यान्नं व्रतयति ॥४०॥

सत्या-ऽर्थ-वेदस्याः ।३।४।४४॥

एषां णिच्सन्नियोगे आः स्यात् । सत्यापयति, अर्थापयति, वेदापयति ॥४१॥

धातोरनेकस्वरादाम् परोक्षायाः कृभ्वस्ति चानु तदन्तम् ।३।४।४६॥

अनेकस्वराद्धातोः परस्याः परोक्षायाः स्थाने आम् स्यात्, आमन्ताच्च परे कृभ्वस्तयः परोक्षान्ता **अनु** पश्चादनन्तरं प्रयुज्यन्ते । चकासाञ्चकार, चकासाम्बभूव, चकासामास । अनेकस्वरादिति किम् ? पपाच । अनुर्विपर्यास-व्यवहितनिवृत्त्यर्थः, तेन चकारचकासाम्, ईहांचैत्रश्चक्रे इत्यादि न स्यात् ॥४२॥

दया-ऽया-ऽऽस्-कासः ।३।४।४७॥

एभ्यो धातुभ्यः परस्याः परोक्षाया आम् स्यात्, आमन्ताच्च परे कृभ्वस्तयः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परोक्षान्ता अनु प्रयुज्यन्ते । दयाञ्चक्रे, दयाम्बभूव, दयामास ; पलायाञ्चक्रे, आसाञ्चक्रे, कासाञ्चक्रे ॥४३॥

गुरुनाम्यादेरनृच्छूर्ण्णोः ।३।४।४८॥

गुरुर्नाम्यादिर्यस्य तस्माद्धातोः, ऋच्छूर्ण्णुवर्जात् परस्याः परोक्षाया आम् स्यात्, आमन्ताच्च परे कृभ्वस्तयः परोक्षान्ता अनु प्रयुज्यन्ते । ईहाञ्चक्रे, ईहाम्बभूव, ईहामास । गुर्विति किम् ? इयेष । नामीति किम् ? आनर्च । आदीति किम् ? निनाय । अनृच्छूर्ण्णोरिति किम् ? आनर्च्छ, प्रोर्ण्णुनाव ॥४४॥

जाग्रुष-समिन्धेर्नवा ।३।४।४९॥

एभ्यो धातुभ्यः परस्याः परोक्षाया आम् वा स्यात्, आमन्ताच्च परे कृभ्वस्तयः परोक्षान्ता अनु प्रयुज्यन्ते । जागराञ्चकार, जागराम्बभूव, जागरामास, जजागार ; ओषाञ्चकार, उवोष ; समिन्धाञ्चक्रे, समीधे ॥४५॥

भी-ह्री-भृ-होस्तिव्वत् ।३।४।५०॥

एभ्यः परस्याः परोक्षाया आम् वा स्यात्, स च तिव्वत्, आमन्ताच्च परे कृभ्वस्तयः परोक्षान्ता अनु प्रयुज्यन्ते । बिभयाञ्चकार, बिभयाम्बभूव, बिभयामास, बिभाय ; जिह्रयाञ्चकार, जिह्राय ; बिभराञ्चकार, बभार ; जुहवाञ्चकार, जुहाव ॥४६॥

वेत्तेः कित् ।३।४।५१॥

वेत्तेः परस्याः परोक्षाया आम् किद् वा स्याद्, आमन्ताच्च कृभ्वस्तयोऽनु प्रयुज्यन्ते । विदाञ्चकार, विवेद ॥४७॥

पञ्चम्याः कृग् ।३।४।५२॥

वेत्तेः परस्याः पञ्चम्याः किदाम् वा स्यात्, आमन्ताच्च परः पञ्चम्यन्तः कृगनु प्रयुज्यते । विदाङ्करोतु, वेत्तु ॥४८॥

सिजद्यतन्याम् ।३।४।५३॥

अद्यतन्यां परस्यां धातोः परः सिच् स्यान्नित्यम् । अनैषीत् ॥४९॥

स्पृश-मृश-कृष-तृप-दृपो वा ।३।४।५४॥

एभ्योऽद्यतन्यां सिज् वा स्यात् । अस्प्राक्षीत्, अस्पृक्षत् ; अम्राक्षीत्, अमृक्षत् ; अक्राक्षीत्, अकृक्षत् ; अत्राप्सीत्, अतृपत् ; अद्राप्सीत्,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अदपत् ॥५०॥

ह-शिटो नाम्युपान्त्यादद्दशोऽनिटः सक् ।३।४।५५॥

हशिडन्तान्नाम्युपान्त्यादद्दशोऽनिटोऽद्यतन्यां सक् स्यात् । अधुक्षत्, अविक्षत् । ह-शिट इति किम् ? अभैत्सीत् । नाम्युपान्त्यादिति किम् ? अधाक्षीत् । अनिट इति किम् ? अकोषीत् ॥५१॥

श्लिषः ।३।४।५६॥

श्लिषोऽनिटोऽद्यतन्यां सक् स्यात् । आश्लिक्षत् कन्यां मैत्रः । अनिट इति किम् (इत्येव), अश्लेषीत् ॥५२॥

नाऽसत्त्वाश्लेषे ।३।४।५७॥

श्लिषोऽप्राण्याश्लेषार्थात् सक् न स्यात् । उपाश्लिषत् जतु च काष्ठं च । असत्त्वाश्लेष इति किम् ? व्यत्यश्लिक्षन्त मिथुनानि ॥५३॥

णि-श्रि-द्रु-स्रु-कमः कर्त्तरि ङः ।३।४।५८॥

ण्यन्तात् श्र्यादेश्च कर्त्तर्यद्यतन्यां ङः स्यात् । अचीकरत्, अशिश्रियत्, अदुद्रुवत्, असुस्रुवत्, अचकमत । कर्त्तरीति किम् ? अकारयिषातां कटौ मैत्रेण ॥५४॥

ट्वे-श्वेर्वा ।३।४।५९॥

आभ्यां कर्त्तर्यद्यतन्यां ङो वा स्यात् । अदधत्, अधात् ; अशिश्वियत्, अश्वत् । कर्त्तरीत्येव, अधिषातां गावौ वत्सेन ॥५५॥

शास्त्यसू-वक्ति-ख्यातेरङ् ।३।४।६०॥

एभ्यः कर्त्तर्यद्यतन्याम् अङ् स्यात् । अशिषत्, अपास्थत्, अवोचत्, आख्यत् । कर्त्तरीत्येव, अशासिषातां शिष्यौ गुरुणा ॥५६॥

सर्त्यर्तेर्वा ।३।४।६१॥

आभ्यां कर्त्तर्यद्यतन्याम् अङ् वा स्यात् । असरत्, असार्षीत् ; आरत्, आर्षीत् ॥५७॥

ह्वा-लिप्-सिचः ।३।४।६२॥

एभ्यः कर्त्तर्यद्यतन्याम् अङ् स्यात् । आह्वत्, अलिपत्, असिचत् ॥५८॥

वाऽऽत्मने ।३।४।६३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ह्वादेः कर्त्तर्यद्यतन्यामात्मनेपदे वाऽङ् स्यात् । आह्वत, आह्वास्त ; अलिपत, अलिप्त ; असिचत, असिक्त ॥५९॥

लृदिद्-द्युतादि-पुष्यादेः परस्मै ।३।४।६४॥

लृदितो द्युतादेः पुष्यत्यादेश्च कर्त्तर्यद्यतन्यां परस्मैपदेऽङ् स्यात् । अगमत् ; अद्युतत्, अरुचत् ; अपुषत्, औचत् । परस्मैपद इति किम् ? समगंस्त ॥६०॥

ऋदिच्छ्वि-स्तम्भू-म्रुचू-म्लुचू-ग्लुचू-ग्लुञ्चू-ग्रो वा ।३।४।६५॥

ऋदितः श्व्यादेश्च कर्त्तर्यद्यतन्यां परस्मैपदेऽङ् वा स्यात् । अरुधत्, अरौत्सीत् ; अश्वत्, अश्वयीत् ; अस्तभत्, अस्तम्भीत् ; अम्रुचत्, अम्रोचीत्, अम्लुचत्, अम्लोचीत् ; अग्लुचत्, अग्लोचीत् ; अग्लुचत्, अग्लुक्षीत् ; अजरत्, अजारीत् ॥६१॥

ञिच् ते पदस्तलुक् च ।३।४।६६॥

पद्यतेः कर्त्तर्यद्यतन्यास्ते परे ञिच् स्याद्, निमित्तस्य च लुक् । उदपादि । त इति किम् ? उदपत्साताम् ॥६२॥

दीप-जन-बुधि-पूरि-ताय-प्यायो वा ।३।४।६७॥

एभ्यः कर्त्तर्यद्यतन्यास्ते परे ञिच् वा स्यात्, तलुक् च । अदीपि, अदीपिष्ट ; अजनि, अजनिष्ट ; अबोधि, अबुद्ध ; अपूरि, अपूरिष्ट ; अतायि, अतायिष्ट ; अप्यायि, अप्यायिष्ट ॥६३॥

भाव-कर्मणोः ।३।४।६८॥

सर्वस्माद् धातोर्भाव-कर्मविहितेऽद्यतन्यास्ते ञिच् स्यात्, तलुक् च । आसि त्वया, अकारि कटः ॥६४॥

स्वर-ग्रह-दृश-हन्भ्यः स्य-सिजाशीः-श्वस्तन्यां ञिट् वा ।३।४।६९॥

स्वरान्ताद् ग्रहादेश्च विहितासु भावकर्मजासु ञिड् वा स्य-सिजाशीः-श्वस्तनीषु स्यात् । दायिष्यते, दास्यते ; अदायिष्यत, अदास्यत ; अदायिषाताम्, अदिषाताम् ; दायिषीष्ट, दासीष्ट ; दायिता, दाता । ग्राहिष्यते, ग्रहीष्यते ; अग्राहिषाताम्, अग्रहीषाताम् ; ग्राहिषीष्ट ग्रहीषीष्ट ; ग्राहिता, ग्रहीता । दर्शिष्यते, द्रक्ष्यते ; अदर्शिषाताम्, अद्राक्षाताम् ; दर्शिषीष्ट, द्रक्षीष्ट ; दर्शिता, द्रष्टा । घानिष्यते, हनिष्यते ; अघानिषाताम्, अवधिषाताम् ; घानिषीष्ट, वधिषीष्ट ;

Jain Education International For Private & Personal Use Only www.jainelibrary.org

घानिता, हन्ता ॥६५॥

क्यः शिति ।३।४।७०॥

सर्वस्माद् धातोर्भाव-कर्मविहिते शिति क्यः स्यात् । शिष्यते त्वया, क्रियते कटः । शितीति किम् ? बभूवे ॥६६॥

कर्त्तर्यनद्भ्यः शव् ।३।४।७१॥

अदादिवर्जाद् धातोः कर्त्तरि विहिते शिति शव् स्यात् । भवति । कर्त्तरीति किम् ? पच्यते । अनद्भ्य इति किम् ? अत्ति ॥६७॥

दिवादेः श्यः ।३।४।७२॥

दिवादेः कर्तृविहिते शिति श्यः स्यात् । दीव्यति, जीर्यति ॥६८॥

भ्रास-भ्लास-भ्रम-क्रम-क्लम-त्रसि-त्रुटि-लषि-यसि-संयसेर्वा ।३।४।७३॥

एभ्यः कर्तृविहिते शिति श्यो वा स्यात् । भ्रास्यते, भ्रासते ; भ्लास्यते, भ्लासते ; भ्राम्यति, भ्रमति ; क्राम्यति, क्रामति ; क्लाम्यति, क्लामति ; त्रस्यति, त्रसति ; त्रुट्यति, त्रुटति ; लष्यति, लषति ; यस्यति, यसति ; संयस्यति, संयसति ॥६९॥

कृषि-रञ्जेर्व्याप्ये वा परस्मै च ।३।४।७४॥

आभ्यां व्याप्ये कर्त्तरि शिद्विषये परस्मैपदं वा स्यात्, तद्योगे श्यश्च । कृष्यति कृष्यते वा पादः स्वयमेव ; रज्यति रज्यते वा वस्त्रं स्वयमेव । व्याप्ये कर्त्तरीति किम् ? कृष्णाति पादं रोगः । रजति वस्त्रं शिल्पी । शितीत्येव, अकोषि ॥७०॥

स्वादेः श्नुः ।३।४।७५॥

स्वादेः कर्तृविहिते शिति श्नुः स्यात् । सुनोति, सिनोति ॥७१॥

वाऽक्षः ।३।४।७६॥

अक्षः कर्तृविहिते शिति श्नुर्वा स्यात् । अक्ष्णोति, अक्षति ॥७२॥

तक्षः स्वार्थे वा ।३।४।७७॥

स्वार्थः तनुत्वम्, तदवृत्तेस्तक्षः कर्तृविहिते शिति श्नुर्वा स्यात् । तक्ष्णोति, तक्षति । स्वार्थ इति किम् ? संतक्षति शिष्यम् ॥७३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्तम्भू-स्तुम्भू-स्कम्भू-स्कुम्भू-स्कोः श्ना च ।३।४।७८॥

स्तम्भ्वादेः सौत्राद् धातोः, स्कुगश्च कर्तृविहिते शिति श्नाः श्नुश्च स्यात् । स्तभ्नाति, ++ स्तभ्नोति ; स्तुभ्नाति, स्तुभ्नोति ; स्कभ्नाति, स्कभ्नोति ; स्कुभ्नाति, स्कुभ्नोति ; स्कुनाति, स्कुनोति ॥७४॥

क्र्यादेः ।३।४।७९॥

क्र्यादेः कर्तृविहिते शिति श्ना स्यात् । क्रीणाति, प्रीणाति ॥७५॥

व्यञ्जनाच्छ्नाहेरानः ।३।४।८०॥

व्यञ्जनात् परस्य श्नायुक्तस्य हेः आनः स्यात् । पुषाण । व्यञ्जनादिति किम् ? लुनीहि ॥७६॥

तुदादेः शः ।३।४।८१॥

एभ्यः कर्तृविहिते शिति शः स्यात् । तुदति, तुदते ॥७७॥

रुधां स्वराच्छ्नो नलुक् च ।३।४।८२॥

रुधादीनां स्वरात् परः कर्तृविहिते शिति श्नः स्यात्, तद्योगे च प्रकृतेर्नो लुक् । रुणद्धि, हिनस्ति ॥७८॥

कृग्-तनादेरुः ।३।४।८३॥

कृगस्तनादिभ्यश्च कर्तृविहिते शिति उः स्यात् । करोति, तनोति ॥७९॥

सृजः श्राद्धे ञि-क्या-ऽऽत्मने तथा ।३।४।८४॥

सृजः पराणि श्रद्धावति कर्त्तरि ञि-क्या-ऽऽत्मनेपदानि **स्युस्तथा** यथा विहितानि । असर्जि, सृज्यते, स्रक्ष्यते वा मालां धार्मिकः । श्राद्ध इति किम् ? व्यत्यसृष्ट माले मिथुनम् ॥८०॥

एकधातौ कर्मक्रिययैकाऽकर्मक्रिये ।३।४।८६॥

एकस्मिन् धातौ कर्मस्थक्रियया पूर्वदृष्टया **एका** अभिन्ना सम्प्रत्यकर्मिका क्रिया यस्य तस्मिन् कर्त्तरि कर्मकर्तृरूपे धातोर्ञि-क्या-ऽऽत्मनेपदानि स्युः । अकारि क्रियते करिष्यते वा कटः स्वयमेव । एकधाताविति किम् ? पचत्योदनं चैत्रः, सिध्यत्योदनः स्वयमेव । कर्मक्रिययेति किम् ? साध्वसिश्छिनत्ति । एकक्रिय इति किम् ? स्रवत्युदकं कुण्डिका, अकर्मक्रिय इति किम् ? भिद्यमानः कुशूलः पात्राणि भिनत्ति ॥८१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्याचार्यश्रीहेमचन्द्रविरचितायां **स्वोपज्ञसिद्धहेमचन्द्रशब्दानुशासनरहस्यवृत्तौ**
तृतीयस्य चतुर्थः ॥
तृतीयोऽध्यायः समाप्तः ॥३।४।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[अथ चतुर्थोऽध्यायः] [प्रथमः पादः]

द्विर्धातुः परोक्षा-डे, प्राक् तु स्वरे स्वरविधेः ।४।१।१॥

परोक्षायां डे च परे धातुर्द्विः स्यात्, स्वरादौ तु द्वित्वनिमित्ते स्वरस्य कार्यात् प्रागेव । पपाच, अचकमत । धातुरिति किम् ? प्राशिश्रियत् । प्रागिति किम् ? चक्रतुः । स्वर इति किम् ? जेग्रीयते । स्वरविधेरिति किम् ? शुशाव । प्राक् तु स्वरे स्वरविधेरिति आद्विर्वचनमधिकारः ॥१॥

आद्योंऽश एकस्वरः ।४।१।२॥

धातोराद्य एकस्वरोऽवयवः परोक्षा-डे परे द्विः स्यात् । जजागार, अचीकरत् ॥२॥

सन्-यङश्च ।४।१।३॥

सन्नन्तस्य यङन्तस्य चाऽऽद्य एकस्वरोंऽशो द्विः स्यात् । तितिक्षते, पापच्यते ॥३॥

स्वरादेर्द्वितीयः ।४।१।४॥

स्वरादेर्द्वर्युक्तिभाजो द्वितीयोंऽश एकस्वरो द्विः स्यात् । अटिटिषति, अशाश्यते । प्राक् तु स्वरे स्वरविधेरित्येव, आटिटत् ॥४॥

न ब-द-नं संयोगादिः ।४।१।५॥

स्वरादेर्धातोर्द्वितीयस्यांशस्यैकस्वरस्य ब-द-नाः संयोगस्याद्या न द्विः स्युः । उज्जिजिषति, अट्टिटिषते, उन्दिदिषति । संयोगादिरिति किम् ? प्राणिणिषति ॥५॥

अयि रः ।४।१।६॥

स्वरादेर्धातोर्द्वितीयस्यांशस्यैकस्वरस्य संयोगादी रो द्विर्न स्यात्, न तु रादनन्तरे यि । अर्चिचिषति । अयीति किम् ? अरार्यते ॥६॥

हवः शिति ।४।१।१२॥

जुहोत्यादयः शिति द्विः स्युः । जुहोति ॥७॥

ज्ञप्यापो ज्ञीपीपौ, न च द्विः सि सनि ।४।१।१६॥

ज्ञपेरापेश्च सादौ सनि परे यथासङ्ख्यं ज्ञीपीपौ स्याताम्, नचाऽनयोरेकस्वरोंऽशो द्विः । ज्ञीप्सति, ईप्सति । सीति किम् ? जिज्ञपयिषति *मारण-तोषण-निशाने*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ज्ञश्च [४।२।३०] इति णौ ह्रस्वः ॥८॥

ऋध ईर्त् ।४।१।१७॥

ऋधः सादौ सनि परे ईर्त् स्यात्, न चाऽस्य द्विः । ईर्त्सति । सीत्येव, अर्दिधिषति ॥९॥

दम्भो धिप्-धीप् ।४।१।१८॥

दम्भेः सि सनि धिप्-धीपौ स्यातां न चाऽस्य द्विः । धिप्सति, धीप्सति । सीत्येव, दिदम्भिषति ॥१०॥

अव्याप्यस्य मुचेर्मोग्वा ।४।१।१९॥

मुचेरकर्मणः सि सनि मोक् वा स्यात्, न चाऽस्य द्विः । मोक्षति, मुमुक्षति चैत्रः । अव्याप्यस्येति किम् ? मुमुक्षति वत्सम् ॥११॥

मि-मी-मा-दामित् स्वरस्य ।४।१।२०॥

मि-मी-मा-दासंज्ञानां स्वरस्य सि सनि इत् स्यात्, न च द्विः । मित्सति, मित्सते, मित्सति, दित्सति, धित्सति ॥१२॥

रभ-लभ-शक-पत-पदामिः ।४।१।२१॥

एषां स्वरस्य सि सनि इः स्यात्, न च द्विः । आरिप्सते, लिप्सते, शिक्षति, पित्सति, पित्सते । सीत्येव, पिपतिषति ॥१३॥

राधेर्वधे ।४।१।२२॥

राधेर्हिंसार्थस्य सि सनि स्वरस्य इः स्यात्, न च द्विः । प्रतिरित्सति । वध इति किम् ? आरिरात्सति ॥१४॥

अवित्परोक्षा-सेट्थवोरेः ।४।१।२३॥

राधेर्हिंसार्थस्याऽविति परोक्षायां थवि च सेटि स्वरस्य एः स्यात्, न च द्विः । रेधुः, रेधिथ । अविदिति किम् ? अपरराध । वध इत्येव, आरराधतुः ॥१५॥

अनादेशादेरकव्यञ्जनमध्येऽतः ।४।१।२४॥

अवित्परोक्षा-सेट्थवोश्चरयोर्योऽनादेशादिस्तत्सम्बन्धिनस्वरस्याऽतोऽसहाय-व्यञ्जनयोर्मध्यगतस्य एः स्यात्, न च द्विः । पेचुः, पेचिथ, नेमुः, नेमिथ । अनादेशादेरिति किम् ? दिदिवतुः । एकव्यञ्जनमध्य इति किम् ? ततक्षिथ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अत इति किम् ? दिदिवुः । सेट्थवीत्येव, पपक्थ ॥१६॥

तृ-त्रप-फल-भजाम् ।४।१।२५॥

एषामवित्परोक्षा-सेट्थवोः स्वरस्य एः स्यात्, न च द्विः । तेरुः, तेरिथ, त्रेपे, फेलुः, फेलिथ ; भेजुः, भेजिथ ॥१७॥

वा श्रन्थ-ग्रन्थो न्लुक् च ।४।१।२७॥

अनयोः स्वरस्यावित्परोक्षा-सेट्थवोरेर्वा स्यात्, तद्योगे च नो लुक्, न च द्विः । श्रेथुः, शश्रन्थुः ; श्रेथिथ, शश्रन्थिथ । ग्रेथुः, जग्रन्थुः ; ग्रेथिथ, जग्रन्थिथ ॥१८॥

दम्भः ।४।१।२८॥

दम्भेः स्वरस्यावित्परोक्षायाम् एः स्यात्, न च द्विः, तद्योगे च नो लुक् । देभुः ॥१९॥

थे वा ।४।१।२९॥

दम्भेः स्वरस्य थवि एर्वा स्यात्, तद्योगे च नो लुक्, न च द्विः । देभिथ, ददम्भिथ ॥२०॥

न शस-दद-वादि-गुणिनः ।४।१।३०॥

शसि-दद्योर्वादीनां [गुणिनां] च स्वरस्य एर्न स्यात् । विशशसुः, विशशसिथ ; दददे ; वक्वले ; विशशरुः, विशशरिथ ॥२१॥

हौ दः ।४।१।३१॥

दासंज्ञस्य हौ परे एः स्यात्, न च द्विः । देहि, धेहि ॥२२॥

देर्दिगिः परोक्षायाम् ।४।१।३२॥

देङः परोक्षायां दिगिः स्यात्, न च द्विः । दिग्ये ॥२३॥

ङे पिबः पीप्य् ।४।१।३३॥

ण्यन्तस्य पिबतेर्ङे परे पीप्य् स्यात्, न च द्विः । अपीप्यत् ॥२४॥

अङे हि-हनो हो घः पूर्वात् ।४।१।३४॥

हि-हनोर्ङवर्जे प्रत्यये परे द्वित्वे सति पूर्वस्मात् परस्य हो घः स्यात् । प्रजिघाय, जंघन्यते । अङे इति किम् ? प्राजीहयत् ॥२५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जेर्गिः सन्-परोक्षयोः ।४।१।३५॥

सन्-परोक्षयोर्द्वित्वे सति पूर्वात् परस्य जेर्गिः स्यात् । जिगीषति, विजिग्ये ॥२६॥

चेः किर्वा ।४।१।३६॥

सन्-परोक्षयोर्द्वित्वे सति पूर्वात् परस्य चेः किर्वा स्यात् । चिकीषति, चिचीषति ; चिक्ये, चिच्ये ॥२७॥

पूर्वस्याऽस्वे स्वरे योरियुव् ।४।१।३७॥

द्वित्वे सति यः पूर्वस्तत्सम्बन्धिनोरिवर्णोतोरस्वे स्वरे परे इयुवौ स्याताम् । इयेष, अरियर्त्ति, उवोष । अस्व इति किम् ? ईषतुः । स्वर इति किम् ? इयाज ॥२८॥

ऋतोऽत् ।४।१।३८॥

द्वित्वे सति पूर्वस्य ऋतोऽत् स्यात् । चकार ॥२९॥

ह्रस्वः ।४।१।३९॥

द्वित्वे सति पूर्वस्य ह्रस्वः स्यात् । पपौ ॥३०॥

ग-होर्जः ।४।१।४०॥

द्वित्वे सति पूर्वयोर्ग-होर्जः स्यात् । जगाम, जहास ॥३१॥

द्युतेरिः ।४।१।४१॥

द्युतेर्द्वित्वे सति पूर्वस्य इः स्यात् । दिद्युते ॥३२॥

द्वितीय-तुर्ययोः पूर्वौ ।४।१।४२॥

द्वित्वे पूर्वस्य द्वितीय-तुर्ययोर्यथासङ्ख्यं पूर्वौ आद्य-तृतीयौ स्याताम् । चखान, जझाम ॥३३॥

तिर्वा ष्ठिवः ।४।१।४३॥

ष्ठिवेर्द्वित्वे पूर्वस्य द्वितीयस्य तिर्वा स्यात् । तिष्ठेव, टिष्ठेव ॥३४॥

व्यञ्जनस्याऽनादेर्लुक् ।४।१।४४॥

द्वित्वे पूर्वस्य व्यञ्जनस्याऽनादेर्लुक् स्यात् । जग्ले । अनादेरिति किम् ? आदेर्मा भूत्, पपाच ॥३५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अघोषे शिटः ।४।१।४५।।

द्वित्वे पूर्वस्य शिटस्तत्सम्बन्धिन्येवाऽघोषे लुक् स्यात् । चुश्च्योत । अघोष इति किम् ? सस्रौ ।।३६।।

क-ङश्च-ञ् ।४।१।४६।।

द्वित्वे पूर्वयोः क-ङोर्यथासङ्ख्यं च-ञौ स्याताम् । चकार, ञुडुवे ।।३७।।

न कवतेर्यङः ।४।१।४७।।

यङन्तस्य कवतेर्द्वित्वे सति र्यस्य कश्चो न स्यात् । कोकूयते खरः । कवतेरिति किम् ? कौति-कुवत्योः चोकूयते । यँङ इति किम् ? चुकुवे ।।३८।।

आ-गुणावन्यादेः ।४।१।४८।।

यङन्तस्य द्वित्वे पूर्वस्य न्याद्यागमवर्जस्य आ-गुणौ स्याताम् । पापच्यते, लोलूयते । अन्यादेरिति किम् ? वनीवच्यते, जंजन्यते ।।३९।।

वश्च-स्रंस-ध्वंस-भ्रंश-कस-पत-पद-स्कन्दोऽन्तो नी ।४।१।५०।।

एषां यङन्तानां द्वित्वे पूर्वस्य नीरन्तः स्यात् । वनीवच्यते, सनीस्रस्यते, दनीध्वस्यते बनीभ्रश्यते, चनीकस्यते, पनीपत्यते, पनीपद्यते, चनीस्कद्यते ।।४०।।

मुरतोऽनुनासिकस्य ।४।१।५१।।

आत् परो योऽनुनासिकस्तदन्तस्य यङन्तस्य द्वित्वे पूर्वस्य मुरन्तः स्यात् । बम्भण्यते । अत इति किम् ? तेतिम्यते । अनुनासिकस्येति किम् ? पापच्यते ।।४१।।

जप-जभ-दह-दश-भञ्ज-पशः ।४।१।५२।।

एषां यङन्तानां द्वित्वे पूर्वस्य मुरन्तः स्यात् । जञ्जप्यते, जञ्जभ्यते, दन्दह्यते, दन्दश्यते, बम्भज्यते, पम्पश्यते ।।४२।।

चर-फलाम् ।४।१।५३।।

एषां यङतानां द्वित्वे पूर्वस्य मुरन्तः स्यात् । चञ्चूर्यते, पम्फुल्यते ।।४३।।

ति चोपान्त्याऽतोऽनोदुः ।४।१।५४।।

यङन्तानां चर-फलां तादौ च प्रत्यये उपान्त्यस्याऽत उः स्यात्, न च तस्यौत् । चञ्चूर्यते, पम्फुल्यते, चूर्त्तिः, प्रफुल्तिः । अत इति किम् ? चञ्चार्यते,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पम्फाल्यते । अनोदिति किम् ? चंचूर्त्ति, पम्फुल्ति ॥४४॥

ऋमतां री ।४।१।५५॥

ऋमतां यङन्तानां द्वित्वे पूर्वस्य रीरन्तः स्यात् । नरीनृत्यते ॥४५॥

रि-रौ च लुपि ।४।१।५६॥

ऋमतां यङो लुपि द्वित्वे पूर्वस्य रि-रौ रीश्चान्तः स्यात् । चरिकर्त्ति, चर्कर्त्ति, चरीकर्त्ति ॥४६॥

निजां शित्येत् ।४।१।५७॥

निजि-विजि-विषां शिति द्वित्वे पूर्वस्यैत् स्यात् । नेनेक्ति, वेवेक्ति, वेवेष्टि । शितीति किम् ? निनेज ॥४७॥

पू-भृ-मा-हाङामिः ।४।१।५८॥

एषां शिति द्वित्वे पूर्वस्य इः स्यात् । पिपर्त्ति, इयर्त्ति, बिभर्त्ति, मिमीते, जिहीते । हाङिति किम् ? जहाति । शितीत्येव, पपार ॥४८॥

सन्यस्य ।४।१।५९॥

द्वित्वे पूर्वस्यातः सनि परे इः स्यात् । पिपक्षति । अस्येति किम् ? पापचिषते ॥४९॥

ओर्जा-ऽन्तस्था-पवर्गेऽवर्णे ।४।१।६०॥

द्वित्वे पूर्वस्योतोऽवर्णान्ते जा-ऽन्तस्था-पवर्गे परे सनि इः स्यात् । जिजावयिषति, यियविषति, यियावयिषति, रिरावयिषति, लिलावयिषति, पिपविषते, [पिपावयिषति,] मिमावयिषति । जान्तस्थापवर्ग इति किम् ? जुहावयिषति । अवर्ण इति किम् ? बुभूषति ॥५०॥

स्वपो णावुः ।४।१।६२॥

स्वपेर्णौ सति द्वित्वे पूर्वस्योत् स्यात् । सुष्वापयिषति । स्वपो णाविति किम् ? स्वापं चिकीर्षति रिष्वापयिषति । स्वपो णौ सति द्वित्व इति किम् ? सोषोपयिषति ॥५१॥

असमानलोपे सन्वल्लघुनि ङे ।४।१।६३॥

न विद्यते समानस्य लोपो यस्मिन् तस्मिन् ङपरे णौ द्वित्वे, पूर्वस्य लघुनि धात्वक्षरे परे सनीव कार्यं स्यात् । अचीकरत्, अजीजवत्, अशिश्रवत् । लघुनीति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किम् ? अततक्षत् । णावित्येव, अचकमत । असमानलोप इति किम् ? अचकथत् ॥५२॥

लघोर्दीर्घोऽस्वरादेः ।४।१।६४॥

अस्वरादेर्ऽपरेऽसमानलोपे णौ द्वित्वे पूर्वस्य लघोर्लघुनि धात्वक्षरे परे दीर्घः स्यात् । अचीकरत् । लघोरिति किम् ? अचिक्कणत् । अस्वरादेरिति किम् ? और्ण्णुनवत् ॥५३॥

स्मृ-दृ-त्वर-प्रथ-म्रद-स्तृ-स्पशेरः ।४।१।६५॥

एषामसमानलोपे ङपरे गौ द्वित्वे पूर्वस्याऽत् स्यात् । असस्मरत्, अददरत्, अतत्वरत्, अपप्रथत्, अमम्रदत्, अतस्तरत्, अपस्पशत् ॥५४॥

अस्याऽऽदेराः परोक्षायाम् ।४।१।६८॥

अस्यां द्वित्वे पूर्वस्याऽऽदेरत आः स्यात् । आदुः, आरतुः । अस्येति किम् ? ईयुः । आदेरिति किम् ? पपाच ॥५५॥

अनातो नश्चान्त ऋदाद्यशौ-संयोगस्य ।४।१।६९॥

ऋदादेरश्नोतेः संयोगान्तस्य च परोक्षायां द्वित्वे पूर्वस्यादेरात्स्थानादन्यस्याऽस्य आः स्यात्, कृतातो नोऽन्तश्च । आनृधुः, आनशे, आनञ्च । ऋदादीति किम् ? आर । अनात इति किम् ? आञ्छ ॥५६॥

भू-स्वपोरदुतौ ।४।१।७०॥

भू-स्वपोः परोक्षायां द्वित्वे पूर्वस्य यथासंख्यमदुतौ स्याताम् । बभूव, सुष्वाप ॥५७॥

ज्या-व्ये-व्यधि-व्यचि-व्यथेरिः ।४।१।७१॥

एषां परोक्षायां द्वित्वे पूर्वस्य इः स्यात् । जिज्यौ, संविव्याय, विव्याध, विव्याच, विव्यथे ॥५८॥

यजादि-वश्-वचः सस्वरान्तस्था ग्वृत् ।४।१।७२॥

यजादेर्वश्-वचोश्च परोक्षायां द्वित्वे पूर्वस्य सस्वरान्तस्था इ-उ-ऋरूपा आसन्ना स्यात् । इयाज, उवाय, उवाश, उवाच ॥५९॥

+ न वयो य् ।४।१।७३॥

वेगो वयेर्य् परोक्षायां ग्वृत् न स्यात् । ऊयुः ॥६०॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वेरयः ।४।१।७४॥

वेगोऽयन्तस्य पूर्वस्य परस्य च परोक्षायां क्ङित्र स्यात् । ववौ । अय इति किम् ? उवाय ॥६१॥

अविति वा ।४।१।७५॥

वेगोऽयन्तस्याऽविति परोक्षायां क्ङिद्वा न स्यात् । वव्रुः, ऊव्रुः ॥६२॥

ज्यश्च यपि ।४।१।७६॥

ज्यो वेगश्च यपि क्ङित्र स्यात् । प्रज्याय, प्रवाय ॥६३॥

व्यः ।४।१।७७॥

व्यो यपि क्ङित्र स्यात् । प्रव्याय ॥६४॥

संपरेर्वा ।४।१।७८॥

आभ्यां परस्य व्यो यपि क्ङिद्वा न स्यात् । संव्याय, संवीय ; परिव्याय, परिवीय ॥६५॥

यजादि-वचेः किति ।४।१।७९॥

यजादेर्वचेश्च सस्वरान्तस्था किति परे क्ङित् स्यात् । ईजुः, ऊयुः । किताति किम् ? यक्षीष्ट ॥६६॥

स्वपेर्यङ्-ङे च ।४।१।८०॥

स्वपेर्यङि ङे किति च परे सस्वरान्तस्था क्ङित् स्यात् । सोषुप्यते, असूषुपत्, सुषुप्सति ॥६७॥

ज्या-व्यधः क्ङिति ।४।१।८१॥

ज्या-व्यधोः सस्वरान्तस्था किति ङिति क्ङित् स्यात् । जीयात्, जिनाति, विध्यात्, विध्यति ॥६८॥

व्यचोऽनसि ।४।१।८२॥

व्यचेः सस्वरान्तस्था अस्वर्जे क्ङिति क्ङित् स्यात् । विचति । अनसीति किम् ? उरुव्यचाः ॥६९॥

वशेरयङि ।४।१।८३॥

वशेः सस्वरान्तस्था अयङि क्ङिति क्ङित् स्यात् । उष्टः, उशन्ति । अयङीति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किम् ? वावश्यते ॥७०॥

ग्रह-व्रस्च-भ्रस्ज-प्रच्छः ।४।१।८४॥

एषां सस्वरान्तस्था क्ङिति य्वृत् स्यात् । जगृहुः, गृह्णाति ; वृक्णः, वृश्चति ; भृष्टः, भृज्जति ; पृष्टः, पृच्छा ॥७१॥

व्ये-स्यमोर्यङि ।४।१।८५॥

व्येग्-स्यमोः सस्वरान्तस्था यङि य्वृत् स्यात् । वेवीयते, सेसिमीति ॥७२॥

चायः की ।४।१।८६॥

चायो यङि की स्यात् । चेकीतः ॥७३॥

द्वित्वे ह्वः ।४।१।८७॥

ह्वेगो द्वित्वविषये सस्वरान्तस्था य्वृत् स्यात् । जुहूषति ॥७४॥

णौ ङ-सनि ।४।१।८८॥

ह्वेगः सस्वरान्तस्था ङपरे सन्परे च णौ विषये य्वृत् स्यात् । अजूहवत्, जुहावयिषति ॥७५॥

श्वेर्वा ।४।१।८९॥

श्वेः सस्वरान्तस्था ङ-सन्परे णौ विषये य्वृद्वा स्यात् । अशूशवत्, अशिश्वयत् ; ++ शुशावयिषति, शिश्वाययिषति ॥७६॥

वा परोक्षा-यङि ।४।१।९०॥

श्वेः सस्वरान्तस्था परोक्षा-यङोर्य्वृद्वा स्यात् । शुशाव, शिश्वाय । शोशूयते, शेश्वीयते ॥७७॥

प्यायः पी ।४।१।९१॥

प्यायेः परोक्षा-यङोः पीः स्यात् । आपिप्ये, आपेपीतः ॥७८॥

क्तयोरनुपसर्गस्य ।४।१।९२॥

अनुपसर्गस्य प्यायेः क्त-क्तवन्त्वोः पीः स्यात् । पीनम्, पीनवन् मुखम् । अनुपसर्गस्येति किम् ? प्रप्यानो मेघः ॥७९॥

स्फायः स्फी वा ।४।१।९४॥

स्फायतेः क्तयोः परयोः स्फीर्वा स्यात् । स्फीतः, स्फीतवान् ; स्फातः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्फातवान् ॥८०॥

प्रसमः स्त्यः स्ती ।४।१।९५॥

प्रसम्समुदायपूर्वस्य स्त्यः क्तयोः परयोः स्तीः स्यात् । प्रसंस्तीतः, प्रसंस्तीतवान् । प्रसम इति किम् ? संप्रस्त्यानः ॥८१॥

प्रात् तश्च मो वा ।४।१।९६॥

प्रात् केवलात् परस्य स्त्यः क्तयोः परयोः स्तीः स्यात्, क्तयोस्तो म् च वा । प्रस्तीतः, प्रस्तीतवान् ; प्रस्तीमः, प्रस्तीमवान् ॥८२॥

श्यः शी द्रवमूर्त्ति-स्पर्शे नश्चाऽस्पर्शे ।४।१।९७॥

मूर्त्तिः काठिन्यम्, द्रवमूर्त्ति-स्पर्शार्थस्य श्यः क्तयोः परयोः शीः स्यात्, तद्योगे क्तयोस्तोऽस्पर्शविषये न् च । शीनम्, शीनवद् घृतम्, शीतं वर्त्तते, शीतो वायुः ॥८३॥

प्रतेः ।४।१।९८॥

प्रतेः परस्य श्यः क्तयोः परयोः शीः स्यात्, तद्योगे क्तयोः तो न् च । प्रतिशीनः, प्रतिशीनवान् ॥८४॥

श्रः शृतं हविः-क्षीरे ।४।१।१००॥

श्रातेः श्रायतेश्च क्ते हविषि क्षीरे चार्थे शृर्निपात्यते । शृतं हविः, शृतं क्षीरं स्वयमेव । हविः-क्षीर इति किम् ? श्राणा यवागूः ॥८५॥

व्वृत् सकृत् ।४।१।१०२॥

अन्तस्थास्थानम् इ-उ-ऋत् सकृदेव स्यात् । संवीयते ॥८६॥

दीर्घमवोऽन्त्यम् ।४।१।१०३॥

वेग्वर्जस्य व्वृदन्त्यं दीर्घं स्यात् । जीनः । अव इति किम् ? उतः । अन्त्यमिति किम् ? सुप्तः ॥८७॥

स्वर-हन-गमोः सनि धुटि ।४।१।१०४॥

स्वरान्तस्य हन्-गमोश्च धुडादौ सनि दीर्घः स्यात् । चिचीषति, जिघांसति, जिगांस्यते । धुटीति किम् ? वियविषति ॥८८॥

तनो वा ।४।१।१०५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तनेर्धुडादौ सनि दीर्घो वा स्यात् । तितांसति, तितंसति । धुटीत्येव, तितनिषति ॥८९॥

क्रमः क्त्वि वा ।४।१।१०६॥

क्रमो धुडादौ क्त्वि दीर्घो वा स्यात् । क्रान्त्वा, क्रन्त्वा । धुटीत्येव, क्रमित्वा ॥९०॥

अहन्-पञ्चमस्य कि-क्ङिति ।४।१।१०७॥

हन्वर्जस्य पञ्चमान्तस्य कौ धुडादौ च क्ङिति दीर्घः स्यात् । प्रशान्, शान्तः, शंशान्तः । पञ्चमस्येति किम् ? पक्त्वा । अहन्निति किम् ? वृत्रहणि । धुटीत्येव, यम्यते ॥९१॥

अनुनासिके च च्छ्-वः शूट् ।४।१।१०८॥

अनुनासिकादौ कौ धुडादौ च धातोः च्छ्वोर्यथासंख्यं श्-ऊटौ स्याताम् । प्रश्नः, शब्दप्राशौ, पृष्टः, स्योमा, अक्षय्यूः, द्यूतः ॥९२॥

मव्यवि-श्रिवि-ज्वरि-त्वरेरुपान्त्येन ।४।१।१०९॥

एषामनुनासिकादौ कौ धुडादौ च प्रत्यये उपान्त्येन सह ऊट् स्यात् । मोमा, मूः, मूतिः ; उमा, ओम्, ऊः, ऊतिः ; श्रोमा, श्रूः, श्रूतः ; जूर्मा, जूः, जूर्त्तिः ; तूर्मा, तूः, तूर्णः ॥९३॥

राल्लुक् ।४।१।११०॥

रात् परयोः छ्वोरनुनासिकादौ कौ धुडादौ च प्रत्यये लुक् स्यात् । मोर्मा, मूः, मूर्त्तः ; तोर्मा, तूः, तूर्णः ॥९४॥

क्ङेऽनिटश्च-जोः क-गौ धिति ।४।१।१११॥

क्ङेऽनिटो धातोश्च-जोर्धिति यथासंख्यं क-गौ स्याताम् । पाकः, भोग्यम् । क्ङेऽनिट इति किम् ? सङ्कोचः, कूजः ॥९५॥

न वञ्चेर्गतौ ।४।१।११३॥

गत्यर्थस्य वञ्चेः कत्वं न स्यात् । वञ्चं वञ्चन्ति । गताविति किम् ? वङ्कं काष्ठम् ॥९६॥

घ्यण्यावश्यके ।४।१।११५॥

आवश्यकोपाधिके घ्यणि च-जोः क-गौ न स्याताम् । अवश्यपाच्यम्,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अवश्यरञ्ज्यम् । आवश्यक इति किम् ? पाक्यम् ॥९७॥

नि-प्राद् युजः शक्ये ।४।१।११६॥

आभ्यां युजः शक्ये गम्ये ध्यणि गो न स्यात् । नियोज्यः, प्रयोज्यः । शक्य इति किम् ? नियोग्यः ॥९८॥

भुजो भक्ष्ये ।४।१।११७॥

भुजो भक्ष्यार्थे ध्यणि गो न स्यात् । भोज्यं पयः । भक्ष्य इति किम् ? भोग्या भूः ॥९९॥

त्यज-यज-प्रवचः ।४।१।११८॥

एषां ध्यणि क-गौ न स्याताम् । त्याज्यम्, याज्यम्, प्रवाच्यः ॥१००॥

वचोऽशब्दनाम्नि ।४।१।११९॥

अशब्दसंज्ञायां वचेर्ध्यणि को न स्यात् । वाच्यम् । अशब्दनाम्नीति किम् ? वाक्यम् ॥१०१॥

चतुर्थस्य प्रथमः पादः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[चतुर्थाध्याये द्वितीयः पादः]

आत् सन्ध्यक्षरस्य ।४।२।१॥

धातोः सन्ध्यक्षरान्तस्याऽऽत् स्यात् । संव्याता, सुग्लः । धातोरित्येव, गोभ्याम् ॥१॥

न शिति ।४।२।२॥

सन्ध्यक्षरान्तस्य शिति विषयभूते आत् न स्यात् । संव्ययति ॥२॥

व्यस्थव्-णवि ।४।२।३॥

व्यः थवि णवि च विषये आत्र स्यात् । संविव्याय, संविव्ययिथ ॥३॥

स्फुर-स्फुलोर्घञि ।४।२।४॥

अनयोः सन्ध्यक्षरस्य घञि आत् स्यात् । विस्फारः, विस्फालः ॥४॥

दीङः सनि वा ।४।२।६॥

दीङः सन्याद्वा स्यात् । दिदासते, दिदीषते ॥५॥

यबक्ङिति ।४।२।७॥

दीङो यपि, अक्ङिति च विषये आत् स्यात् । उपदाय, उपदायो वर्त्तते ॥६॥

मिग्-मीगोऽखलचलि ।४।२।८॥

अनयोर्यपि खल्-अच्-अल्वर्जेऽक्ङिति च विषये आत् स्यात् । निमाय, निमाता ; प्रमाय, प्रमाता । अखलचलीति किम् ? ईषन्निमयः, दुष्प्रमयः, मयः, आमयः ; निमयः ; प्रमयः ॥७॥

लीङ्-लिनोर्वा ।४।२।९॥

अनयोर्यपि खल्-अच्-अल्वर्जेऽक्ङिति च विषये आद्वा स्यात् । विलाय, विलीय ; विलाता, विलेता । अखलचलीत्येव, ईषद्विलयः, विलयः, विलयोऽस्ति ॥८॥

णौ क्री-जीङः ।४।२।१०॥

एषां णौ आत् स्यात् । क्रापयति, जापयति, अध्यापयति ॥९॥

चि-स्फुरोर्नवा ।४।२।१२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चिस्फुरोर्णौ स्वरस्याऽऽद्या स्यात्। चापयति, चाययति ; स्फारयति, स्फोरयति ॥१०॥

लो लः ।४।२।१६॥

लारूपस्य णौ स्नेहद्रवे गम्ये लू अन्तो वा स्यात्। घृतं विलालयति विलापयति वा। स्नेहद्रव इत्येव, जटाभिरालापयते। *लीङ्लिनोऽर्चा-ऽभिभवे चाऽच्चाऽकर्तर्यपि* [३।३।९०] इत्यात्मनेपदम् आच्च ॥११॥

पातेः ।४।२।१७॥

पातेर्णौ ल् अन्तः स्यात्। पालयति ॥१२॥

धूग्-प्रीगोर्नः ।४।२।१८॥

धूग्-प्रीगोर्णौ न् अन्तः स्यात्। धूनयति, प्रीणयति ॥१३॥

पा-शा-छा-सा-वे-व्या-ह्वो यः ।४।२।२०॥

एषां णौ यू अन्तः स्यात्। पाययति, शाययति, अवच्छाययति, अवसाययति, वाययति, व्याययति, ह्वाययति ॥१४॥

अर्त्ति-री-ब्ली-ह्री-क्नूयि-क्ष्माय्यातां पुः ।४।२।२१॥

एषामादन्तानां च णौ पुरन्तः स्यात्।अर्पयति, रेपयति, ब्लेपयति, ह्रेपयति, क्नोपयति, क्ष्मापयति, दापयति, सत्यापयति ॥१५॥

स्फायू स्फावू ।४।२।२२॥

णौ स्फायः स्फावू स्यात्। स्फावयति ॥१६॥

शदिरगतौ शात् ।४।२।२३॥

शदिरगत्यर्थो णौ शात् स्यात्। पुष्पाणि शातयति। अगताविति किम् ? गाः शादयति ॥१७॥

घटादेर्ह्रस्वो दीर्घस्तु वा ञि-णम्परे ।४।२।२४॥

घटादीनां णौ ह्रस्वः स्यात्, ञि-णम्परे तु णौ वा दीर्घः। घटयति ; अघाटि, अघटि ; घाटं घाटम्, घटं घटम्। व्यथयति ; अव्याथि, अव्यथि ; व्याथं व्याथम्, व्यथं व्यथम् ॥१८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अमोऽकम्यमि-चमः ।४।२।२६॥

कम्यमि-चमिवर्जस्याऽमन्तस्य णौ ह्रस्वः स्यात्, ञिणम्परे तु वा दीर्घः । रमयति ; अरामि, अरमि ; रामं राममम्, रमं रममम् । अकम्यमिचम इति किम् ? कामयते, अकामि, कामं काममम् ; आमयति, आचामयति ॥१९॥

छदेरिस्-मन्-त्रट्-कौ ।४।२।३३॥

छदेरिस्-मन्-त्रट्-किप्परे णौ ह्रस्वः स्यात् । छदिः, छद्म, छत्त्री, उपच्छत् ॥२०॥

एकोपसर्गस्य च घे ।४।२।३४॥

एकोपसर्गस्यानुपसर्गस्य च छदेर्घपरे णौ ह्रस्वः स्यात् । प्रच्छदः, छदः । एकोपसर्गस्य चेति किम् ? समुपच्छादः ॥२१॥

उपान्त्यस्याऽसमानलोपि-शास्वृदितो ङे ।४।२।३५॥

समानलोपि-शास्वृदिद्भर्जस्य धातोरुपान्त्यस्य ङपरे णौ ह्रस्वः स्यात् । अपीपचत्, मा भवान् अटिटत् । असमानलोपि-शास्वृदित इति किम् ? अत्यरराजत्, अशशासत्, मा भवान् ओणिणत् ॥२२॥

जिघ्रतेरिः ।४।२।३८॥

घ्र उपान्त्यस्य ङपरे णौ इर्वा स्यात् । अजिघ्रिपत्, अजिघ्रपत् । उत्तरस्मात् पृथक् करणादत्र विकल्पः ॥२३॥

तिष्ठतेः ।४।२।३९॥

स्थ उपान्त्यस्य ङपरे णौ इः स्यात् । अतिष्ठिपत् ॥२४॥

ऊद् दुषो णौ ।४।२।४०॥

दुषेरुपान्त्यस्य णौ ऊत् स्यात् । दूषयति ॥२५॥

चित्ते वा ।४।२।४१॥

चित्तकर्तृकस्य दुषेरुपान्त्यस्य णौ परे ऊद् वा स्यात् । मनो दूषयति, मनो दोषयति मैत्रः ॥२६॥

गोहः स्वरे ।४।२।४२॥

कृतगुणस्य गुहेः स्वरादावुपान्त्यस्योत् स्यात् । निगूहति । गोह इति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किम् ? निजुगुहुः ॥२७॥

भुवो वः परोक्षा-ऽद्यतन्योः ।४।२।४३॥

भुवो वन्तस्योपान्त्यस्य परोक्षा-ऽद्यतन्योरूत् स्यात् । बभूव, अभूवम् । व इति किम् ? बभूवान्, अभूत् ॥२८॥

गम-हन-जन-खन-घसः स्वरेऽनङि क्ङिति लुक् ।४।२।४४॥

एषामुपान्त्यस्याङ्वर्जे स्वरादौ क्ङिति परे लुक् स्यात् । जग्मुः, जघ्नुः, जज्ञे, चख्नुः, जक्षुः । स्वर इति किम् ? गम्यते । अनङीति किम् ? अगमत् । क्ङितीति किम् ? गमनम् ॥२९॥

नो व्यञ्जनस्याऽनुदितः ।४।२।४५॥

व्यञ्जनान्तस्याऽनुदितो धातोरुपान्त्यस्य नः क्ङिति परे लुक् स्यात् । स्रस्तः, सनीस्रस्यते । व्यञ्जनस्येति किम् ? नीयते । अनुदित इति किम् ? नानन्द्यते ॥३०॥

अञ्चोऽनर्चायाम् ।४।२।४६॥

अनर्चार्थस्यैवाञ्चेरुपान्त्यनो लुक् स्यात् । उदक्तमुदकं कूपात् । अनर्चायामिति किम् ? अञ्चिता गुरवः ॥३१॥

भञ्जेर्ञौ वा ।४।२।४८॥

भञ्जेरुपान्त्यनो ञौ लुग् वा स्यात् । अभाजि, अभञ्जि ॥३२॥

दंश-सञ्जः शवि ।४।२।४९॥

अनयोरुपान्त्यनः शवि लुक् स्यात् । दशति, सजति ॥३३॥

अकट्-घिनोश्च रञ्जेः ।४।२।५०॥

रञ्जेरकटि घिनणि शवि चोपान्त्यनो लुक् स्यात् । रजकः, रागी, रजति ॥३४॥

णौ मृगरमणे ।४।२।५१॥

रञ्जेरुपान्त्यनो णौ मृगाणां रमणेऽर्थे लुक् स्यात् । रजयति मृगं व्याधः । मृगरमण इति किम् ? रञ्जयति रजको वस्त्रम् ॥३५॥

घञि भाव-करणे ।४।२।५२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रञ्जेरुपान्त्यनो भावकरणार्थे घञि लुक् स्यात् । रागः । भाव-करण इति किम् ? आधारे, रङ्गः ॥३६॥

स्यदो जवे ।४।२।५३॥

स्यन्देर्घञि नलुग्-वृद्ध्यभावौ निपात्येते वेगेऽर्थे । गोस्यदः । जव इति किम् ? घृतस्यन्दः ॥३७॥

यमि-रमि-नमि-गमि-हनि-मनि-वनति-तनादेर्धुटि क्ङिति ।४।२।५५॥

एषां तनादीनां च धुडादौ क्ङिति लुक् स्यात् । यतः, रत्वा, नतिः, गतः, हतः, मतः, वतिः, ततः, क्षतः । धुटीति किम् ? यम्यते । क्ङितीति किम् ? यन्ता ॥३८॥

यपि ।४।२।५६॥

यम्यादीनां यपि लुक् स्यात् । प्रहत्य, प्रमत्य, प्रवत्य, प्रतत्य, प्रसत्य ॥३९॥

वा मः ।४।२।५७॥

यम्यादीनां मन्तानां यपि लुग् वा स्यात् । प्रयत्य, प्रयम्य ; विरत्य, विरम्य ; प्रणत्य, प्रणम्य ; आगत्य, आगम्य ॥४०॥

गमां क्वौ ।४।२।५८॥

एषां गमादीनां यथादर्शनं क्वौ क्ङिति लुक् स्यात् । ज[न]गत्, संयत्, परीतत्, सुमत् ॥४१॥

न तिकि दीर्घश्च ।४।२।५९॥

एषां तिकि लुग् दीर्घश्च न स्यात् । यन्तिः, रन्तिः, नन्तिः, गन्तिः, हन्तिः, मन्तिः, वन्तिः, तन्तिः ॥४२॥

आः खनि-सनि-जनः ।४।२।६०॥

एषां धुडादौ क्ङिति आः स्यात् । खातः, सातः, जातः, जातिः । क्ङितीत्येव, चङ्खन्ति ॥४३॥

सनि ।४।२।६१॥

एषां धुडादौ सनि आः स्यात् । सिषासति । धुटीत्येव, सिसनिषति ॥४४॥

ये नवा ।४।२।६२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एषां ये क्ङिति आ वा स्यात् । खायते, खन्यते ; सायते, सन्यते ; प्रजाय, प्रजन्य । क्ङितीत्येव, सान्यम् ॥४५॥

तनः क्ये ।४।२।६३॥

तनः क्ये आ वा स्यात् । तायते, तन्यते ॥४६॥

तौ सनस्तिकि ।४।२।६४॥

सनस्तिकि तौ लुगातौ वा स्याताम् । सतिः, सातिः, सन्तिः ॥४७॥

वन्याङ् पञ्चमस्य ।४।२।६५॥

पञ्चमस्य वनि आङ् स्यात् । विजावा, ग्वावा ॥४८॥

अपाच्चायश्चिः क्तौ ।४।२।६६॥

अपपूर्वस्य चायतेः क्तौ चिः स्यात् । अपचितिः ॥४९॥

ह्लादो ह्लद् क्तयोश्च ।४।२।६७॥

ह्लादेः क्त-क्तवन्त्वोः क्तौ च ह्लद् स्यात् । ह्लन्नः, ह्लन्नवान्, ह्लत्तिः ॥५०॥

ऋ-ल्वादेरेषां तो नोऽप्रः ।४।२।६८॥

पूर्वजाद् ऋदन्ताद् ल्वादिभ्यश्च परेषां क्ति-क्त-क्तवन्तूनां तो न् स्यात् । तीर्णिः, तीर्णः, तीर्णवान् ; लूनिः, लूनः, लूनवान् ; धूनिः, धूनः, धूनवान् । अप्र इति किम् ? पूर्त्तिः, पूर्त्तः, पूर्त्तवान् ॥५१॥

रदादमूर्च्छ-मदः क्तयोर्दस्य च ।४।२।६९॥

मूर्च्छि-मदिवर्जाद् रदान्तात् परस्य क्तयोस्तः तद्योगे धातुदश्च न् स्यात् । पूर्णः ; पूर्णवान् ; भिन्नः, भिन्नवान् । अमूर्च्छमद इति किम् ? मूर्त्तः, मत्तः । रदांत(दात्त ?)स्येति किम् ? चरितम्, मुदितम् ॥५२॥

सूयत्याद्योदितः ।४।२।७०॥

सूयत्यादिभ्यो नवभ्य ओदिद्भ्यश्च परस्य क्तयोस्तो न् स्यात् । सूनः, सूनवान् ; दूनः, दूनवान् ; लग्नः, लग्नवान् ॥५३॥

व्यञ्जनान्तस्थाऽऽतोख्या-ध्यः ।४।२।७१॥

ख्या-ध्यावर्जस्य धातोर्यद् व्यञ्जनं तस्मात् परा याऽन्तस्था, तस्याः परो य आः, तस्मात् परस्य क्तयोस्तो न् स्यात् । स्त्यानः, स्त्यानवान् । व्यञ्जनेति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किम् ? यातः । अन्तस्थेति किम् ? स्नातः । आत इति किम् ? च्युतः । धातोर्व्यञ्जनेति किम् ? निर्यातः । अख्या-ध्य इति किम् ? ख्यातः, ध्यातः । आतः परस्येति किम् ? दरिद्रितः ॥५४॥

पू-दिव्यञ्चेर्नाशा-ऽद्यूता-ऽनपादाने ।४।२।७२॥

एभ्यो यथासङ्ख्यं नाशाद्यर्थेभ्यः परस्य क्तयोस्तो न् स्यात् । पूना यवाः, आद्यूनः, समक्नौ पक्षौ । नाशा-ऽद्यूता-ऽनपादान इति किम् ? पूतम्, द्यूतम्, उदक्तं जलम् ॥५५॥

क्षेः क्षी चाऽध्यार्थे ।४।२।७४॥

घ्यणोऽर्थो भाव-कर्म्मणी, ततोऽन्यस्मिन्नर्थे क्तयोस्तः क्षेः परस्य न् स्यात्, तद्योगे क्षेः क्षीश्च । क्षीणः, क्षीणवान् मैत्रः । अध्यार्थे इति किम् ? क्षितमस्य ॥५६॥

ऋ-ह्री-घ्रा-ध्रा-त्रोन्द-नुद-विन्तेर्वा ।४।२।७६॥

एभ्यः परस्य क्तयोस्तो न् वा स्यात् । ऋणम्, ऋतम् ; ह्रीणः, ह्रीणवान्, ह्रीतः, ह्रीतवान् ; घ्राणः, घ्रातः ; ध्राणः, ध्रातः ; त्राणः, त्रातः ; समुन्नः, समुत्तः ; नुन्नः, नुत्तः ; विन्नः, वित्तः ॥५७॥

दुगोरूच्च ।४।२।७७॥

दु-गूभ्यां परस्य क्तयोस्तो न् स्यात्, तद्योगे दु-ग्वोरूच्च । दूनः । दूनवान् । गूनः गूनवान् ॥५८॥

क्षै-शुषि-पचो म-क-वम् ।४।२।७८॥

एभ्यः परस्य क्तयोस्तो यथासङ्ख्यं म-क-वाः स्युः । क्षामः, क्षामवान् ; शुष्कः, शुष्कवान् ; पक्वः, पक्ववान् ॥५९॥

निर्वाणमवाते ।४।२।७९॥

अवाते कर्त्तरि निरूपूर्वाद् वातेः परस्य क्ततो न् निपात्यते । निर्वाणो मुनिः । अवात इति किम् ? निर्वातो वातः ॥६०॥

भित्तं शकलम् ।४।२।८१॥

भिदेः परस्य क्तस्य नत्वाभावो निपात्यते, शकलपर्यायश्चेत् । भित्तं शकलमित्यर्थः । शकलमिति किम् ? भिन्नं भित्तम् ॥६१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वित्तं धन-प्रतीतम् ।४।२।८२॥

विन्दतेः परस्य क्तस्य नत्वाभावो निपात्यते, धन-प्रतीतयोः पर्यायश्चेत् । वित्तं धनम्, वित्तः प्रतीतः । धन-प्रतीतमिति किम् ? विन्नः ॥६२॥

हु-धुटो हेर्धिः ।४।२।८३॥

होर्धुडन्ताच्च परस्य हेर्धिः स्यात् । जुहुधि, विद्धि ॥६३॥

शासस्-हनः शाध्येधि-जहि ।४।२।८४॥

शास्-अस्-हनां ह्यन्तानां यथासंख्यं शाध्येधि-जहयः स्युः । शाधि, एधि, जहि ॥६४॥

अतः प्रत्ययाल्लुक् ।४।२।८५॥

धातोः परो योऽदन्तः प्रत्ययस्ततः परस्य हेर्लुक् स्यात् । दीव्य । अत इति किम् ? राध्नुहि । प्रत्ययादिति किम् ? पापहि ॥६५॥

असंयोगादोः ।४।२।८६॥

असंयोगात् परो य उस्तदन्तात् प्रत्ययात् परस्य हेर्लुक् स्यात् । सुनु । असंयोगादिति किम् ? अक्ष्णुहि । ओरिति किम् ? क्रीणीहि ॥६६॥

वम्यविति वा ।४।२।८७॥

असंयोगात् परो य उस्तदन्तस्य प्रत्ययस्य लुग् वा स्यात्, वमादौ अविति परे। सुन्वः, सुनुवः ; सुन्मः, सुनुमः । अवितीति किम् ? सुनोमि। असंयोगादित्येव, तक्ष्णुवः ॥६७॥

कृगो यि च ।४।२।८८॥

कृगः परस्योतो यादौ वमि चाऽविति लुक् स्यात् । कुर्युः, कुर्वः, कुर्मः ॥६८॥

अतः शित्युत् ।४।२।८९॥

शित्यविति [य उस्तन्निमित्तस्य] कृगोऽस्य उः स्यात् । कुरु । अवितीत्येव, करोति ॥६९॥

श्ना-ऽस्त्योर्लुक् ।४।२।९०॥

श्नस्य अस्तेश्चाऽस्य शित्यविति लुक् स्यात् । रुन्धः, स्तः । अत इत्येव, आस्ताम् ॥७०॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वा द्विषातोऽनः पुस् ।४।२।९१॥

द्विष आदन्ताच्च परस्य शितोऽवितोऽनः स्थाने वा पुस् स्यात् । अद्विषुः, अद्विषन् ; अयुः, अयान् ॥७१॥

सिज्-विदोऽभुवः ।४।२।९२॥

सिचप्रत्ययाद् विदश्च धातोः परस्य अनः पुस् स्यात्, न चेद् भुवः परः सिच् स्यात् । अकार्षुः, अविदुः । अभुव इति किम् ? अभूवन् ॥७२॥

द्व्युक्त-जक्षपञ्चतः ।४।२।९३॥

कृतद्वित्वाद् जक्षपञ्चकाच्च परस्य शितोऽवितोऽनः पुस् स्यात् । अजुहवुः, अजक्षुः, अदरिद्रुः, अजागरुः, अचकासुः, अशासुः ॥७३॥

अन्तो नो लुक् ।४।२।९४॥

द्व्युक्त-जक्षपञ्चकात् परस्य शितोऽवितोऽन्तो नो लुक् स्यात् । जुह्वति, जुह्वत् ; जक्षति, जक्षत् ; दरिद्रति, दरिद्रत् ॥७४॥

शौ वा ।४।२।९५॥

द्व्युक्त-जक्षपञ्चकात् परस्याऽन्तो नः शिविषये लुग् वा स्यात् । ददति ददन्ति कुलानि ; जक्षति, जक्षन्ति ; दरिद्रति, दरिद्रन्ति ॥७५॥

श्नश्चाऽऽतः ।४।२।९६॥

द्व्युक्त-जक्षपञ्चतः श्नश्च शित्यवित्यातो लुक् । मिमते, दरिद्रति, क्रीणन्ति । अवितीत्येव, अजहाम्, अक्रीणाम् ॥७६॥

एषामी व्यञ्जनेऽदः ।४।२।९७॥

द्व्युक्त-जक्षपञ्चच्छ्नामातः व्यञ्जनादावीः स्यात्, न तु दासंज्ञस्य । मिमीते, लुनीतः । व्यञ्जन इति किम् ? मिमते । अद इति किम् ? दत्तः, धत्तः ॥७७॥

इर्दरिद्रः ।४।२।९८॥

दरिद्रो व्यञ्जनादौ शित्यवित्यात इः स्यात् । दरिद्रितः । व्यञ्जन इत्येव, दरिद्रति ॥७८॥

भियो नवा ।४।२।९९॥

भियो व्यञ्जनादौ शित्यविति इर्वा स्यात् । बिभितः, बिभीतः ॥७९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हाकः ।४।२।१००॥

हाको द्व्युक्तस्य व्यञ्जनादौ शित्यविति [आत] इर्वा स्यात्। जहितः, जहीतः ॥८०॥

आ च हौ ।४।२।१०१॥

हाको हौ आत् इश्च वा स्यात्। जहाहि, जहिहि, जहीहि ॥८१॥

यि लुक् ।४।२।१०२॥

यादौ शिति हाको लुक् स्यात्। जह्यात् ॥८२॥

ओतः श्ये ।४।२।१०३॥

धातोरोतः श्ये लुक् स्यात्। अवद्यति। श्य इति किम् ? [गवति ॥८३॥

जा ज्ञा-जनोऽत्यादौ ।४।२।१०४॥

ज्ञा-जनोः शिति जाः स्यात्, न त्वनन्तरे तिवादौ। जानाति, जायते। अत्यादाविति किम् ?] जाज्ञाति। जज्ञन्ति ॥८४॥

प्वादेर्ह्रस्वः ।४।२।१०५॥

प्वादेः शिति अत्यादौ ह्रस्वः स्यात्। पुनाति, लुनाति। प्वादेरिति किम् ? ब्रीणाति ॥८५॥

गमिषद्यमश्छः ।४।२।१०६॥

एषां शित्यत्यादौ छः स्यात्। गच्छति, इच्छति, आयच्छते। अत्यादावित्येव, जङ्गन्ति ॥८६॥

वेगे सर्त्तेर्धाव् ।४।२।१०७॥

सर्त्तेर्वेगे गम्ये शिति धाव् स्यात्, अत्यादौ। धावति। वेग इति किम् ? धर्ममनुसरति ॥८७॥

श्नौति-कृवु-धिवु-पा-घ्रा-ध्मा-स्था-म्ना-दाम्-दृश्यर्त्ति-शद-सदः शृ-कृ-धि-पिब-जिघ्र-धम-तिष्ठ-मन-यच्छ-पश्यर्च्छ-शीय-सीदम् ।४।२।१०८॥

एषां शित्यत्यादौ यथासंख्यम् श्नादयः स्युः। शृणु, कृणु, धिनु, पिब, जिघ्र, धम, तिष्ठ, मन, प्रयच्छ, पश्य, ऋच्छ, शीयते, सीद ॥८८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्रमो दीर्घः परस्मै ।४।२।१०९॥

क्रमेः परस्मैपदनिमित्ते शिति दीर्घः स्यात्, अत्यादौ । क्राम, क्राम्यति । परस्मैपद इति किम् ? आक्रमते सूर्यः ॥८९॥

ष्ठिवु-क्लम्वाऽऽचमः ।४।२।११०॥

एषां शित्यत्यादौ दीर्घः स्यात् । ष्ठीव, क्लाम, आचाम । आङिति किम् ? चम ॥९०॥

शम्सप्तकस्य श्ये ।४।२।१११॥

शमादीनां सप्तानां श्ये दीर्घः । शाम्य, दाम्य, ताम्य, श्राम्य, भ्राम्य, क्षाम्य, माद्य । श्ये इति किम् ? शम्यते ॥९१॥

म-व्यस्याः ।४।२।११३॥

धातोर्विहिते मादौ वादौ चाऽत आ दीर्घः स्यात् । पचामि, पचावः ॥९२॥

अनतोऽन्तोऽदात्मने ।४।२।११४॥

अनतः परस्याऽऽत्मनेपदस्थस्याऽन्तोऽत् स्यात् । चिन्वते । आत्मने इति किम् ? चिन्वन्ति । अनत इति किम् ? पचन्ते ॥९३॥

शीङो रत् ।४।२।११५॥

शीङः परस्याऽऽत्मनेपदस्थस्याऽन्तो रत् स्यात् । शेरते ॥९४॥

वेत्तेर्नवा ।४।२।११६॥

वेत्तेः परस्यात्मनेपदस्थस्याऽन्तो रद् वा स्यात् । संविद्रते, संविदते ॥९५॥

तिवां णवः परस्मै ।४।२।११७॥

वेत्तेः परेषां परस्मैपदानां तिवादीनां परस्मैपदान्येव णवादयो नव यथासङ्ख्यं वा स्युः । वेद, विदतुः, विदुः ; वेत्थ, विदथुः, विद ; वेद, विद्व, विद्म । पक्षे वेत्तीत्यादि ॥९६॥

ब्रूगः पञ्चानां पञ्चाऽऽहश्च ।४।२।११८॥

ब्रूगः परेषां तिवादीनां पञ्चानां यथासङ्ख्यं पञ्च णवादयो वा स्युः, तद्योगे ब्रूग आह् च । आह, आहतुः, आहुः, आत्थ, आहथुः । पक्षे ब्रवीतीत्यादि ॥९७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आशिषि तु-ह्योस्तातङ् ।४।२।११९।।

आशीरर्थयोस्तु-ह्योस्तातङ् वा स्यात् । जीवतात्, जीवतु ; जीवतात्, जीव । आशिषीति किम् ? जीवतु ।।९८।।

आतो णव औः ।४।२।१२०।।

आतः परस्य णव औः स्यात् । ययौ, पपौ ।।९९।।

आतामाते-आथामाथे आदिः ।४।२।१२१।।

आत् परेषामेषाम् आत इः स्यात् । पचेताम्, पचेते, पचेथाम्, पचेथे । आदिति किम् ? मिमाताम् ।।१००।।

यः सप्तम्याः ।४।२।१२२।।

आत् परस्य सप्तम्या याशब्दस्येः स्यात् । पचेत्, पचेः ।।१०१।।

याम्-युसोरियमियुसौ ।४।२।१२३।।

आत् परयोर्याम्-युसोर्यथासंख्यमियमियुसौ स्याताम् । पचेयम्, पचेयुः ।।१०२।।

चतुर्थस्य द्वितीयः ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[चतुर्थाध्याये तृतीयः पादः]

नामिनो गुणोऽक्ङिति ।४।३।१॥

नाम्यन्तस्य धातोः क्ङिद्वर्जे प्रत्यये गुणः स्यात् । चेता । अक्ङितीति किम् ? युतः ॥१॥

उ-श्नोः ।४।३।२॥

धातोरुश्नोः प्रत्ययोरक्ङिति गुणः स्यात् । तनोति, सुनोति ॥२॥

पुस्-पौ ।४।३।३॥

नाम्यन्तस्य धातोः पुसि पौ च गुणः स्यात् । ऐयरुः, अर्पयति ॥३॥

लघोरुपान्त्यस्य ।४।३।४॥

धातोरुपान्त्यस्य नामिनो लघोरक्ङिति गुणः स्यात् । भेत्ता । लघोरिति किम् ? ईहते । उपान्त्यस्येति किम् ? भिनत्ति ॥४॥

मिदः श्ये ।४।३।५॥

मिदेरुपान्त्यस्य श्ये गुणः स्यात् । मेद्यति ॥५॥

जागुः किति ।४।३।६॥

जागुः किति गुणः स्यात् । जागरितः ॥६॥

ऋवर्ण-दृशोऽङि ।४।३।७॥

ऋवर्णान्तानां दृशेश्चाऽङि परे गुणः स्यात् । असरत्, अजरत्, अदर्शत् ॥७॥

स्कृच्छृतोऽकि परोक्षायाम् ।४।३।८॥

स्कृच्छोः ऋदन्तानां च नामिनः परोक्षायां गुणः स्यात्, न तु कोपलक्षितायां कसु-काने । सञ्चस्करुः, आनर्च्छुः, तेरुः । अकीति किम् ? सञ्चस्कृवान् ॥८॥

संयोगादृदर्त्तेः ।४।३।९॥

संयोगात् परो य ऋत् तदन्तस्याऽर्त्तेश्च परोक्षायामकि गुणः स्यात् । सस्मरुः, आरुः । संयोगादिति किम् ? चक्रुः ॥९॥

क्य-यङाऽऽशीर्ये ।४।३।१०॥

संयोगाद् य ऋत् तदन्तस्याऽर्त्तेश्च क्ये यङि आशीर्ये च गुणः स्यात् । स्मर्यते, स्वर्यते, अर्यते ; सास्वर्यते, अरार्यते ; स्मर्यात्, अर्यात् ॥१०॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न वृद्धिश्चाऽविति ङिङ्लोपे ।४।३।११॥

अविति प्रत्यये यः कितो ङितश्च लोपस्तस्मिन् सति गुणो वृद्धिश्च न स्यात् । चेच्यः ॥११॥

भवतेः सिज्लुपि ।४।३।१२॥

भुवः सिज्लुपि गुणो न स्यात् । अभूत् । सिज्लुपीति किम् ? व्यत्यभविष्ट ॥१२॥

सूतेः पञ्चम्याम् ।४।३।१३॥

सूतेः पञ्चम्यां गुणो न स्यात् । सुवै ॥१३॥

द्व्युक्तोपान्त्यस्य शिति स्वरे ।४।३।१४॥

द्व्युक्तस्य धातोरुपान्त्यस्य नामिनः स्वरादौ शिति गुणो न स्यात् । नेनिजानि । उपान्त्यस्येति किम् ? जुहवानि । शितीति किम् ? निनेज ॥१४॥

ह्विणोरप्विति व्-यौ ।४।३।१५॥

होरिणश्च नामिनः स्वरादावपिति अविति शिति यथासङ्ख्यं व्यौ स्याताम् । जुह्वति, यन्तु । अप्वितीति किम् ? अजुहवुः, अयानि ॥१५॥

इको वा ।४।३।१६॥

इकः स्वरादाववितिं शिति य् वा स्यात् । अधियन्ति, अधीयन्ति ॥१६॥

कुटादेर्ङिद्वदञ्णित् ।४।३।१७॥

कुटादेः परो ञ्णिद्वर्जप्रत्ययो ङिद्वत् स्यात् । कुटिता, गुता । अञ्णिदिति किम् ? उत्कोटः, उच्चुकोट ॥१७॥

विजेरिट् ।४।३।१८॥

विजेरिट् ङिद्वत् स्यात् । उद्विजिता । इडिति किम् ? उद्वेजनम् ॥१८॥

वोर्ण्णोः ।४।३।१९॥

ऊर्ण्णोरिड् वा ङिद्वत् स्यात् । प्रोर्ण्णुविता, प्रोर्ण्णविता ॥१९॥

शिदवित् ।४।३।२०॥

धातोर्विद्वर्जः शित् प्रत्ययो ङिद्वत् स्यात् । इतः, क्रीणाति । अविदिति किम् ? एति । शिदिति किम् ? चेषीष्ट ॥२०॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इन्ध्यसंयोगात् परोक्षा किद्वत् ।४।३।२१॥

इन्धेरसंयोगान्ताच्च परा अवित् परोक्षा किद्वत् स्यात् । समीधे, निन्युः । इन्ध्यसंयोगादिति किम् ? सस्रंसे ॥२१॥

स्वञेर्नवा ।४।३।२२॥

स्वञेः परोक्षा वा किद्वत् स्यात् । सस्वजे, सस्वञे ॥२२॥

ज-नशो न्युपान्त्ये तादिः क्त्वा ।४।३।२३॥

जन्तात् नशेश्च न्युपान्त्ये सति तादिः क्त्वा किद्वद्वा स्यात् । रक्त्वा, रङ्क्त्वा ; नष्ट्वा, नंष्ट्वा । नीति किम् ? भुक्त्वा । उपान्त्य इति किम् ? निक्त्वा । तादिरिति किम् ? विभज्य ॥२३॥

ऋत्-तृष-मृष-कृश-वञ्च-लुञ्च-थ-फः सेट् ।४।३।२४॥

न्युपान्त्ये सत्येभ्यो वा क्त्वा सेट् किद्वत् स्यात् । ऋतित्वा, अर्त्तित्वा ; तृषित्वा, तर्षित्वा ; मृषित्वा, मर्षित्वा ; कृशित्वा, कर्शित्वा ; वचित्वा, वञ्चित्वा ; लुचित्वा, लुञ्चित्वा ; श्रथित्वा, श्रन्थित्वा ; गुफित्वा, गुम्फित्वा । न्युपान्त्य इत्येव, कोथित्वा, रेफित्वा । सेडिति किम् ? वक्त्वा ॥२४॥

वौ व्यञ्जनाऽऽदेः सन् चाऽय्-वः ।४।३।२५॥

वौ उदित्युपान्त्ये सति व्यञ्जनादेर्धातोः परः क्त्वा सन् च सेटौ किद्वद्वा स्यातां न तु व्यन्तात् । द्युतित्वा, द्योतित्वा ; दिद्युतिषते, दिद्योतिषते ; लिखित्वा, लेखित्वा ; लिलिखिषति, लिलेखिषति । वाविति किम् ? वर्त्तित्वा । व्यञ्जनादेरिति किम् । ओषित्वा ॥२५॥

उति शवर्हाऽद्रुचः क्तौ भावा-ऽऽरम्भे ।४।३।२६॥

उति उपान्त्ये सति शवर्हेभ्योऽदादिभ्यश्च परौ भावा-ऽऽरम्भयोः क्त-क्तवन्तू सेटौ वा किद्वत् स्याताम् । कुचितम्, कोचितमनेन ; प्रकुचितः, प्रकोचितः ; प्रकुचितवान्, प्रकोचितवान् । रुदितम्, रोदितमेभिः ; प्ररुदितः, प्ररोदितः ; प्ररुदितवान्, प्ररोदितवान् । उतीति किम् ? श्विति[त]मेभिः । शवर्हाद्रुच इति किम् ? प्रगुधितः । भावा-ऽऽरम्भ इति किम् ? रुचिता ॥२६॥

न-डीङ्-शीङ्-पूङ्-धृषि-ष्विदि-स्विदि-मिदः ।४।३।२७॥

एभ्यः परौ सेटौ क्त-क्तवन्तू किद्वन्न स्याताम् । डयितः, डयितवान् ; शयितः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शयितवान्, पवितः, पवितवान् ; प्रधर्षितः, प्रधर्षितवान् ; प्रक्ष्वेदितः, प्रक्ष्वेदितवान् ; प्रस्वेदितः, प्रस्वेदितवान् ; प्रमेदितः, प्रमेदितवान्। सेटावित्येव, डीनः, डीनवान् ॥२७॥

मृषः क्षान्तौ ।४।३।२८॥

क्षमार्थान्मृषः सेटौ क्त-क्तवन्तू किद्वन्न स्याताम्। मर्षितः, मर्षितवान्। क्षान्ताविति किम् ? अपमृषितं वाक्यम् ॥२८॥

क्त्वा ।४।३।२९॥

धातोः क्त्वा सेट् किद्वन्न स्यात्। देवित्वा। सेडित्येव, कृत्वा ॥२९॥

स्कन्द-स्यन्दः ।४।३।३०॥

आभ्यां क्त्वा किद्वन्न स्यात्। स्कन्त्वा, स्यन्त्वा ॥३०॥

क्षुध-क्लिश-कुष-गुध-मृड-मृद-वद-वसः ।४।३।३१॥

एभ्यः क्त्वा सेट् किद्वत् स्यात्। क्षुधित्वा, क्लिशित्वा, कुषित्वा, गुधित्वा, मृडित्वा, मृदित्वा, उदित्वा, उषित्वा ॥३१॥

रुद-विद-मुष-ग्रह-स्वप-प्रच्छः सन् च ।४।३।३२॥

[एभ्यः सन् क्त्वा च किद्वत् स्यात्। Jसं.] रुदित्वा, रुरुदिषति ; विदित्वा, विविदिषति ; मुषित्वा, मुमुषिषति ; गृहीत्वा, जिघृक्षति, सुप्त्वा, सुषुप्सति ; पृष्ट्वा, पिपृच्छिषति ॥३२॥

नामिनोऽनिट् ।४।३।३३॥

नाम्यन्ताद्धातोरनिट् सन् किद्वत् स्यात्। चिचीषति। अनिडिति किम् ? शिशयिषते ॥३३॥

उपान्त्ये ।४।३।३४॥

नामिन्युपान्त्ये सति धातोः सन् अनिट् [किद्वत्] स्यात्। बिभित्सति ॥३४॥

सिजाशिषावात्मने ।४।३।३५॥

नामिन्युपान्त्ये सति धातोरात्मनेपदविषयेऽनिटौ सिजाशिषौ किद्वत् स्याताम्। अभित्त, भित्सीष्ट। आत्मने इति किम् ? अस्राक्षीत् ॥३५॥

[ऋवर्णात्] ।४।३।३६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ऋवर्णान्ताद् धातोरनिटावात्मनेपदविषये सिजाशिषौ किद्वत् स्याताम् । अकृत, कृषीष्ट ; अतीर्ष्ट, तीर्षीष्ट ॥३६॥

गमो वा ।४।३।३७॥

गमेरात्मनेपदविषये सिजाशिषौ किद्वद्वा स्याताम् । समगत, समगंस्त ; संगसीष्ट, संगंसीष्ट । *समो गमृच्छि-प्रच्छि-श्रु-वित्स्वरत्यर्तिदृशः [३।३।८४]* इत्यात्मनेपदम् ॥३७॥

हनः सिच् ।४।३।३८॥

हनेरात्मनेपदविषयः सिच् किद्वत् स्यात् । आहत ॥३८॥

यमः सूचने ।४।३।३९॥

सूचनार्थाद् यमेरात्मनेपदविषयः सिच् किद्वत् स्यात् । उदायत । सूचन इति किम् ? आयंस्त रज्जुम् । *समुदाङो यमेरग्रन्थे* [३।३।९८] इत्यात्मनेपदम् ॥३९॥

वा स्वीकृतौ ।४।३।४०॥

वा स्वीकारार्थाद् यमेरात्मनेपदविषयः सिच् त् स्यात् । उपायत, उपायंस्त अस्त्राणि । *यमः स्वीकारे* [३।३।५९] इत्यात्मनेपदम् । स्वीकृताविति किम् ? आयंस्त पाणिम् ॥४०॥

इश्च स्था-दः ।४।३।४१॥

स्थो दासंज्ञच्चाऽऽत्मनेपदविषयः सिच् किद्वत् स्यात्, तद्योगे स्थादेरिश्च । उपास्थित, आदित, व्यधित ॥४१॥

मृजोऽस्य वृद्धिः ।४।३।४२॥

मृजेर्गुणे सति अस्य वृद्धिः स्यात् । मार्ष्टि । अत इति किम् ? मृष्टः ॥४२॥

ऋतः स्वरे वा ।४।३।४३॥

मृजेः ऋतः स्वरादौ प्रत्यये वृद्धिर्वा स्यात् । परिमार्जन्ति, परिमृजन्ति । ऋत इति किम् ? ममार्ज । स्वर इति किम् ? मृज्वः ॥४३॥

सिचि परस्मै समानस्याऽऽडिति ।४।३।४४॥

समानान्तस्य धातोः परस्मैपदविषये सिच्यऽडिति वृद्धिः स्यात् । अचैषीत् । परस्मै इति किम् ? अच्योष्ट । समानस्येति किम् ? अगवीत् । अऽडितीति किम् ? न्यनुवीत् ॥४४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्यञ्जनानामनिटि ।४।३।४५॥

व्यञ्जनान्तस्य धातोः परस्मैपदविषये अनिटि सिचि समानस्य वृद्धिः स्यात् । अराङ्क्षीत् । समानस्येत्येव, उदवोढाम् । अनिटीति किम् ? अतक्षीत् ॥४५॥

वोर्ण्णुगः सेटि ।४।३।४६॥

ऊर्ण्णोः सेटि सिचि परस्मैपदे वृद्धिर्वा स्यात् । प्रौर्ण्णावीत्, प्रौर्ण्णवीत् ॥४६॥

[व्यञ्जनादेर्वोपान्त्यस्याऽतः ।४।३।४७॥

व्यञ्जनादेर्धातोरुपान्त्यस्याऽतः सेटि सिचि परस्मैपदे वृद्धिर्वा स्यात् । अकाणीत्, अकणीत् ।] व्यञ्जनादेरिति किम् ? मा भवान् अटीत् । उपान्त्यस्येति किम् ? अवधीत् । अत इति किम् ? अदेवीत् । सेटीत्येव, अधाक्षीत् ॥४७॥

वद-व्रज-लः ।४।३।४८॥

वद-व्रजोर्लन्त-रन्तयोश्चोपान्त्यस्याऽस्य सेटि सिचि परस्मैपदे वृद्धिः स्यात् । अवादीत्, अव्राजीत्, अज्वालीत्, अक्षारीत् ॥४८॥

न श्वि-जागृ-शस-क्षण-ह्स्येदितः ।४।३।४९॥

एषां ह्स्यन्तानाम् एदितां च परस्मैपदे सेटि सिचि वृद्धिर्न स्यात् । अश्वयीत्, अजागरीत्, अशसीत्, अक्षणीत्, अग्रहीत्, अवमीत्, अहयीत्, अकगीत् ॥४९॥

ञ्णिति ।४।३।५०॥

ञिति णिति च परे धातोरुपान्त्यातो वृद्धिः स्यात् । पाकः, पपाच ॥५०॥

नामिनोऽकलि-हलेः ।४।३।५१॥

नाम्यन्तस्य धातोर्नाम्नो वा कलि-हलिवर्जस्य ञ्णिति वृद्धिः स्यात् । अचायि, कारकः, अपीपटत् । कलि-हलिवर्जनं किम् ? अचकलत्, अजहलत् ॥५१॥

जागुर्ञि-णवि ।४।३।५२॥

जागुर्ञौ णव्येव च ञ्णिति वृद्धिः स्यात् । अजागारि, जजागार । ञिणवीति किम् ? जागरयति ॥५२॥

आत ऐः कृञ्औ ।४।३।५३॥

आदन्तस्य धातोर्ञ्णिति कृति औ च ऐः स्यात् । दायः, दायकः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अदायि । कृदिति किम् ? ददौ ॥५३॥

न जन-बधः ।४।३।५४॥

अनयोः कृति ञ्णिति औ च वृद्धिर्न स्यात् । प्रजनः, जन्यः, अजनि ; बधः, बध्यः, अबधि ॥५४॥

मोऽकमि-यमि-रमि-नमि-गमि-वमा-ऽऽचमः ।४।३।५५॥

मन्तस्य धातोः कम्यादिवर्जस्य ञ्णिति कृति औ च वृद्धिर्न स्यात् । शमः, शमकः, अशमि । कम्यादिवर्जनं किम् ? कामः, कामुकः, अकामि ; यामः, रामः, नामः, अगामि, वामः, आचामकः ॥५५॥

णिद्वाऽन्त्यो णव् ।४।३।५८॥

परोक्षाया अन्त्यो णव् णिद्वा न स्यात् । अहं चिचय, चिचाय ; चुकुट, चुकोट । अन्त्य इति किम् ? स पपाच ॥५६॥

उत और्विति व्यञ्जनेऽद्वेः ।४।३।५९॥

अद्वच्युक्तस्योदन्तस्य धातोर्व्यञ्जनादौ विति औः स्यात् । यौति । उत इति किम् ? एति । धातोरित्येव, सुनोति । वितीति किम् ? रुतः । व्यञ्जन इति किम् ? स्तवानि । अद्वेरिति किम् ? जुहोति ॥५७॥

वोर्ण्णोः ।४।३।६०॥

ऊर्ण्णोरद्वच्युक्तस्य व्यञ्जनादौ विति और्वा स्यात् । प्रोर्ण्णौति, प्रोर्ण्णोति । अद्वेरित्येव, प्रोर्ण्णोनोति ॥५८॥

न दि-स्योः ।४।३।६१॥

ऊर्ण्णोर्दि-स्योः परयोरौर्न स्यात् । प्रौर्ण्णोत्, प्रौर्ण्णोः ॥५९॥

तृहः श्नादीत् ।४।३।६२॥

तृहेः श्नात् परो व्यञ्जनादौ विति परे ईत् स्यात् । तृणेढि ॥६०॥

ब्रूतः परादिः ।४।३।६३॥

ब्रुव ऊतः परो व्यञ्जनादौ विति परादिरीत् स्यात् । ब्रवीति । ऊत इति किम् ? आत्थ ॥६१॥

यङ्-तु-रु-स्तोर्बहुलम् ।४।३।६४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यङ्लुबन्तात् तु-रु-स्तुभ्यश्च परो व्यञ्जनादौ विति ईद् बहुलं परादिः स्यात् । क्वचिद्वा -बोभवीति, बोभोति ; क्वचिन्न -वर्वर्त्ति ; तवीति, तौति ; रवीति, रौति ; स्तवीति, स्तौति । अद्वेरित्येव, तुतोथ, तुष्टोथ ॥६२॥

सः सिजस्तेर्दि-स्योः ।४।३।६५॥

सिजन्ताद् धातोरस्तेश्च सन्तात् परो दि-स्योः परयोः परादिरीत् स्यात् । अकार्षीत्, अकार्षीः ; आसीत्, आसीः । स इति किम् ? अदात् ॥६३॥

पिबैति-दा-भू-स्थः सिचो लुप् परस्मै न चेट् ।४।३।६६॥

एभ्यः परस्य सिचः परस्मैपदे लुप् स्यात्, लुब्योगे च नेट् । अपात्, अगात्, अध्यगात्, अदात्, अधात्, अभूत्, अस्थात् । परस्मै इति किम् ? अपासत पयांसि तैः ॥६४॥

ट्वे-घ्रा-शा-छा-सो वा ।४।३।६७॥

एभ्यः परस्य सिचः परस्मैपदे लुब् वा स्यात्, लुब्योगे च नेट् । अधात्, अधासीत्, अघ्रात्, अघ्रासीत् ; अशात् ; अशासीत् ; अच्छात्, अच्छासीत्, असात्, असासीत् ॥६५॥

तन्भ्यो वा त-थासि न्-णोश्च ।४।३।६८॥

तनादिभ्यः परस्य सिचस्ते थासि च लुब् वा स्यात्, [तद्योगे न्-णोश्च लुप्,] न चेट् । अतत, अतनिष्ट ; अतथाः, अतनिष्ठाः ; असत, असनिष्ट ; असथाः, असनिष्ठाः ॥६६॥

सनस्तत्रा वा ।४।३।६९॥

सनो लुपि सत्याम् आ वा स्यात् । असात, असत ; असाथाः, असथाः । तत्रेति किम् ? असनिष्ट ॥६७॥

धुड्-ह्रस्वाल्लुगनिटस्त-थोः ।४।३।७०॥

धुडन्तात् ह्रस्वान्ताच्च धातोः परस्याऽनिटः सिचस्तादौ थादौ च लुक् स्यात् । अभित्त, अभित्थाः, अकृत, अकृथाः । अनिट इति किम् ? व्यद्योतिष्ट ॥६८॥

इट ईति ।४।३।७१॥

इटः परस्य सिच ईति लुक् स्यात् । अलावीत् । इट इति किम् ?

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अकार्षीत् । ईतीति किम् ? अभणिषम् ॥६९॥

सो धि वा ।४।३।७२॥

धातोर्धादौ प्रत्यये सो लुग् वा स्यात् । चकाधि, चकाद्धि ; अलविध्वम्, अलविड्ढ्वम् ॥७०॥

अस्तेः सि हस्त्वेति ।४।३।७३॥

अस्तेः सि सादौ प्रत्यये लुक् स्यात्, एति तु सो ह[:] । असि, व्यतिसे, व्यतिहे, भावयामाहे ॥७१॥

दुह-दिह-लिह-गुहो दन्त्यात्मने वा सकः ।४।३।७४॥

एभ्यः परस्य सको दन्त्यादौ आत्मनेपदे लुग् वा स्यात् । अदुग्ध, अधुक्षत ; अदिग्ध, अधिक्षत ; अलीढाः, अलिक्षथाः ; न्यगुह्वहि, न्यधुक्षावहि । दन्त्येति किम् ? अधुक्षामहि ॥७२॥

स्वरेऽतः ।४।३।७५॥

सकोऽस्य स्वरादौ प्रत्यये लुक् स्यात् । अधुक्षाताम् ॥७३॥

दरिद्रोऽद्यतन्यां वा ।४।३।७६॥

दरिद्रोऽद्यतन्यां विषये लुग् वा स्यात् । अदरिद्रीत्, अदरिद्रासीत् ॥७४॥

अशित्यस्सन्-णकज्-णका-ऽनटि ।४।३।७७॥

सादिसन्नादिवर्जे अशिति विषये दरिद्रो लुक् स्यात् । दुर्दरिद्रम् । अशितीति किम् ? दरिद्राति । सन्नादिवर्जनं किम् ? दिदरिद्रासति, दरिद्रायको याति, दरिद्रायकः, दरिद्राणम् ॥७५॥

व्यञ्जनाद् देः सश्च दः ।४।३।७८॥

धातोर्व्यञ्जनान्तात् परस्य देर्लुक् स्याद्, यथासम्भवं धातोः सो द् च । अचकात् । व्यञ्जनादित्येव(ति किम् ?) अयात् ॥७६॥

सेः स्-द्-धां च रुर्वा ।४।३।७९॥

व्यञ्जनान्ताद् धातोः परस्य सेर्लुक् स्यात्, यथासंम्भवं स्-द्-धां वा रुश्च । अचकास्त्वम्, अचकात् त्वम् ; अभिनस्त्वम्, अभिनत् त्वम् ; अरुणस्त्वम्, अरुणत् त्वम् ॥७७॥

योऽशिति ।४।३।८०॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

धातोर्व्यञ्जना[न्ता]त् परस्य योऽशिति प्रत्यये लुक् स्यात् । जङ्गमिता । व्यञ्जनादित्येव, लोलूयिता । अशितीति किम् ? बेभिद्यते ॥७८॥

क्यो वा ।४।३।८१॥

धातोर्व्यञ्जना[न्ता]त् परस्य क्योऽशिति विषये (प्रत्यये) लुग् वा स्यात् । समिधिष्यति, समिध्यिष्यति ; दृषदिष्यते, दृषद्यिष्यते ॥७९॥

अतः ।४।३।८२॥

अदन्ताद् धातोर्विहितेऽशिति प्रत्यये अतो लुक् स्यात् । कथयति । [विहितविशेषणं किम् ? गतः ॥८०॥

णेरनिटि ।४।३।८३॥

अनिट्यशिति प्रत्यये णेर्लुक् स्यात् ।] अततक्षत्, चेतनः । अनिटीति किम् ? कारयिता ॥८१॥

सेट्क्त्वोः ।४।३।८४॥

सेटोः क्त्वोः परयोः णेर्लुक् स्यात् । कारितः, गणितवान् ॥८२॥

आमन्ता-ऽऽल्वाऽऽय्येत्त्वावय् ।४।३।८५॥

एषु परेषु णेरय् स्यात् । कारयाञ्चकार, गण्डयन्तः, स्पृहयालुः, महयाय्यः, स्तनयित्नुः ॥८३॥

लघोर्यपि ।४।३।८६॥

लघोः परस्य णेर्यपि अय् स्यात् । प्रशमय्य । लघोरिति किम् ? प्रतिपाद्य ॥८४॥

वाऽऽप्नोः ।४।३।८७॥

आप्नोः परस्य णेर्यप्यय् वा स्यात् । प्रापय्य, प्राप्य । आप्नोरिति किम् ? अध्यापय्य ॥८५॥

मेङो वा मित् ।४।३।८८॥

मेङो यपि मिद् वा स्यात् । अपमित्य, अपमाय ॥८६॥

क्षेः क्षी ।४।३।८९॥

क्षेर्यपि क्षीः स्यात् । प्रक्षीय ॥८७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्षय्य-जय्यौ शक्तौ ।४।३।९०॥

क्षि-ज्योरन्तस्य [शक्तौ] गम्यायां ये प्रत्ययेऽय् निपात्यते । [क्षय्यो व्याधिः, जय्यः शत्रुः । शक्ताविति किम् ? क्षेयम्, जेयम् ॥८८॥

क्रय्यः क्रयार्थे ।४।३।९१॥

क्रियोऽन्तस्य ये प्रत्ययेऽय् निपात्यते,] क्रयाय चेत् प्रसारितोऽर्थः । क्रय्यो गौः । क्रयार्थ इति किम् ? क्रेयं ते धान्यं न चास्ति प्रसारितम् ॥८९॥

सस्तः सि ।४।३।९२॥

धातोः सन्तस्याऽशिति सादौ प्रत्यये विषयभूते त् स्यात् । वत्स्यति । स इति किम् ? यक्षीष्ट । सीति किम् ? वसिषीष्ट ॥९०॥

दीय् दीङः क्ङिति स्वरे ।४।३।९३॥

दीङः क्ङिति अशिति स्वरे दीय् स्यात् । उपदिदीयाते । क्ङितीति किम् ? उपदानम् । स्वर इति किम् ? उपदेदीयते ॥९१॥

इडेत्-पुसि चाऽऽतो लुक् ।४।३।९४॥

क्ङित्यशिति स्वरे, इटि, एति, पुसि च परे आदन्तस्य धातोर्लुक् स्यात् । पपुः, अदधत्, पपिथ, व्यतिरे, अदुः ॥९२॥

संयोगादेर्वाऽऽशिष्येः ।४।३।९५॥

धातोः संयोगादेरादन्तस्य क्ङित्याशिषि एर्वा स्यात् । ग्लेयात्, ग्लायात् । [संयोगादेरिति किम् ? यायात् । क्ङितीत्येव, ग्लासीष्ट ॥९३॥

गा-पा-स्था-सा-दा-मा-हाकः ।४।३।९६॥

एषां क्ङित्याशिष्येः स्यात् । गेयात्,] पेयात्, स्थेयात्, अवसेयात्, देयात्, धेयात्, मेयात्, हेयात् ॥९४॥

ई व्यञ्जनेऽयपि ।४।३।९७॥

गादेर्यबूवर्जे क्ङित्यशिति व्यञ्जनादौ ईः स्यात् । गीयते, जेगीयते, पीयते, स्थीयते, सीयते, दीयते, धीयते, मीयते, हीनः । व्यञ्जन इति किम् ? तस्थुः । अयपीति किम् ? प्रगाय ॥९५॥

घ्रा-ध्मोर्यङि ।४।३।९८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

घ्रा-ध्मोर्वडि ईः स्यात् । जेघ्रीयते, देध्मीयते ॥९६॥

हनो घ्नी वधे ।४।३।९९॥

हन्तेर्वधार्थस्य यडि घ्नीः स्यात् । जेघ्नीयते । वध इति किम् ? गतौ जङ्घन्यते ॥९७॥

ञ्णिति घात् ।४।३।१००॥

ञिति णिति च परे हन्तेर्घात् स्यात् । घातः, घातयति ॥९८॥

ञि-णवि घन् ।४।३।१०१॥

ञौ णवि च परे हन्तेर्घन् स्यात् । अघानि, जघान ॥९९॥

नशेर्नेश् वाऽडि ।४।३।१०२॥

नशेरडि नेश् वा स्यात् । अनेशत्, अनशत् ॥१००॥

श्वयत्यसू-वच-पतः श्वा-ऽऽस्थ-वोच-पप्तम् ।४।३।१०३॥

एषामडि यथासङ्ख्यं श्वादयः स्युः । अश्वत्, आस्थत्, अवोचत्, अपप्तत् ॥१०१॥

शीङ एः शिति ।४।३।१०४॥

शीङः शित्येः स्यात् । शेते ॥१०२॥

क्ङिति यि शय् ।४।३।१०५॥

शीङः क्ङिति यादौ शय् स्यात् । शय्यते, शाशय्यते । क्ङितीति किम् ? शेयम् ॥१०३॥

उपसर्गादूहो ह्रस्वः ।४।३।१०६॥

उपसर्गात् परस्योहतेरूतः क्ङिति यादौ परे ह्रस्वः स्यात् । समुह्यते । उपसर्गादिति किम् ? ऊह्यते । यीत्येव, समूहितम् । ऊ ऊह इति प्रश्लेषवचनं किम् ? आ ऊह्यते=ओह्यते, समोह्यते ॥१०४॥

आशिषीणः ।४।३।१०७॥

उपसर्गात् परस्येण ईतः क्ङिति यादावाशिषि ह्रस्वः स्यात् । उदियात् । ई इण इति प्रश्लेषः किम् ? आ ईयात्=एयात्, समेयात् ॥१०५॥

दीर्घश्वि-यङ्-यक्-क्येषु च ।४।३।१०८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एषु यादावाशिषि च दीर्घः स्यात् । शुचीकरोति ; तोष्टूयते ; मन्तूयति ; दधीयति, भृशायते, लोहा(हिता)यति, स्तूयते ; ईयात् ॥१०६॥

ऋतो री ।४।३।१०९॥

च्व्यादौ परे ऋदन्तस्य ऋतः स्थाने रीः स्यात्। पित्रीस्यात्, चेक्रीयते, मात्रीयते, पित्रीयते । ऋत इति किम् ? चेकीर्यते ॥१०७॥

रिः श-क्या-ऽऽशीर्ये ।४।३।११०॥

ऋदन्तस्य धातोः ऋतः शे क्ये आशीर्ये च परे रिः स्यात् । ध्रियते, क्रियते, ह्रियात् ॥१०८॥

ईश्च्वाववर्णस्याऽनव्ययस्य ।४।३।१११॥

अनव्ययस्याऽवर्णान्तस्य च्वौ ईः स्यात् । शुक्लीस्यात्, मालीस्यात् । अनव्यय-स्येति किम् ? दिवाभूता रात्रिः ॥१०९॥

क्यनि ।४।३।११२॥

अवर्णान्तस्य क्यनि ईः स्यात् । पुत्रीयति, मालीयति ॥११०॥

चतुर्थस्य तृतीयः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[चतुर्थाध्याये चतुर्थः पादः]

अस्ति-ब्रुवोर्भू-वचावशिति ।४।४।१॥

अस्ति-ब्रुवोर्यथासङ्ख्यं भू-वचौ स्याताम् अशिति विषये । भव्यम्, अवोचत् । अशितीति किम् ? स्यात्, ब्रूते ॥१॥

अघञ्क्यबलच्यजेर्वी ।४।४।२॥

अघञादावशिति विषये अजेर्वी स्यात् । प्रवेयम् । अघञ्क्यबलि(लची)ति किम् ? समाजः, समज्या, उदजः पशुः(शोः ?), अजः ॥२॥

त्रने वा ।४।४।३॥

त्रनयोर्विषयभूतयोरजेर्वी वा स्यात् । प्रवेता, प्राजिता ; प्रवयणः, प्राजनो दण्डः ॥३॥

चक्षो वाचि कृशांगृ-ख्यांगृ ।४।४।४॥

चक्षो वागर्थस्याऽशिति विषये कृशांगृ-ख्यांगौ स्याताम् । आक्शास्यति, आक्शास्यते ; आख्यास्यति, आख्यास्यते ; आख्येयम् । वाचीति किम् ? बोधे विचक्षणः ॥४॥

नवा परोक्षायाम् ।४।४।५॥

चक्षो वाचि क्शांगृ-ख्यांगौ परोक्षायां वा स्याताम् । आचक्शौ, आचख्यौ, आचचक्षे ॥५॥

भृज्जो भर्ज् ।४।४।६॥

भृज्जतेरशिति भर्ज् वा स्यात् । भर्ष्टा, भ्रष्टा ॥६॥

प्राद् दागस्त्त आरम्भे क्ते ।४।४।७॥

आरम्भार्थस्य प्रपूर्वस्य दागः क्ते परे त्त् वा स्यात् । प्रत्तः, प्रदत्तः । प्रादिति किम् ? परीत्तम् । *दस्ति* [३।२।८८] इति दीर्घः ॥७॥

नि-वि-स्वन्ववात् ।४।४।८॥

एभ्यः परस्य दागः क्ते त्त् वा स्यात् । नीत्तम्, निदत्तम् ; वीत्तम्, विदत्तम् ; सूत्तम्, सुदत्तम् ; अनूत्तम्, अनुदत्तम् ; अवत्तम्, अवदत्तम् ॥८॥

स्वरादुपसर्गाद् दस्ति कित्यधः ।४।४।९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वरान्तादुपसर्गात् परस्य धावर्जस्य दासंज्ञस्य तादौ किति त्त् नित्यं स्यात् । प्रत्तः, परीत्तिमम् । उपसर्गादिति किम् ? दधि दत्तम् । स्वरादिति किम् ? निर्दत्तम् । द इति किम् ? प्रदाता व्रीहयः । तीति किम् ? प्रदाय । अध इति किम् ? निधीतः ॥९॥

दत् ।४।४।१०॥

अधो दासंज्ञस्य तादौ किति दत् स्यात् । दत्तः, दत्तिः । अध इत्येव, धीतः ॥१०॥

दो-सो-मा-स्थ इ ।४।४।११॥

एषां तादौ किति इः स्यात् । निर्दितः, सित्वा, मितिः, स्थितवान् ॥११॥

छा-शोर्वा ।४।४।१२॥

छा-शोस्तादौ किति इर्वा स्यात् । अवच्छितः, अवच्छातः ; निशितः, निशातः ॥१२॥

हाको हि क्त्वि ।४।४।१४॥

हाकस्तादौ किति क्त्वायां हिः स्यात् । हित्वा । क्त्वीति किम् ? हीनः । तीत्येव, प्रहाय ॥१३॥

धागः ।४।४।१५॥

धागस्तादौ किति हिः स्यात् । विहितः, हित्वा ॥१४॥

यपि चाऽदो जग्ध् ।४।४।१६॥

तादौ किति यपि चाऽदेर्जग्ध् स्यात् । जग्धिः, प्रजग्ध्य ॥१५॥

घस्लृ सनद्यतनी-धञ्चलि ।४।४।१७॥

एष्वदेर्घस्लृ[ः] स्यात् । जिघत्सति, अघसत्, घासः, प्रघसः ॥१६॥

परोक्षायां नवा ।४।४।१८॥

अदेः परोक्षायां घस्लृ[र्वा] स्यात् । जक्षुः, आदुः ॥१७॥

वेर्वय् ।४।४।१९॥

वेगः परोक्षायां वय् वा स्यात् । ऊयुः, ववुः ॥१८॥

ऋः शॄ-दॄ-प्रः ।४।४।२०॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एषां परोक्षायाम् ऋर्वा स्यात् । विशश्रतुः ; विशशरतुः, विदद्रतुः, विददरतुः ; निपप्रतुः, निपपरतुः ॥१९॥

हनो वध आशिष्यञौ ।४।४।२१॥

आशीर्विषये हन्तेर्वधः स्यात्, [न तु ञिटि । वध्यात् । अञाविति किम् ? घानिषीष्ट ॥२०॥

अद्यतन्यां वा त्वात्मने ।४।४।२२॥

अद्यतन्यां विषये हनो वधः स्याद्,] आत्मनेपदे तु वा । अवधीत् ; आवधिष्ट, आहत ॥२१॥

इणिकोर्गा ।४।४।२३॥

इणिकोरद्यतन्यां गाः स्यात् । अगात्, अध्यगात् ॥२२॥

णावज्ञाने गमुः ।४।४।२४॥

इणिकोरज्ञानार्थयोर्णौ गमुः स्यात् । गमयति, अधिगमयति गाम् । अज्ञान इति किम् ? अर्थान् प्रत्याययति ॥२३॥

सनीङश्च ।४।४।२५॥

इङ इणिकोश्चाऽज्ञानार्थयोः सनि गमुः स्यात् । अधिजिगांसते, जिगमिषति ग्रामम्, मातुरधिजिगमिषति ॥२४॥

गा परोक्षायाम् ।४।४।२६॥

इङः परोक्षाविषये गाः स्यात् । अधिजगे ॥२५॥

णौ सन्-ङे वा ।४।४।२७॥

सन्-ङपरे णौ इङो गा वा स्यात् । अधिजिगापयिषति, अध्यापिपयिषति ; अध्यजीगपत्, अध्यापिपत् । णाविति किम् ? अधिजिगांसते । सन्-ङ इति किम् ? अध्यापयति ॥२६॥

वाऽद्यतनी-क्रियातिपत्त्योर्गीङ् ।४।४।२८॥

अनयोरिङो गीङ् वा स्यात् । अध्यगीष्ट, अध्यैष्ट ; अध्यगीष्यत, अध्यैष्यत ॥२७॥

अङ् धातोरादिर्ह्यस्तन्यां चाऽमाङा ।४।४।२९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ह्यस्तन्यामद्यतनी-क्रियातिपत्त्योश्च विषये धातोरादिरट् स्यात्, न तु माङ्योगे । अयात्, अयासीत्, अयास्यत् । अमाङेति किम् ? मा स्म कार्षीत् । धातोरिति किम् ? प्रायाः ॥२८॥

एत्यस्तेर्वृद्धिः ।४।४।३०॥

इणिकोरस्तेश्चाऽऽदेर्ह्यस्तन्यां विषये वृद्धिः स्यात्, न तु माङा । आयन्, अध्यायन्, आस्ताम् । अमाङेत्येव, मा स्म ते यन् ॥२९॥

स्वरादेस्तासु ।४।४।३१॥

स्वरादेर्धातोरादेरद्यतनी-क्रियातिपत्ति-ह्यस्तनीषु विषये वृद्धिः स्यात्, अमाङा । आटीत्, ऐषिष्यत्, औज्झत् । अमाङेत्येव, मा सोऽटीत् ॥३०॥

स्ताद्यशितोऽत्रोणादेरिट् ।४।४।३२॥

धातोः परस्य सादेस्तादेश्चाऽशित आदिरिट् स्यात्, न तु त्रोणाद्योः । लविष्यति, लविता । स्तादीति किम् ? भूयात् । अशित इति किम् ? आस्से । अत्रोणादेरिति किम् ? शस्त्रम्, वत्सः, हस्तः ॥३१॥

तेर्ग्रहादिभ्यः ।४।४।३३॥

एभ्य एव परस्य स्ताद्यशितः तेरादिरिट् स्यात् । निगृहीतिः, अपस्निहितिः । ग्रहादिभ्य इति किम् ? शान्तिः ॥३२॥

गृह्णोऽपरोक्षायां दीर्घः ।४।४।३४॥

ग्रहेर्यो विहित इट् तस्य दीर्घः स्यात्, न तु परोक्षायाम् । ग्रहीता । अपरोक्षायामिति किम् ? जगृहिव ॥३३॥

वृतो नवाऽनाशीः-सिच्परस्मै च ।४।४।३५॥

वृभ्यामृदन्तेभ्यश्च परस्येटो दीर्घो वा स्यात्, न तु परोक्षा-ऽऽशिषोः सिचि [च] परस्मैपदे । प्रावरीता, प्रावरिता ; वरीता, वरिता ; तितरीषति, तितरिषति । परोक्षादिवर्जनं किम् ? ववरिथ, तेरिथ, प्रावरिषीष्ट, आस्तरिषीष्ट, प्रावारिषुः, आस्तारिषुः ॥३४॥

इट् सिजाशिषोरात्मने ।४।४।३६॥

वृञ्द्रयां परयोरात्मनेपदविषये सिजाशिषोरादिरिट् वा स्यात् । [प्रावृत, प्रावरिष्ट ; अवृत, अवरीष्ट ; आस्तीर्ष्ट, आस्तरिष्ट ; प्रावृषीष्ट, प्रावरिषीष्ट ;

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृषीष्ट, वरिषीष्ट ; आस्तीर्षीष्ट, आस्तरिषीष्ट । आत्मने इति किम् ? प्रावारीत् ॥३५॥

संयोगाद् ऋतः ।४।४।३७॥

धातोः संयोगात् परो य ऋत् तदन्तात् परयोरात्मनेपदविषयसिजाशिषोरादिरिट् वा स्यात् ।] अस्मृषाताम्, अस्मरिषाताम् । संयोगादिति किम् ? अकृत ॥३६॥

धूगौदितः ।४।४।३८॥

धूग औदितश्च परस्य स्ताद्यशित आदिरिट् वा स्यात् । धोता, धविता ; रद्धा, रधिता ॥३७॥

निष्कुषः ।४।४।३९॥

निष्पूर्वात् कुषः परस्य स्ताद्यशित आदिरिट् वा स्यात् । निष्कोष्टा, निष्कोषिता ॥३८॥

क्तयोः ।४।४।४०॥

निष्कुषः परयो[: क्तयो]रादिरिट् नित्यं स्यात् । निष्कुषितः, निष्कुषितवान् ॥३९॥

जॄ-व्रश्चः क्त्वः ।४।४।४१॥

आभ्यां परस्य क्त्व आदिरिट् स्यात् । जरीत्वा, व्रश्चित्वा ॥४०॥

ऊदितो वा ।४।४।४२॥

ऊदितः परस्य क्त्व आदिरिट् वा स्यात् । दान्त्वा, दमित्वा ॥४१॥

क्षुध-वसस्तेषाम् ।४।४।४३॥

आभ्यां परेषां क्त-क्तवन्तु-क्त्वामादिरिट् स्यात् । क्षुधितः, क्षुधितवान्, क्षुधित्वा ; उषितः, उषितवान्, उषित्वा ॥४२॥

लुभ्यश्चेर्विमोहार्चे ।४।४।४४॥

आभ्यां यथासंख्यं विमोहन-पूजार्थाभ्यां परेषां क्त-क्तवन्तु-क्त्वामादिरिट् स्यात् । विलुभितः, विलुभितवान्, लुभित्वा ; अञ्चितः, अञ्चितवान्, अञ्चित्वा । विमोहार्चे इति किम् ? लुब्धो जाल्मः, उदक्तं जलम् ॥४३॥

पूङ्-क्लिशिभ्यो नवा ।४।४।४५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पूङः क्लिशिभ्यां च परेषां क्त-क्तवन्तु-क्त्वामादिरिड् वा स्यात् । पूतः, पूतवान्, पूत्वा ; पवितः, पवितवान्, पवित्वा । क्लिष्टः, क्लिष्टवान्, क्लिष्ट्वा ; क्लिशितः, क्लिशितवान्, क्लिशित्वा ॥४४॥

सह-लुभेच्छ-रुष-रिषस्तादेः ।४।४।४६॥

एभ्यः परस्य स्ताद्यशितस्तादेरिट् वा स्यात् । सोढा, सहिता ; लोब्धा, लोभिता ; एष्टा, एषिता ; रोष्टा, रोषिता ; रेष्टुम्, रेषितुम् ॥४५॥

इवृध-भ्रस्ज-दम्भ-श्रि-यूर्ण्णु-भर-ज्ञपि-सनि-तनि-पति-वृद्-दरिद्रः सनः ।४।४।४७॥

इवन्ताद् ऋधादिभ्य ऋदन्तेभ्यो दरिद्रश्च परस्य सन आदिरिट् वा स्यात् । दुद्यूषति, दिदेविषति ; ईर्त्सति, अर्दिधिषति ; बिभर्क्षति, बिभर्जिषति ; धिप्सति, दिदम्भिषति ; शिश्रीषति, शिश्रयिषति ; युयूषति, वियविषति ; प्रोर्ण्णुनूषति, प्रोर्ण्णुनविषति ; बुभूर्षति, बिभरिषति ; ज्ञीप्सति, जिज्ञपयिषति ; सिषासति, सिसनिषति ; तितंसति, तितनिषति ; पित्सति, पिपतिषति ; प्राबुवूर्षति, प्राविवरिषति ; वुवूर्षते, विवरीषते ; तितीर्षति, तितरीषति ; दिदरिद्रासति, दिदरिद्रिषति ॥४६॥

ऋ-स्मि-पूङ्-ज्ञशौ-कॄ-गॄ-दृ-धृ-प्रच्छः ।४।४।४८॥

एभ्यः परस्य सन आदिरिट् स्यात् । अरिरिषति, सिस्मयिषते, पिपविषते, अञ्जिजिषति, अशिशिषते, चिकरीषति, जिगरीषति, आदिदरिषते, आदिधरिषते, पिपृच्छिषति ॥४७॥

हनृतः स्यस्य ।४।४।४९॥

हन्तेः ऋदन्ताच्च परस्य स्यस्याऽऽदिरिट् स्यात् । हनिष्यति, करिष्यति ॥४८॥

कृत-चृत-नृत-च्छृद-तृदोऽसिचः सादेर्वा ।४।४।५०॥

एभ्यः परस्याऽसिचः सादेः स्ताद्यशित आदिरिट् वा स्यात् । कर्त्स्यति, कर्तिष्यति ; चिचृत्सति, चिचर्त्तिषति ; नर्त्स्यति, नर्त्तिष्यति ; अच्छर्त्स्यत्, अच्छर्दिष्यत् ; तितृत्सति, तितर्दिषति । असिच इति किम् ? अकर्तीत् ॥४९॥

गमोऽनात्मने ।४।४।५१॥

गमः परस्य स्ताद्यशितः सादेरादिरिट् स्यात्, न त्वात्मनेपदे । गमिष्यति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अधिजिगमिषिता शास्त्रस्य । अनात्मने इति किम् ? संगंसीष्ट ॥५०॥

स्नोः ।४।४।५२॥

स्नोः परस्य स्ताद्यशितोऽनात्मनेपदे आदिरिट् स्यात् । प्रस्नविष्यति । अनात्मन इत्येव, प्रास्नोष्ट ॥५१॥

क्रमः ।४।४।५३॥

क्रमः परस्य स्ताद्यशित आदिरिट् स्यात्, अनात्मनेपदे । क्रमिष्यति, प्रक्रमितुम् । अनात्मन इत्येव, प्रक्रंस्यते ॥५२॥

तुः ।४।४।५४॥

अनात्मनेपदविषयात् क्रमः परस्य तुः स्ताद्यशित आदिरिट् स्यात् । क्रमिता । अनात्मन इत्येव, प्रक्रन्ता ॥५३॥

न वृद्भ्यः ।४।४।५५॥

वृदादिपञ्चकात् [परस्य] स्ताद्यशित आदिरिड् न स्यात्, नचेदसावात्मनेपद-निमित्तम् । वर्त्स्यति, विवृत्सति ; स्यन्त्स्यति, सिस्यन्त्सति ॥५४॥

एकस्वरादनुस्वारेतः ।४।४।५६॥

एकस्वरादनुस्वारेतो धातोर्विहितस्य स्ताद्यशित आदिरिट् न स्यात् । पाता । एकस्वरादिति किम् ? अवधीत् ॥५५॥

ऋवर्ण्ण-श्र्यूर्ण्णुगः कितः ।४।४।५७॥

ऋवर्ण्णान्ताद् धातोः श्रेरूर्ण्णोश्च एकस्वराद् विहितस्य कित आदिरिट् न स्यात् । वृतः, तीर्त्वा, श्रितः, ऊर्ण्णुत्वा । एकस्वरादित्येव, जागरितः । कित इति किम् ? वरिता ॥५६॥

उवर्णात् ।४।४।५८॥

उवर्णान्तादेकस्वराद् विहितस्य कित आदिरिट् न स्यात् । युतः, लूनः ॥५७॥

ग्रह-गुहश्च सनः ।४।४।५९॥

आभ्यामुवर्णान्ताच्च विहितस्य सन आदिरिट् न स्यात् । जिघृक्षति, जुघुक्षति, रुरूषति ॥५८॥

स्वार्थे ।४।४।६०॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वार्थार्थस्य सन आदिरिट् न स्यात् । जुगुप्सते ॥५९॥

डीय-श्व्यैदितः क्तयोः ।४।४।६१॥

डीयतेः श्वैरैदिद्भ्यश्च धातुभ्यः परयोः क्त-क्तवन्त्वोरादिरिट् न स्यात् । डीनः, डीनवान् ; शूनः, शूनवान् ; त्रस्तः, त्रस्तवान् ॥६०॥

वेटोऽपतः ।४।४।६२॥

अपतो विकल्पितेटो धातोरेकस्वरात् परयो[ः क्तयो]रादिरिट् न स्यात् । रद्धः, रद्धवान् । अपत इति किम् ? पतितः ॥६१॥

सं-नि-वेरर्दः ।४।४।६३॥

एभ्यः पराद् अर्देः परयोः क्तयोरादिरिट् न स्यात् । समर्ण्णः, समर्ण्णवान् ; न्यर्ण्णः, न्यर्ण्णवान् ; व्यर्ण्णः, व्यर्ण्णवान् । संनिवेरिति किम् ? अर्दितः ॥६२॥

अविदूरेऽभेः ।४।४।६४॥

अभेः पराद् अर्देः परयो[ः क्तयो]रविदूरेऽर्थे आदिरिट् न स्यात् । अभ्यर्ण्णम् । अविदूर इति किम् ? अभ्यर्दितो दीनः शीतेन ॥६३॥

कषः कृच्छ्र-गहने ।४।४।६७॥

अनयोरर्थयोः कषेः परयोः क्तयोरादिरिट् न स्यात् । कष्टं दुःखम्, कष्टोऽग्निः, कष्टं वनं दुरवगाहम् । कृच्छ्र इति किम् ? कषितं स्वर्णम् ॥६४॥

घुषेरविशब्दे ।४।४।६८॥

अविशब्दार्थाद् घुषेः परयोः क्तयोरादिरिट् न स्यात् । घुष्टा रज्जुः, घुष्टवान् । अविशब्द इति किम् ? अवघुषितं वाक्यम् ॥६५॥

आदितः ।४।४।७१॥

आदितो धातोः परयोः क्तयोरादिरिट् न स्यात् । मिन्नः, मिन्नवान् ॥६६॥

नवा भावा-ऽऽरम्भे ।४।४।७२॥

आदितो भावा-ऽऽरम्भार्थयोः क्तयोरादिरिट् वा [न] स्यात् । मिन्नम्, मेदितम् ; प्रमिन्नः, प्रमेदितः, प्रमिन्नवान्, प्रमेदितवान् ॥६७॥

णौ दान्त-शान्त-पूर्ण-दस्त-स्पष्ट-च्छन्न-ज्ञप्तम् ।४।४।७४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दमादीनां णौ क्तान्तानामेते वा निपात्यन्ते । दान्तः, दमितः, शान्तः, शमितः ; पूर्णः, पूरितः ; दस्तः दासितः ; + स्पष्टः, स्पाशितः ; छन्नः, छादितः ; ज्ञप्तः, ज्ञापितः ॥६८॥

श्वस-जप-वम-रुष-त्वर-संघुषा-ऽऽस्वना-ऽमः ।४।४।७५॥

एभ्यः क्तयोरादिरिट् वा न स्यात् । श्वस्तः, श्वसितः ; विश्वस्तवान्, विश्वसितवान् । जप्तः, जपितवान् ; जपितः, जपितवान् । वान्तः, वान्तवान् ; वमितः, वमितवान् । रुष्टः, रुष्टवान् ; रुषितः, रुषितवान् । तूर्णः, तूर्णवान् ; त्वरितः, त्वरितवान् । संघुष्टौ, संघुषितौ दम्यौ ; संघुष्टवान्, संघुषितवान् । आस्वान्तः, आस्वनितः ; [आस्वान्तवान्, आस्वनितवान् ।] आभ्यान्तः, आभ्यान्तवान् ; आ(अ)भ्यमितः,आ(अ)भ्यमितवान् ॥६९॥

हृषेः केश-लोम-विस्मय-प्रतिघाते ।४।४।७६॥

हृषेः केशाद्यर्थात् क्तयोरादिरिट् वा न स्यात् । हृष्टाः हृषिताः केशाः ; हृष्टं हृषितं लोमभिः ; हृष्टो हृषितश्चैत्रः ; हृष्टाः हृषिताः दन्ताः ॥७०॥

सृजि-दृशि-स्कृ-स्वरा-ऽत्वतस्तृजनित्यानिटस्थवः ।४।४।७८॥

सृजि-दृशिभ्यां स्कृगः स्वरान्तादत्वतश्च तृचि नित्याऽनिटो विहितस्य थव आदिरिट् वा न स्यात् । सस्रष्ठ, ससर्जिथ ; ददृष्ठ, ददर्शिथ ; सञ्चस्कर्थ, सञ्चस्करिथ ; ययाथ, यथिथ ; पपक्थ, पेचिथ । तृजनित्यानिट इति किम् ? ररन्धिथ, शिश्रयिथ । विहितविशेषणं किम् ? चकर्षिथ ॥७१॥

ऋतः ।४।४।७९॥

ऋदन्तात् तृजनित्यानिटो विहितस्य थव आदिरिट् न स्यात् । जहर्थ । तृजनित्यानिट इत्येव, सस्वरिथ ॥७२॥

ऋ-वृ-व्ये-ऽद इट् ।४।४।८०॥

एभ्यः परस्य थव आदिरिट् स्यात् । आरिथ, ववरिथ, संविव्ययिथ, आदिथ ॥७३॥

स्कृसृ-वृ-भृ-स्तु-द्रु-श्रु-स्रोर्व्यञनादेः परोक्षायाः ।४।४।८१॥

स्कृगः स्रादिवर्जेभ्यश्च सर्वधातुभ्यः परस्याः परोक्षायाः व्यञ्जनादेरादिरिट् स्यात् । संचस्करिव, ददिव, चिच्यिवहे । स्किरति किम् ? चकृव । स्रादिवर्जनं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किम् ? ससृव ; ववृव, ववृवहे ; बभर्थ,++ तुष्टोथ, दुद्रोथ, शुश्रोथ, सुस्रोथ ॥७४॥

घसेकस्वराऽऽतः कंसोः ।४।४।८२॥

घसेरेकस्वराद् आदन्ताच्च धातोः परस्य कंसोः परोक्षाया आदिरिट् स्यात् । जक्षिवान्, आदिवान्, ययिवान् । परोक्षाया इत्येव, विद्वान् ॥७५॥

गम-हन-विद्लृ-विश-दृशो वा ।४।४।८३॥

एभ्यः परस्य कंसोरादिरिट् वा स्यात् । जग्मिवान्, जगन्वान् ; जघ्निवान्, जघन्वान् ; विविदिवान् ; विविद्वान्, विविशिवान्, विविश्वान् ; ददृशिवान्, ददृश्वान् ॥७६॥

सिचोऽञ्जेः ।४।४।८४॥

अञ्जेः सिच आदिरिट् स्यात् । आञ्जीत् ॥७७॥

धूग्-सु-स्तोः परस्मै ।४।४।८५॥

एभ्यः परस्मैपदे सिच आदिरिट् स्यात् । अधावीत्, असावीत्, अस्तावीत् । परस्मै इति किम् ? अधोष्ट ॥७८॥

यमि-रमि-नम्यातः सोऽन्तश्च ।४।४।८६॥

एभ्य आदन्तेभ्यश्च परस्मैपदे सिच आदिरिट् स्यात्, एषां च सन्तः । अयंसीत्, व्यरंसीत्, अनंसीत्, अयासिष्टाम् ॥७९॥

ईशीडः से-ध्वे-स्व-ध्वमोः ।४।४।८७॥

आभ्यां वर्त्तमानासे-ध्वयोः पञ्चमीस्व-ध्वमोश्चादिरिट् स्यात् । ईशिषे, ईशिध्वे, ईशिष्व, ईशिध्वम् ; ईडिषे, ईडिध्वे, ईडिष्व, ईडिध्वम् ॥८०॥

रुत्पञ्चकाच्छिदयः ।४।४।८८॥

रुदादेः पञ्चतः परस्य यवर्जव्यञ्जनादेः शित आदिरिट् स्यात् । रोदिति, स्वपिति । अयिति (अय इति) किम् ? रुद्यात् ॥८१॥

दि-स्योरीट् ।४।४।८९॥

रुत्पञ्चकात् दिस्योः शितोरादिरीट् स्यात् । अरोदीत्, अरोदीः ॥८२॥

अदश्चाऽट् ।४।४।९०॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अत्ते रुत्पञ्चकाच्च दिस्योरादिरट् स्यात् । आदत्, आदः ; अरोदत्, अरोदः ॥८३॥

संपरेः कृगः स्सट् ।४।४।९१॥

आभ्यां परस्य कृग आदिः स्सट् स्यात् । संस्करोति कन्याम्, परिष्करोति ॥८४॥

उपाद् भूषा-समवाय-प्रतियत्न-विकार-वाक्याध्याहारे ।४।४।९२॥

उपात् परस्य कृगो भूषादिष्वर्थेष्वादिः स्सट् स्यात् । कन्यामुपस्करोति, तत्र न उपस्कृतम्, एधोदकमुपस्कुरुते, उपस्कृतं भुङ्क्ते, सोपस्कारं सूत्रम् ॥८५॥

उदितः स्वरान्नोऽन्तः ।४।४।९८॥

उदितो धातोः स्वरात् परो न् अन्तः स्यात् । नन्दति, कुण्डा ॥८६॥

मुचादि-तृफ-दृफ-गुफ-शुभोभः शे ।४।४।९९॥

एषां शे परे स्वरान् अन्तः स्यात् । मुञ्चति, पिंशति, तृम्फति, दृम्फति, गुम्फति, शुम्भति, उम्भति ॥८७॥

जभः स्वरे ।४।४।१००॥

जभः स्वरात् परः [स्वरे परे] न् अन्तः स्यात् । जम्भः ॥८८॥

रध इटि तु परोक्षायामेव ।४।४।१०१॥

रधः स्वरात् परः स्वरादौ प्रत्यये न् अन्तः स्यात्, इडादौ तु परोक्षायामेव । रन्धः, ररन्धिव । परोक्षायामेवेति किम् ? रधिता ॥८९॥

रभोऽपरोक्षा-शवि ।४।४।१०२॥

रभः स्वरात् परः परोक्षा-शव्वर्जे स्वरादौ प्रत्यये न् अन्तः स्यात् । आरम्भः । अपरोक्षाशवीति किम् ? आरेभे, आरभते ॥९०॥

लभः ।४।४।१०३॥

लभः स्वरात् परः परोक्षा-शव्वर्जे स्वरादौ [प्रत्यये] न् अन्तः स्यात् । लम्भकः ॥९१॥

आङो यि ।४।४।१०४॥

आङः परस्य लभः स्वरात् परो यादौ प्रत्यये न् अन्तः स्यात् । आलम्भ्या

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गौः । यीति किम् ? आलब्धाः ॥९२॥

उपात् स्तुतौ ।४।४।१०५॥

उपात् परस्य लभः स्वरात् परो यादौ प्रत्यये स्तुतौ गम्यायां न् अन्तः स्यात् । उपलम्भ्या विद्या । स्तुताविति किम् ? उपलभ्या वार्त्ता ॥९३॥

ञि-ख्णमोर्वा ।४।४।१०६॥

ञौ ख्णमि च लभः स्वरात् परो न् अन्तो वा स्यात् । अलाभि, अलम्भि । लाभं लाभम्, लम्भं लम्भम् ॥९४॥

उपसर्गात् खल्घञोश्च ।४।४।१०७॥

उपसर्गाद् लभः स्वरात् परः खल्-घञोर्ञि-ख्णमोश्च परयोर्न् अन्तः स्यात् । दुष्प्रलम्भम्, प्रलम्भः, प्रालम्भि, प्रलम्भं प्रलम्भम् । उपसर्गादिति किम् ? लाभः ॥९५॥

सु-दुर्भ्यः ।४।४।१०८॥

आभ्यां व्यस्त-समस्ताभ्याम् उपसर्गात् पराभ्यां परस्य लभः स्वरात् परः खल्घञोर्न् अन्तः स्यात् । अतिसुलम्भम्, अतिदुर्लम्भम् ; अतिसुदुर्लम्भम्, अतिसुलम्भः, अतिदुर्लम्भः ; अतिसुदुर्लम्भः । उपसर्गादित्येव, सुलभम् ॥९६॥

नशो धुटि ।४।४।१०९॥

नशेः स्वरात् परो धुडादौ प्रत्यये न् अन्तः स्यात् । नंष्टा । धुटीति किम् ? नशिष्यति ॥९७॥

मस्जेः सः ।४।४।११०॥

मस्जेः स्वरात् परस्य सो धुडादौ प्रत्यये न् अन्तः स्यात् । मङ्क्षा ॥९८॥

अः सृजि-दृशोऽकिति ।४।४।१११॥

अनयोः स्वरात् परो धुडादौ प्रत्यये अदन्तः स्यात्, न तु किति । स्रष्टा, द्रष्टुम् । अकितीति किम् ? सृष्टः ॥९९॥

स्पृशादि-सृपो वा ।४।४।११२॥

स्पृश-मृश-कृष-तृप-दृपां सृपश्च स्वरात् परो धुडादौ प्रत्यये अदन्तो वा स्यात्, अकिति । स्प्रष्टा, स्पर्ष्टा ; म्रष्टा, मर्ष्टा ; क्रष्टा, कर्ष्टा ; त्रप्ता, तर्प्ता ; द्रप्ता, दर्प्ता ; स्रप्ता, सर्प्ता ॥१००॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ह्रस्वस्य तः पित्कृति ।४।४।११३॥

ह्रस्वान्तस्य धातोः पिति कृति त् अन्तः स्यात् । जगत् । ह्रस्वस्येति किम् ? ग्रामणीः । कृतीति किम् ? अजुहवुः ॥१०१॥

अतो म आने ।४।४।११४॥

धातोर्विहिते आने अतो म् अन्तः स्यात् । पचमानः । अत इति किम् ? शयानः ॥१०२॥

आसीनः ।४।४।११५॥

आस्तेः परस्य आनस्याऽऽदेरीर्निपात्यते । उदासीनः ॥१०३॥

ऋतां क्ङितीर् ।४।४।११६॥

ऋदन्तस्य धातोः क्ङिति प्रत्यये ऋत इर् स्यात् । तीर्णम्, किरति ॥१०४॥

ओष्ठ्यादुर् ।४।४।११७॥

धातोरोष्ठ्यात् परस्य ऋतः क्ङित्युर् स्यात् । पूः, बुभूर्षति, वुवूर्षते ॥१०५॥

इसासः शासोऽङ्-व्यञ्जने ।४।४।११८॥

शास्तेरंशस्याऽऽसोऽङि क्ङिति व्यञ्जनादौ च परे इस् स्यात् । अशिषत्, शिष्टः । अङ्व्यञ्जन इति किम् ? शासति ॥१०६॥

कौ ।४।४।११९॥

शास आसः कौ इस् स्यात् । मित्रशीः ॥१०७॥

आङः ।४।४।१२०॥

आङः परस्य शास आसः कावेव इस् स्यात् । आशीः । कावित्येव, आशास्ते ॥१०८॥

ष्वोः प्वय्व्यञ्जने लुक् ।४।४।१२१॥

पौ यूवर्जव्यञ्जनादौ च परे ष्वोर्लुक् स्यात् । क्नोपयति, क्ष्मातम्, कण्डूः । य्वर्जनं किम् ? क्नूय्यते ॥१०९॥

कृतः कीर्त्तिः ।४।४।१२२॥

कृतणः कीर्त्तिः स्यात् । कीर्त्तयति ॥११०॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्याचार्यश्रीहेमचन्द्रविरचितायां
स्वोपज्ञसिद्धहेमचन्द्राभिधानशब्दानुशासन रहस्यवृत्तौ
चतुर्थस्य चतुर्थः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[अथ पञ्चमोऽध्यायः] [प्रथमः पादः]

आ तुमोऽत्यादिः कृत् ।५।१।१॥

धातोर्विधीयमानस्त्यादिर्बर्जो वक्ष्यमाणः प्रत्ययस्तुमभिव्याप्य कृत् स्यात् । घनघात्यः । अत्यादिरिति किम् ? प्रणिंस्ते ॥१॥

बहुलम् ।५।१।२॥

कृद् यथानिर्दिष्टादर्थादन्यत्रापि बहुलं स्यात् । पादहारकः, मोहनीयं कर्म, संप्रदानम् ॥२॥

कर्त्तरि ।५।१।३॥

कृत् अर्थविशेषोक्तिं विना कर्त्तरि स्यात् । कर्त्ता ॥३॥

भव्य-गेय-जन्य-रम्या-ऽऽपात्या-ऽऽप्लाव्यं नवा ।५।१।७॥

एते कर्त्तरि वा निपात्यन्ते । भव्यः, गेयः साम्नाम्, जन्यः, रम्यः, आपात्यः, आप्लाव्यः ; पक्षे भव्यम्, गेयानि सामानि, जन्यम्, रम्यः, आपात्यम्, आप्लाव्यं तैः ॥४॥

श्लिष-शीङ्-स्था-ऽऽस-वस-जन-रुह-जॄ-भजेः क्तः ।५।१।९॥

एभ्यः क्तो यो विहितः स कर्त्तरि वा स्यात् । आश्लिष्टः कान्तां चैत्रः, आश्लिष्टा कान्ता तैः ; अतिशयितो गुरुं शिष्यः, अतिशयितो गुरुः शिष्यैः ; उपस्थितो गुरुं शिष्यः, उपस्थितो गुरुः शिष्यैः ; उपासिता गुरुं ते, उपासितो गुरुस्तैः; अनूषिता गुरुं ते, अनूषितो गुरुस्तैः ; अनुजातास्तां ते, अनुजाता सा तैः ; आरूढोऽश्वं सः, आरूढोऽश्वस्तैः ; अनुजीर्णास्तां ते, अनुजीर्णा सा तैः; विभक्ताः स्वं ते, विभक्तं स्वं तैः ॥५॥

आरम्भे ।५।१।१०॥

भूते यः क्तो विहितः स आरम्भार्थाद् धातोः कर्त्तरि वा स्यात् । प्रकृताः कटं ते, प्रकृतः कटस्तैः ॥६॥

गत्यर्था-ऽकर्मक-पिब-भुजेः ।५।१।११॥

भूते यः क्तो विहितः [स] एभ्यः कर्त्तरि वा स्यात् । गतोऽसौ ग्रामम्, गतोऽसौ तैः ; आसितोऽसौ, आसितं तैः ; पीताः पयः, पीतं पयः ; भुक्तास्ते, इदं तैर्भुक्तम् ॥७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अद्यर्थाच्चाऽऽधारे ।५।१।१२॥

आहारार्थात् धातोर्गत्यर्थादेश्च भूते यः क्तः स आधारे वा स्यात् । इदमेषां जग्धम्, तैर्जग्धम् ; इदं तेषां यातम्, तैर्यातम् ; इदमेषां शयितम्, तैः शयितम् ; इदं गवां पीतम्, गोभिः पीतम् ; इदं तेषां भुक्तम्, तैर्भुक्तम् ॥८॥

क्त्वा-तुमम् भावे ।५।१।१३॥

एते धात्वर्थमात्रे स्युः । कृत्वा, कर्त्तुम्, कारं कारं याति ॥९॥

असरूपोऽपवादे वोत्सर्गः प्राक् क्तेः ।५।१।१६॥

इतः सूत्रादारभ्य *स्त्रियां क्तिः* [५।३।९१] इत्यतः प्राग् योऽपवादस्तद्विषयेऽप-वादेनासमानरूप औत्सर्गिकः प्रत्ययो वा स्यात् । अवश्यलाव्यम्, अवश्यलवितव्यम् । असरूप इति किम् ? ण्यणि यो न, कार्यम् । प्राक् क्तेरिति किम् ? कृतिः, चिकीर्षा ॥१०॥

ऋवर्ण-व्यञ्जनाद् ण्यण् ।५।१।१७॥

ऋवर्णान्ताद् व्यञ्जनान्ताच्च धातोर्ण्यण् स्यात् । कार्यम्, पाक्यम् ॥११॥

उवर्णादावश्यके ।५।१।१९॥

अवश्यम्भावे द्योत्ये धातोरुवर्णान्ताद् ण्यण् स्यात् । लाव्यम्, अवश्यपाव्यम् ॥१२॥

आसु-यु-वपि-रपि-लपि-त्रपि-डिपि-दभि-चम्यानमः ।५।१।२०॥

आङ्पूर्वाभ्यां सु-नम्भ्यां यौत्यादेश्च ण्यण् स्यात् । आसाव्यम्, याव्यम्, वाप्यम्, राप्यम्, लाप्यम्, अपत्राप्यम्, डेप्यम्, दाभ्यम्, आचाम्यम्, आनाम्यम् ॥१३॥

तव्या-ऽनीयौ ।५।१।२७॥

एतौ धातोः स्याताम् । कर्त्तव्यः, करणीयः ॥१४॥

य एचाऽऽतः ।५।१।२८॥

स्वरान्ताद् धातोर्यः स्यात्, आत एच्च । चेयम्, नेयम् ॥१५॥

शकि-तकि-चति-यति-शसि-सहि-यजि-भजि-पवर्गात् ।५।१।२९॥

एभ्यः पवर्गान्ताच्च यः स्यात् । शक्यम्, तक्यम्, चत्यम्, यत्यम्, शस्यम्, सह्यम्, यज्यम्, भज्यम्, तप्यम्, गम्यम् ॥१६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यम-मद-गदोऽनुपसर्गात् ।५।१।३०॥

एभ्योऽनुपसर्गेभ्यो यः स्यात् । यम्यम्, मद्यम्, गद्यम् । अनुपसर्गादिति किम् ? आयाम्यम् ॥१७॥

चरेराङस्त्वगुरौ ।५।१।३१॥

अनुपसर्गाच्चरेराङ्पूर्वात् तु अगुरौ यः स्यात् । चर्यम्, आचर्यो देशः । अगुराविति किम् ? आचार्यः ॥१८॥

नाम्नो वदः क्यप् च ।५।१।३५॥

अनुपसर्गान्नाम्नः पराद् वदेः क्यप्-यौ स्याताम् । ब्रह्मोद्यम् । नाम्न इति किम् ? वाद्यम् ॥१९॥

खेय-मृषोद्ये ।५।१।३८॥

इति तु निपातनात् ॥२०॥

दृ-वृग्-स्तु-जुषेति-शासः ।५।१।४०॥

एभ्यः क्यप् स्यात् । आदृत्यः, प्रावृत्यः, अवश्यस्तुत्यः, जुष्यः, इत्यः, शिष्यः ॥२१॥

ऋदुपान्त्यादकृपि-चृदचः ।५।१।४१॥

ऋदुपान्त्याद् धातोः कृपि-चृति-ऋचिवर्जात् क्यप् स्यात् । वृत्यम् । अकृपि-चृदच इति किम् ? कल्प्यम्, चर्त्यम्, अर्च्यम् ॥२२॥

ते कृत्याः ।५।१।४७॥

ण्यण्-तव्या-ऽनीय-य-क्यपः कृत्याः स्युः ॥२३॥

णक-तृचौ ।५।१।४८॥

धातोरेतौ स्याताम् । पाचकः, पक्ता ॥२४॥

अच् ।५।१।४९॥

धातोरच् स्यात् । करः, हरः ॥२५॥

लिहादिभ्यः ।५।१।५०॥

एभ्योऽच् स्यात् । लेहः, शेषः ॥२६॥

नन्द्यादिभ्योऽनः ।५।१।५२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एभ्यो नामगणदृष्टेभ्योऽनः स्यात् । नन्दनः, वासनः, सहनः, संक्रन्दनः, सर्वदमनः, नर्दनः ॥२७॥

ग्रहादिभ्यो णिन् ।५।१।५३॥

एभ्यो णिन् स्यात् । ग्राही, स्थायी ॥२८॥

नाम्युपान्त्य-प्री-कृ-गृ-ज्ञः कः ।५।१।५४॥

नाम्युपान्त्येभ्यो धातुभ्यः, प्रच्यादिभ्यश्च कः स्यात् । विक्षिपः, प्रियः, किरः, गिरः, ज्ञः ॥२९॥

उपसर्गादातो डोऽश्यः ।५।१।५६॥

उपसर्गात् परात् श्यैङ्वर्जादाकारान्ताद् धातोर्डः स्यात् । आह्वः । उपसर्गादिति किम् ? दायः । अश्य इति किम् ? अवश्यायः ॥३०॥

घ्रा-ध्मा-पा-ट्धे-दृशः शः ।५।१।५८॥

एभ्यः शः स्यात् । जिघ्रः, उद्धमः, पिबः, उद्धयः, उत्पश्यः ॥३१॥

साहि-साति-वेद्युदेजि-धारि-पारि-चेतेरनुपसर्गात् ।५।१।५९॥

एभ्योऽनुपसर्गेभ्यो ण्यन्तेभ्यः शः स्यात् । साहयः, सातयः, वेदयः, उदेजयः, धारयः, पारयः, चेतयः । अनुपसर्गादिति किम् ? प्रसाहयिता ॥३२॥

लिम्प-विन्दः ।५।१।६०॥

आभ्यामनुपसर्गाभ्यां शः स्यात् । लिम्पः, विन्दः ॥३३॥

वा ज्वलादि-दु-नी-भू-ग्रहा-ऽऽस्रोर्णः ।५।१।६२॥

ज्वलादेर्द्वादेरास्रोश्चानुपसर्गाण् णो वा स्यात् । ज्वालः, ज्वलः ; चालः, चलः ; दावः, दवः ; नायः, नयः ; भावः, भवः ; ग्राहो मकरादिः, ग्रहः सूर्यादिः ; आस्रावः, आस्रवः । अनुपसर्गादित्येव, प्रज्वलः ॥३४॥

अवहृ-सा-संस्रोः ।५।१।६३॥

अवपूर्वाभ्यां हृ-साभ्यां संपूर्वाच्च स्रोर्णः स्यात् । अवहारः, अवसायः, संस्रावः ॥३५॥

तन्-व्यधीण्-श्वसातः ।५।१।६४॥

एभ्य आदन्तेभ्यश्च धातुभ्यो णः स्यात् । तानः, व्याधः, प्रत्यायः, श्वासः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अवश्यायः ॥३६॥

नृत्-खन्-रञ्जः शिल्पिन्यकट् ।५।१।६५॥

एभ्यः शिल्पिनि कर्त्तर्यकट् स्यात् । नर्त्तकी, खनकः, रजकः । शिल्पिनीति किम् ? नर्त्तिका ॥३७॥

गस्थकः ।५।१।६६॥

गः शिल्पिनि कर्त्तरि थकः स्यात् । गाथकः ॥३८॥

टनण् ।५।१।६७॥

गः शिल्पिनि टनण् स्यात् । गायनी ॥३९॥

हः काल-व्रीह्योः ।५।१।६८॥

हाको हाडो वा काल-व्रीह्योष्टनण् स्यात् । हायनो वर्षम्, हायना व्रीहयः, हाताऽन्यः ॥४०॥

प्रु-सृ-ल्वोऽकः साधौ ।५।१।६९॥

एभ्यः साध्वर्थेभ्योऽकः स्यात् । प्रवकः, सरकः, लवकः । साधाविति किम् ? प्रावकः ॥४१॥

आशिष्यकन् ।५।१।७०॥

आशिषि गम्यायां धातोरकन् स्यात् । जीवका । आशिषीति किम् ? जीविका ॥४२॥

तिक्कृतौ नाम्नि ।५।१।७१॥

आशीर्विषये संज्ञायां गम्यायां धातोस्तिक् कृतश्च स्युः । शान्तिः, वीरभूः, वर्द्धमानः ॥४३॥

कर्मणोऽण् ।५।१।७२॥

कर्मणः परात् धातोरण् स्यात् । कुम्भकारः ॥४४॥

शीलि-कामि-भक्ष्याचरीक्षि-क्षमो णः ।५।१।७३॥

कर्मणः परेभ्यः एभ्यो णः स्यात् । धर्मशीला, धर्मकामा, वायुभक्षा, कल्याणाचारा, सुखप्रतीक्षा, बहुक्षमा ॥४५॥

गायोऽनुपसर्गाट्टक् ।५।१।७४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कर्मणः परादनुपसर्गाद् गायतेष्टक् स्यात् । वक्रगी । अनुपसर्गादिति किम् ? खरुसंगायः ॥४६॥

सुरा-सीधोः पिबः ।५।१।७५॥

आभ्यां कर्मभ्यां परादनुपसर्गात् पिबतेष्टक् स्यात् । सुरापी, सीधुपी ॥४७॥

आतो डोऽह्वा-वा-मः ।५।१।७६॥

कर्मणः परादनुपसर्गाद् ह्वा-वा-मावर्जादादन्ताद् धातोर्डः स्यात् । गोदः । अह्वा-वा-म इति किम् ? स्वर्गह्वायः, तन्तुवायः, धान्यमायः ॥४८॥

समः ख्यः ।५।१।७७॥

कर्मणः परात् संपूर्वात् ख्यो डः स्यात् । गोसङ्ख्यः ॥४९॥

दश्चाऽऽङः ।५।१।७८॥

कर्मणः परादाङ्पूर्वाद् दागः ख्यश्च डः स्यात् । दायादः, स्व्याख्यः ॥५०॥

प्राज्ञश्च ।५।१।७९॥

कर्मणः परात् प्रपूर्वाद् ज्ञो दारूपाच्च डः स्यात् । पथिप्रज्ञः, प्रपाप्रदः ॥५१॥

आशिषि हनः ।५।१।८०॥

कर्मणः पराद् हन्तेराशिषि डः स्यात् । शत्रुहः ॥५२॥

क्लेशादिभ्योऽपात् ।५।१।८१॥

क्लेशादिकर्मणः परादपाद् हन्तेर्डः स्यात् । क्लेशापहः, तमोऽपहः ॥५३॥

कुमार-शीर्षाण्णिन् ।५।१।८२॥

आभ्यां कर्मभ्यां पराद् हन्तेर्णिन् स्यात् । कुमारघाती, शीर्षघाती ॥५४॥

अचित्ते टक् ।५।१।८३॥

कर्मणः पराद् हन्तेरचित्तवति कर्त्तरि टक् स्यात् । वातघ्नं तैलम् । अचित्त इति किम् ? पापघातो यतिः ॥५५॥

ब्रह्मादिभ्यः ।५।१।८५॥

एभ्यः कर्मभ्यः पराद् हन्तेष्टक् स्यात् । ब्रह्मघ्नः, गोघ्नः पापः । जायाघ्नी । पतिघ्नी कन्या । शक्तौ हस्तिघ्नः, बाहुघ्नः, कपाटघ्नः । नगरघ्नो गजान्यः ॥५६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कुक्ष्यात्मोदराद् भृगः खिः ।५।१।९०॥

एभ्यः कर्मभ्यः पराद् भृगः खिः स्यात्। कुक्षिम्भरिः, आत्मम्भरिः, उदरम्भरिः ॥५७॥

अर्होऽच् ।५।१।९१॥

कर्मणः परादर्हेरच् स्यात्। पूजार्हा साध्वी ॥५८॥

हृगो वयोऽनुद्यमे ।५।१।९५॥

कर्मणः पराद् हृगो वयस्यनुद्यमे च गम्येऽच् स्यात्। अंशंहरो दायादः। उद्यमः उत्क्षेपणमाकाशे धारणं वा, तदभावे मनोहरा माला। वयोऽनुद्यम इति किम्? भारहारः ॥५९॥

आङः शीले ।५।१।९६॥

कर्मणः परादाङ्पूर्वाद् हृगः शीले गम्येऽच् स्यात्। पुष्पाहरः। शील इति किम्? पुष्पाहारः ॥६०॥

दृति-नाथात् पशाविः ।५।१।९७॥

आभ्यां कर्मभ्यां परात् हृगः पशौ कर्त्तरि इः स्यात्। दृतिहरिः श्वा, नाथहरिः सिंहः ॥६१॥

शकृत्-स्तम्बाद् वत्स-व्रीहौ कृगः ।५।१।१००॥

आभ्यां कर्मभ्यां परात् कृगो यथासङ्ख्यं वत्स-व्रीह्योः कर्त्रोरिः स्यात्। शकृत्करिर्वत्सः, स्तम्बकरिर्व्रीहिः ॥६२॥

क्षेम-प्रिय-मद्र-भद्रात् खा-ऽण् ।५।१।१०५॥

एभ्यः कर्मभ्यः परात् कृगः खा-ऽणौ स्याताम्। क्षेमङ्करः, क्षेमकारः; प्रियङ्करः, प्रियकारः; मद्रङ्करः, मद्रकारः; भद्रङ्करः, भद्रकारः ॥६३॥

मेघर्त्ति-भया-ऽभयात् खः ।५।१।१०६॥

---

१. "कर्मणः पराद् हरतेर्वयसि अनुद्यमे च गम्यमाने अच् भवति, प्राणिनां कालकृताऽवस्था वयः, उद्यम उत्क्षेपणम् आकाशस्थस्य वा धारणम्, तदभावोऽनुद्यमः, अस्थिहरः श्वशिशुः, कवचहरः क्षत्रियकुमारः, अंशहरो दायादः। अनुद्यमे मनोहरः प्रासादः, मनोहरा माला।" इति प्राचीनायां तालपत्रोपरि लिखितायां श्री सिद्धहेमचन्द्रशब्दानुशासनबृहद्वृत्तौ शुद्धः पाठः॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एभ्यः कर्मभ्यः परात् कृगः खः स्यात् । मेघङ्करः, ऋतिङ्करः, भयङ्करः, अभयङ्करः ॥६४॥

परिमाणार्थ-मित-नखात् पचः ।५।१।१०९॥

प्रस्थादि-मित-नखेभ्यः कर्मभ्यः परात् पचेः खः स्यात् । [प्रस्थम्पचः, मितम्पचः, नखम्पचः ॥६५॥

कूला-ऽभ्र-करीषात् कषः ।५।१।११०॥

एभ्यः कर्मभ्यः कषेः खः स्यात् ।] कूलङ्कषा, अभ्रङ्कषा, करीषङ्कषा ॥६६॥

सर्वात् सहश्च ।५।१।१११॥

सर्वात् कर्मणः परात् सहेः कषेश्च खः स्यात् । सर्वंसहः, सर्वङ्कषः ॥६७॥

भृ-वृ-जि-तॄ-तप-दमेश्च नाम्नि ।५।१।११२॥

कर्मणः परेभ्य एभ्यः सहश्च संज्ञायां खः स्यात् । विश्वम्भरा भूः, पतिंवरा कन्या, शत्रुञ्जयोऽद्रिः, रथन्तरं साम, शत्रुन्तपो राजा, बलिन्दमः कृष्णः, शत्रुंसहो राजा । नाम्नीति किम् ? कुटुम्बभारः ॥६८॥

धारेर्धर्च ।५।१।११३॥

कर्मणः पराद् धारेः संज्ञायां खः स्यात्, धारेश्च धर् । वसुन्धरा भूः ॥६९॥

मन्याण्णिन् ।५।१।११६॥

कर्मणः पराद् मन्यतेर्णिन् स्यात् । पण्डितमानी बन्धोः ॥७०॥

कर्तुः खश् ।५।१।११७॥

प्रत्ययार्थात् कर्तुः कर्मणः पराद् मन्यतेः खश् स्यात् । पण्डितम्मन्यः । कर्तुरिति किम् ? पटुमानी चैत्रस्य ॥७१॥

एजेः ।५।१।११८॥

कर्मणः परादेजयतेः खश् स्यात् । अरिमेजयः ॥७२॥

नग्न-पलित-प्रिया-ऽन्ध-स्थूल-सुभगा-ऽऽढ्य-तदन्ताच्च्व्यर्थेऽच्चेर्भुवः खिष्णु-खुकञ् ।५।१।१२८॥

नग्नादिभ्यः केवलेभ्यस्तदन्तेभ्यश्चाच्च्यन्तेभ्यश्च्व्यर्थवृत्तिभ्यः पराद् भुवः खिष्णु-खुकञौ स्याताम् । नग्नम्भविष्णुः, नग्नम्भावुकः ; पलितम्भविष्णुः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पलितम्भावुकः ; प्रियम्भविष्णुः, प्रियम्भावुकः ; अन्धम्भविष्णुः, अन्धम्भावुकः, स्थूलम्भविष्णुः, स्थूलम्भावुकः ; सुभगम्भविष्णुः, सुभगम्भावुकः ; आढ्यम्भविष्णुः, आढ्यम्भावुकः ; तदन्त -सुनग्नम्भविष्णुः, सुनग्नम्भावुक इत्यादि । अच्वेरिति किम् ? आढ्यीभविता ॥७३॥

कृगः खनट् करणे ।५।१।१२९॥

नग्नादिभ्योऽच्व्यन्तेभ्यश्च्व्यर्थवृत्तिभ्यः परात् कृगः करणे खनट् स्यात् । नग्नङ्करणं द्यूतम्, पलितङ्करणम्, प्रियङ्करणम्, अन्धङ्करणम्, स्थूलङ्करणम्, सुभगङ्करणम्, आढ्यङ्करणम्, सुनग्नङ्करणम् । च्व्यर्थ इत्येव, नग्नं करोति द्यूतेन ॥७४॥

भावे चाऽऽशितात् भुवः खः ।५।१।१३०॥

आशितात् पराद् भुवो भाव-करणयोः खः स्यात् । आशितम्भवस्ते, आशितम्भव ओदनः ॥७५॥

नाम्नो गमः खड्-डौ च, विहायसस्तु विहः ।५।१।१३१॥

नाम्नः पराद् गमेः खड्-ड-खाः स्युः, विहायसो विहश्च । तुरङ्गः, विहङ्गः, तुरगः, विहगः, सुतङ्गमो मुनिः,[तुरङ्गमः,] विहङ्गमः ॥७६॥

शमो नाम्न्यः ।५।१।१३४॥

शमो नाम्नः पराद् धातोः संज्ञायाम् अः स्यात् । शम्भवोऽर्हन् । नाम्नीति किम् ? शङ्करी दीक्षा ॥७७॥

पार्श्वादिभ्यः शीङः ।५।१।१३५॥

एभ्यो नामभ्यः परात् शीङः अः स्यात् । पार्श्वशयः, दिग्धसहशयः ॥७८॥

ऊर्ध्वादिभ्यः कर्तुः ।५।१।१३६॥

एभ्यः कर्तृवाचिभ्यः परात् शीङः अः स्यात् । ऊर्ध्वशयः, उत्तानशयः ॥७९॥

आधारात् ।५।१।१३७॥

आधारार्थान्नाम्नः परात् शीङः अः स्यात् । खशयः ॥८०॥

चरेष्टः ।५।१।१३८॥

आधारार्थात् परात् चरेष्टः स्यात् । कुरुचरी ॥८१॥

स्था-पा-स्रा-त्रः कः ।५।१।१४२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नाम्नः परेभ्य एभ्यः कः स्यात् । समस्थः, कच्छपः, नदीष्णः, धर्मत्रम् ॥८२॥

दुहेर्दुघः ।५।१।१४५॥

नाम्नः पराद् दुहेर्दुघः स्यात् । कामदुघा ॥८३॥

भजो विण् ।५।१।१४६॥

नाम्नः पराद् भजेर्विण् स्यात् । अर्धभाक् ॥८४॥

मन्-वन्-कनिप्-विच् क्वचित् ।५।१।१४७॥

नाम्नः पराद् धातोरेते यथालक्ष्यं स्युः । मन्, इन्द्रशर्मा । वन्, विजावा । कनिप्, सुधीवा । विच्, शुभंयाः ॥८५॥

क्विप् ।५।१।१४८॥

नाम्नः पराद् धातोः क्विप् यथालक्ष्यं स्यात् । उखास्रत् ॥८६॥

त्यदाद्यन्य-समानादुपमानाद् व्याप्ये दृशः टक्-सकौ च ।५।१।१५२॥

एभ्य उपमानेभ्यो व्याप्येभ्यः पराद् दृशेर्व्याप्य एव टक्-सकौ च क्विप् च स्युः । त्यादृशः, त्यादृक्षः, त्यादृक् ; अन्यादृशः, अन्यादृक्षः, अन्यादृक् ; सदृशी, सदृक्षा, सदृक् । व्याप्य इति किम् ? तेनेव दृश्यते ॥८७॥

कर्तुर्णिन् ।५।१।१५३॥

कर्त्रर्थादुपमानात् पराद् धातोर्णिन् स्यात् । उष्ट्रक्रोशी ॥८८॥

अजातेः शीले ।५।१।१५४॥

अजात्यर्थाद् नाम्नः पराच्छीलार्थाद् धातोर्णिन् स्यात् । उष्णभोजी, प्रस्थायी । अजातेरिति किम् ? शालीन् भोक्ता । शील इति किम् ? उष्णभोजो मन्दः ॥८९॥

साधौ ।५।१।१५५॥

धातोः साध्वर्थे णिन् स्यात् । साधुदायी ॥९०॥

व्रता-ऽऽभीक्ष्ण्ये ।५।१।१५७॥

अनयोर्गम्ययोर्नाम्नः पराद् धातोर्णिन् स्यात् । स्थण्डिलवर्त्ती, क्षीरपायिण उशीनराः ॥९१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

करणाद् यजो भूते ।५।१।१५८॥

करणार्थाद् नाम्नः पराद् भूतार्थाद् यजेर्णिन् स्यात् । अग्निष्टोमयाजी ॥९२॥

निन्द्ये व्याप्यादिन् विक्रियः ।५।१।१५९॥

व्याप्याद् नाम्नः परात् भूतार्थाद् विक्रियः कुत्स्ये कर्त्तरि इन् स्यात् । सोमविक्रयी । निन्द्य इति किम् ? धान्यविक्रायः ॥९३॥

दृशः कनिप् ।५।१।१६६॥

व्याप्यात् पराद् भूतार्थाद् दृशेः कनिप् स्यात् । बहुदृश्वा ॥९४॥

सह-राजभ्यां कृग्-युधेः ।५।१।१६७॥

आभ्यां कर्मभ्यां पराद् भूतार्थात् कृगो युधेश्च कनिप् स्यात् । सहकृत्वा, सहयुध्वा, राजकृत्वा, राजयुध्वा ॥९५॥

अनोर्जनेर्डः ।५।१।१६८॥

कर्मणः पराद् [अनुपूर्वात्] भूतार्थाद् जनेर्डः स्यात् । पुमनुजः ॥९६॥

सप्तम्याः ।५।१।१६९॥

सप्तम्यन्तात् पराद् भूतार्थाज्जनेर्डः स्यात् । मन्दुरजः ॥९७॥

अजातेः पञ्चम्याः ।५।१।१७०॥

पञ्चम्यन्तादजात्यर्थात् पराद् भूतार्थाद् जनेर्डः स्यात् । बुद्धिजः । अजातेरिति किम् ? गजात् जातः ॥९८॥

क्वचित् ।५।१।१७१॥

उक्तादन्यत्रापि यथालक्ष्यं डः स्यात् । किञः, अनुजः, स्त्रीजम्, ब्रह्मज्यः, वराहः, आखा ॥९९॥

सु-यजोर्ङ्वनिप् ।५।१।१७२॥

आभ्यां भूतार्थाभ्यां ङ्वनिप् स्यात् । सुत्वानौ, यज्वा ॥१००॥

जूर्षोऽन्तृः ।५।१।१७३॥

जूर्षेर्भूतार्थाद् अन्तृः स्यात् । जरती ॥१०१॥

क्त-क्तवन्तू ।५।१।१७४॥

भूतार्थाद् धातोरेतौ स्याताम् । कृतः, कृतवान् ॥१०२॥

पञ्चमस्य प्रथमः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[पञ्चमाध्याये द्वितीयः पादः]

श्रु-सद-वस्भ्यः परोक्षा वा ।५।२।१॥

एभ्यो भूतार्थेभ्यः परोक्षा वा स्यात् । उपशुश्राव, उपससाद, अनूवास । पक्षे उपाश्रौषीत्, उपाशृणोत् ; उपासदत्, उपासीदत् ; अन्ववात्सीत्, अन्ववसत् ॥१॥

तत्र क्वंसु-कानौ तद्वत् ।५।२।२॥

परोक्षामात्रविषये धातोः परौ क्वंसु-कानौ स्याताम्, तौ च परोक्षेव । शुश्रुवान्, सेदिवान्, ऊषिवान्, पेचिवान्, पेचानः ॥२॥

वेयिवदनाश्वदनूचानम् ।५।२।३॥

एते भूतेऽर्थे क्वंसु-कानान्ताः कर्त्तरि वा निपात्यन्ते । समीयिवान्, अनाश्वान्, अनूचानः । पक्षे अगात्, उपैत्, उपेयाय, नाशीत्, नाश्नात्, नाऽऽश, अन्ववोचत्, अन्ववक्, अन्वब्रवीत्, अनूवाच ॥३॥

अद्यतनी ।५।२।४॥

भूतार्थाद्धातोरद्यतनी स्यात् । अकार्षीत् । शेषाद् विशेषाविवक्षायां व्यामिश्रणे चेयमेव । रामो वनमगमत्, अद्य ह्यो वाऽभुक्ष्महि ॥४॥

रात्रौ वसोऽन्त्ययामाऽस्वप्नर्यद्य ।५।२।६॥

रात्रौ भूतार्थवृत्तेर्वसतेरद्यतनी स्यात्, स चेदर्थो यस्यां रात्रौ भूतस्तस्या एवान्त्ययामं व्याप्याऽस्वप्नरि कर्त्तरि स्यात्, अद्यतनेनैवान्त्ययामेनावच्छिन्ने अद्यतने चेत् प्रयोगोऽस्ति नाद्यतनान्तरे । अमुत्रावात्सम् । रात्र्यन्त्ययामे तु मुहूर्त्तमपि स्वापे अमुत्रावसमिति ॥५॥

अनद्यतने ह्यस्तनी ।५।२।७॥

आ न्याय्याद् उत्थानादा न्याय्याच्च संवेशनाद्, अहरुभयतः सार्द्धरात्रं वाऽद्यतनः, तस्मिन्नसति भूतार्थाद् धातोर्ह्यस्तनी स्यात् । अकरोत् ॥६॥

कृतास्मरणा-ऽतिनिह्नवे परोक्षा ।५।२।११॥

कृतस्यापि चित्तव्याक्षेपादिनाऽस्मरणेऽत्यन्तनिह्नवे वा गम्ये भूतानद्यतनार्थाद् धातोः परोक्षा स्यात् । सुप्तोऽहं किल विललाप, नाऽहं कलिङ्गान् जगाम ॥७॥

परोक्षे ।५।२।१२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भूतानद्यतने परोक्षार्थाद् धातोः परोक्षा स्यात् । धर्म्मं दिदेश तीर्थकरः ॥८॥

वाऽद्यतनी पुराऽऽदौ ।५।२।१५॥

भूतानद्यतनेऽर्थे वर्त्तमानाद् धातोः पुरादावुपपदे अद्यतनी वा स्यात् । अवात्सुरिह पुरा छात्राः, पक्षे अवसन्, ऊषुर्वा ; तद(दाऽ)भाषिष्ट राघवः, पक्षे अभाषत, बभाषे वा ॥९॥

स्मे च वर्त्तमाना ।५।२।१६॥

भूतानद्यतनेऽर्थे वर्त्तमानाद् धातोः स्मे पुरादौ चोपपदे वर्त्तमाना स्यात् । पृच्छति स्म पुरोधसम्, वसन्तीह पुरा छात्राः, अथाऽऽह वर्णी ॥१०॥

सति ।५।२।१९॥

वर्त्तमानार्थाद् धातोर्वर्त्तमाना स्यात् । अस्ति, कूरं पचति, मांसं न भक्षयति, इहाधीमहे, तिष्ठन्ति पर्वताः ॥११॥

शन्त्रानशावेष्यति तु सस्यौ ।५।२।२०॥

सदर्थाद् धातोः शन्त्रानशौ स्याताम्, भविष्यन्तीविषये त्वर्थे स्ययुक्तौ । यान्, शयानः, यास्यन्, शयिष्यमाणः ॥१२॥

वा वेत्तेः कंसुः ।५।२।२२॥

सदर्थाद् वेत्तेः कंसुर्वा स्यात् । तत्त्वं विद्वान्, विदन् ॥१३॥

पूङ्-यजः शानः ।५।२।२३।

आभ्यां सदर्थाभ्यां परः शानः स्यात् । पवमानः, यजमानः ॥१४॥

वयः-शक्ति-शीले ।५।२।२४॥

एषु गम्येषु सदर्थाद् धातोः शानः स्यात् । स्त्रियं गच्छमानाः, समश्नानाः, परान् निन्दमानाः ॥१५॥

धारीङोऽकृच्छ्रेऽन्तृश् ।५।२।२५॥

सुखसाध्ये सत्यर्थे वर्त्तमानाद् धारेरिङश्च परोऽन्तृश् स्यात् । धारयन् आचाराङ्गम्, अधीयन् द्रुमपुष्पीयम् ॥१६॥

तृन् शील-धर्म-साधुषु ।५।२।२७॥

शीलादिषु सदर्थाद् धातोस्तृन् स्यात् । कर्त्ता कटम्, वधूमूढां मुण्डयितारः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्राविष्ठायनाः, गन्ता खेलः ॥१७॥

भ्राज्यलङ्कृग्-निराकृग्-भू-सहि-रुचि-वृति-वृधि-चरि-प्रजना-ऽपत्रप इष्णुः ।५।२।२८॥

एभ्यः शीलादिसदर्थेभ्य इष्णुः स्यात्। भ्राजिष्णुः, अलङ्करिष्णुः, निराकरिष्णुः, भविष्णुः, सहिष्णुः, रोचिष्णुः, वर्त्तिष्णुः, वर्द्धिष्णुः, चरिष्णुः, प्रजनिष्णुः, [अ]पत्रपिष्णुः ॥१८॥

सन्-भिक्षा-ऽऽशंसेरुः ।५।२।३३॥

शीलादिसदर्थात् सन्नन्ताद् भिक्षा-ऽऽशंसिभ्यां च उः स्यात्। लिप्सुः, भिक्षुः, आशंसुः ॥१९॥

शीङ्-श्रद्धा-निद्रा-तन्द्रा-दयि-पति-गृहि-स्पृहेरालुः ।५।२।३७॥

एभ्यः शीलादिसदर्थेभ्य आलुः स्यात्। शयालुः, श्रद्धालुः, निद्रालुः, तन्द्रालुः, दयालुः, पतयालुः, गृहयालुः, स्पृहयालुः ॥२०॥

डौ सासहि-वावहि-चाचलि-पापति ।५।२।३८॥

शीलादिसदर्थानां सहि-वहि-चलि-पतां यङन्तानां डौ सति यथासङ्ख्यमेते निपात्यन्ते। सासहिः, वावहिः, चाचलिः, पापतिः। शेषात् सस्रिः चक्रिः दध्निः जङ्घिः नेमिः ॥२१॥

शू-कम-गम-हन-वृष-भू-स्थ उकण् ।५।२।४०॥

शीलादिसदर्थेभ्य एभ्य उकण् स्यात्। शारुकः, कामुकः, [गामुकः,] घातुकः, वर्षुकः, भावुकः, स्थायुकः ॥२२॥

लष-पत-पदः ।५।२।४१॥

शीलादिसदर्थेभ्य एभ्य उकण् स्यात्। अभिलाषुकः, प्रपातुकः, उपपादुकः ॥२३॥

भूषा-क्रोधार्थ-जु-सृ-गृधि-ज्वल-शुचश्चाऽनः ।५।२।४२॥

भूषार्थेभ्यः क्रोधार्थेभ्यो ज्वादेर्लषादेश्च शीलादिसदर्थेभ्योऽनः स्यात्। भूषणः, क्रोधनः, जवनः, सरणः, गर्द्धनः, ज्वलनः, शोचनः, अभिलषणः, पतनः, अर्थस्य पदनः ॥२४॥

चाल-शब्दार्थादकर्मकात् ।५।२।४३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चालार्थात् शब्दार्थाच्च धातोः शीलादिसदर्थादकर्मकाद् अनः स्यात् । चलनः, वरणः । अकर्मकादिति किम् ? पठिता विद्याम् ॥२५॥

इ-ङितो व्यञ्जनाद्यन्तात् ।५।२।४४॥

व्यञ्जनमादिरन्तश्च यस्य तस्मादिदितो ङितश्च धातोः शीलादिसदर्थाद् अनः स्यात् । स्पर्द्धनः, वर्त्तनः । व्यञ्जनाद्यन्तादिति किम् ? एधिता, शयिता । अकर्मकादित्येव, वसिता वस्त्रम् ॥२६॥

न णिङ्-य-सूद-दीप-दीक्षः ।५।२।४५॥

णिङन्ताद् यन्तात् सूदादिभ्यश्च शीलादिसदर्थेभ्योऽनो न स्यात् । भावयिता, क्ष्मायिता, सूदिता, दीपिता, दीक्षिता ॥२७॥

द्रम-क्रमो यङः ।५।२।४६॥

शीलादिसदर्था[भ्यां] यङन्ताभ्यामाभ्याम् अनः स्यात् । दन्द्रमणः, चङ्क्रमणः ॥२८॥

यजि-जपि-दंशि-वदादूकः ।५।२।४७॥

एभ्यो यङन्तेभ्यः शीलादिसदर्थेभ्य ऊकः स्यात् । यायजूकः, जञपूकः, दन्दशूकः, वावदूकः ॥२९॥

जागुः ।५।२।४८॥

शीलादिसदर्थाद् जागुरूकः स्यात् । जागरूकः ॥३०॥

शमष्टकाद् घिनण् ।५।२।४९॥

शीलादिसदर्थेभ्यः शमादिभ्योऽष्टभ्यो घिनण् स्यात् । शमी, दमी, तमी, श्रमी, भ्रमी, क्षमी, मादी, क्लमी ॥३१॥ शेषाद्

युज-भुज-भज-त्यज-रज्ज-द्विष-दुष-द्रुह-दुहा-ऽभ्याहनः ।५।२।५०॥

आङः क्रीड-मुषः ।५।२।५१॥

प्राच्च यम-यसः ।५।२।५२॥

मथ-लपः ।५।२।५३॥

वेश्च द्रोः ।५।२।५४॥

वि-परि-प्रात् सर्त्तेः ।५।२।५५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

समः पृचैप्-ज्वरेः ।५।२।५६॥

सं-वेः सृजः ।५।२।५७॥

सं-परि-व्यनु-प्राद् वदः ।५।२।५८॥

वेर्विच-कत्थ-स्रम्भ-कष-कस-लस-हनः ।५।२।५९॥

व्यपा-ऽभेर्लषः ।५।२।६०॥

सम्-प्राद् वसात् ।५।२।६१॥

समत्यपा-ऽभि-व्यभेश्वरः ।५।२।६२॥

समनु-व्यवाद् रुधः ।५।२।६३॥

वेर्दहः ।५।२।६४॥

विपूर्वात् शीलादिसदर्थाद् दहेर्घिनण् स्यात् । विदाही ॥३२-४६॥

परेर्देवि-मुहश्च ।५।२।६५॥

परिपूर्वाभ्यां शीलादिसदर्था[भ्या]माभ्यां दहश्च घिनण् स्यात् । परिदेवी, परिमोही, परिदाही ॥४७॥

क्षिप-रटः ।५।२।६६॥

परिपूर्वाभ्यामाभ्यां घिनण् स्यात् । परिक्षेपी, परिराटी ॥४८॥

वादेश्च णकः ।५।२।६७॥

परिपूर्वात् शीलादिसदर्थाद्धातोः(द्धादेः) क्षिप-रड्भ्यां च स्यात् । परिवादकः, परिक्षेपकः, परिराटकः ॥४९॥

स्म्यजस-हिंस-दीप-कम्प-कम-नमो रः ।५।२।७९॥

एभ्यः शीलादिसदर्थेभ्यो रः स्यात् । स्मेरम्, अजस्रम्, हिंस्रः, दीप्रः, कम्प्रः, कम्रः, नम्रः ॥५०॥

तृषि-धृषि-स्वपो नजिङ् ।५।२।८०॥

एभ्यः शीलादिसदर्थेभ्यो नजिङ् स्यात् । तृष्णक्, धृष्णक्, स्वप्नजौ ॥५१॥

स्थेश-भास-पिस-कसो वरः ।५।२।८१॥

एभ्यः शीलादिसदर्थेभ्यो वरः स्यात् । स्थावरः, ईश्वरः, भास्वरः, पेस्वरः, विकस्वरः ॥५२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शं-सं-स्वयं-वि-प्राद् भुवो डुः ।५।२।८४॥

एभ्यः पराद् भुवः सदर्थाद् डुः स्यात् । शम्भुः, सम्भुः, स्वयम्भुवः(म्भुः), विभुः, प्रभुः ॥५३॥

पुव इत्रो दैवते ।५।२।८५॥

सदर्थात् पुवो दैवते कर्त्तरि इत्रः स्यात् । पवित्रोऽर्हन् ॥५४॥

ऋषि-नाम्नोः करणे ।५।२।८६॥

ऋषि-संज्ञयोः सदर्थात् पुवः करणे इत्रः स्यात् । पवित्रोऽयमृषिः, दर्भः पवित्रः ॥५५॥

लू-धू-सू-खन-चर-सहा-ऽर्तेः ।५।२।८७॥

एभ्यः सदर्थेभ्यः करणे इत्रः स्यात् । लवित्रम्, धुवित्रम्, सवित्रम्, खनित्रम्, चरित्रम्, सहित्रम्, अरित्रम् ॥५६॥

नी-दाव्-शसू-यु-युज-स्तु-तुद-सि-सिच-मिह-पत-पा-नहस्रट् ।५।२।८८॥

एभ्यः सदर्थेभ्यः करणे त्रट् स्यात् । नेत्रम्, दात्रम्, शस्त्रम्, योत्रम्, योक्त्रम्, स्तोत्रम्, तोत्रम्, सेत्रम्, सेक्त्रम्, मेढ्रम्, पत्त्रम्, पात्री, नद्री ॥५७॥

ज्ञानेच्छा-ऽर्चार्थ-ञीच्छील्यादिभ्यः क्तः ।५।२।९२॥

ज्ञानेच्छा-ऽर्चार्थेभ्यो ञीद्भ्यः शीलादिभ्यश्च सदर्थेभ्यः क्तः स्यात् । राज्ञां ज्ञातः, राज्ञामिष्टः, राज्ञां पूजितः, मित्रः, शीलितः, रक्षितः ॥५८॥

उणादयः ।५।२।९३॥

सदर्थाद् धातोरुणादयो बहुलं स्युः । कारुः, ईडः ॥५९॥

पञ्चमस्य द्वितीयः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[पञ्चमाध्याये तृतीयः पादः]

वर्त्स्यति गम्यादिः ।५।३।१॥

गम्यादयो भविष्यत्यर्थे इन्नाद्यन्ताः साधवः स्युः । गमी ग्रामम्, आगामी ॥१॥

भविष्यन्ती ।५।३।४॥

वर्त्स्यदर्थाद् धातोर्भविष्यन्ती स्यात् । भोक्ष्यते ॥२॥

अनद्यतने श्वस्तनी ।५।३।५॥

नास्त्यद्यतनो यत्र तस्मिन् वर्त्स्यत्यर्थे वर्त्तमानाद् धातोः श्वस्तनी स्यात् । अनद्यतन इति किम् ? अद्य श्वो वा गमिष्यति ॥३॥

पुरा-यावतोर्वर्त्तमाना ।५।३।७॥

अनयोरुपपदयोर्वर्त्स्यदर्थाद् धातोर्वर्त्तमाना स्यात् । पुरा भुङ्क्ते, यावद् भुङ्क्ते ॥४॥

+कदा-कर्ह्योर्नवा ।५।३।८॥

अनयोरुपपदयोर्वर्त्स्यदर्थाद् धातोर्वर्त्तमाना वा स्यात्। कदा भुङ्क्ते, कदा भोक्ष्यते, कदा भोक्ता ; कर्हि भुङ्क्ते, कर्हि भोक्ष्यते, कर्हि भोक्ता ॥५॥

किंवृत्ते लिप्सायाम् ।५।३।९॥

विभक्त्यन्तस्य डतर-डतमान्तस्य च किमो वृत्तं किंवृत्तम्, तस्मिन्नुपपदे प्रष्टुर्लिप्सायां गम्यायां वर्त्स्यदर्थाद् धातोर्वर्त्तमाना वा स्यात् । को भवतां भिक्षां ददाति, दास्यति, दाता वा ? एवं कतरः कतमः । किंवृत्त इति किम् ? भिक्षां दास्यति । लिप्सायामिति किम् ? कः पुरं यास्यति ? ॥६॥

लिप्स्यसिद्धौ ।५।३।१०॥

लिप्स्यमानाद् भक्तादेः सिद्धौ फलावाप्तौ गम्यायां वर्त्स्यदर्थाद् धातोर्वर्त्तमाना वा स्यात् । यो भिक्षां ददाति, दास्यति, दाता वा, स स्वर्गलोकं याति, यास्यति, याता वा ॥७॥

पञ्चम्यर्थहेतौ ।५।३।११॥

पञ्चम्यर्थः प्रैषादिः, तस्य हेतुरुपाध्यायागमनादिः, तस्मिन्नर्थे वर्त्स्यति वर्त्तमानाद् धातोर्वर्त्तमाना वा स्यात् । उपाध्यायश्चेद् आगच्छति, आगमिष्यति, आगन्ता

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वा, अथ त्वं सूत्रमधीष्व ॥८॥

सप्तमी चोर्ध्वमौहूर्त्तिके ।५।३।१२॥

ऊर्ध्वं मुहूर्तात् भव ऊर्ध्वमौहूर्त्तिकः, तस्मिन् पञ्चम्यर्थहेतौ वर्त्स्यत्यर्थे वर्त्तमानाद् धातोः सप्तमी वर्त्तमाना च वा स्यात्। ऊर्ध्वं मुहूर्तादुपाध्यायश्चेदागच्छेत्, आगच्छति, आगमिष्यति, आगन्ता वा, अथ त्वं तर्कमधीष्व ॥९॥

क्रियायां क्रियार्थायां तुम् णकच् भविष्यन्ती ।५।३।१३॥

यस्माद् धातोस्तुमादिविधिस्तद्वाच्या क्रियाऽर्थः प्रयोजनं यस्यास्तस्यां क्रियायामुपपदे वर्त्स्यदर्थाद् धातोस्तुमादयः स्युः । कर्तुम्, कारकः, करिष्यामीति वा याति । क्रियायामिति किम् ? भिक्षिष्ये इत्यस्य जटाः । क्रियार्थायामिति किम् ? धावतस्ते पतिष्यति वासः ॥१०॥

कर्मणोऽण् ।५।३।१४॥

क्रियायां क्रियार्थायामुपपदे कर्म्मणः पराद् वर्त्स्यदर्थाद् धातोरण् स्यात् । कुम्भकारो याति ॥११॥

भाववचनाः ।५।३।१५॥

भाववचना घञ्-क्त्यादयः, ते क्रियायां क्रियार्थायामुपपदे वर्त्स्यदर्थाद् धातोः स्युः । पाकाय, पक्तये, पचनाय वा याति ॥१२॥

पद-रुज-विश-स्पृशो घञ् ॥५।३।१६॥

एभ्यो घञ् स्यात् । पादः, रोगः, वेशः, स्पर्शः ॥१३॥

सर्त्तेः स्थिर-व्याधि-बल-मत्स्ये ।५।३।१७॥

सर्त्तेरेषु कर्तृषु घञ् स्यात् । सारः स्थिरः, अतीसारो व्याधिः++, सारो बलम्, विसारो मत्स्यः ॥१४॥

भावा-ऽकर्त्रोः ।५।३।१८॥

भावे कर्तृवर्जे च कारके धातोर्घञ् स्यात् । पाकः, प्राकारः, दायो दत्तः ॥१५॥

इङोऽपादाने तु टिद् वा ।५।३।१९॥

इङो भावा-ऽकर्त्रोर्घञ् स्यात् । स चापादाने वा टित् । अध्यायः, उपाध्यायी, उपाध्याया ॥१६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रोरुपसर्गात् ।५।३।२२॥

उपसर्गपूर्वाद् रौतेर्भावा-ऽकर्त्रोर्घञ् स्यात् । संरावः ॥१७॥

भू-श्रयदोऽल् ।५।३।२३॥

एभ्यः उपसर्गपूर्वेभ्यो भावा-ऽकर्त्रोरल् स्यात् । प्रभवः, संश्रयः, विघसः । उपसर्गादित्येव, भावः, श्रायः, घासः ॥१८॥

न्यादो नवा ।५।३।२४॥

निपूर्वाददेरलि घसृलृभावोऽतो दीर्घश्च वा स्यात् । न्यादः, निघसः ॥१९॥

नेर्नद-गद-पठ-स्वन-क्वणः ।५।३।२६॥

नेरुपसर्गात् परेभ्य एभ्यो भावा-ऽकर्त्रोरल् वा स्यात् । निनदः, निनादः ; निगदः, निगादः ; निस्वनः, निस्वानः ; निक्वणः, निक्वाणः ।२०॥

युवर्ण-वृ-दृ-वश-रण-गमृद्-ग्रहः ।५।३।२८॥

इवर्णोवर्णान्तेभ्यो व्रादेर्ऋदन्तेभ्यो ग्रहेश्च भावा-ऽकर्त्रोरल् स्यात् । चयः, क्रयः, स्वः, लवः, वरः, आदरः, वशः, रणः, गमः, करः, ग्रहः ॥२१॥

समुदोऽजः पशौ ।५।३।३०॥

आभ्यां परादजः पशुविषयार्थवृत्तेर्भावा-ऽकर्त्रोरल् स्यात् । समजः उदजः पशूनाम् । पशाविति किम् ? समाजः उदाजो नृणाम् ॥२२॥

स्थादिभ्यः[कः] ।५।३।८२॥

एभ्यो भावा-ऽकर्त्रोः कः स्यात् । आखूत्थो वर्त्तते, प्रस्थः, प्रपा ॥२३॥

ट्वितोऽथुः ।५।३।८३॥

ट्वितो धातोर्भावा-ऽकर्त्रोरथुः स्यात् । वेपथुः ॥२४॥

ड्वितस्त्रिमक् तत्कृतम् ।५।३।८४॥

ड्वितो धातोर्भावा-ऽकर्त्रोस्त्रिमक् स्यात्, तेन धात्वर्थेन कृतमित्यर्थे । पक्त्रिमम् ॥२५॥

यजि-स्वपि-रक्षि-यति-प्रच्छो नः ।५।३।८५॥

एभ्यो भावा-ऽकर्त्रोर्नः स्यात् । यज्ञः, स्वप्नः, रक्ष्णः, यत्नः, प्रश्नः ॥२६॥

विच्छो नङ् ।५।३।८६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विच्छेर्भावा-ऽकर्त्रोर्नङ् स्यात् । विघ्नः ॥२७॥

उपसर्गाद् दः किः ।५।३।८७।

उपसर्गपूर्वाद् दासंज्ञाद् भावा-ऽकर्त्रोः किः स्यात् । आदिः, निधिः ॥२८॥

व्याप्यादाधारे ।५।३।८८॥

व्याप्यात् पराद् दासंज्ञादाधारे किः स्यात् । जलधिः ॥२९॥

अन्तर्द्धिः ।५।३।८९॥

इति शेषात् ॥३०॥

अभिव्याप्तौ भावेऽन-ञिन् ।५।३।९०॥

अभिव्याप्तौ गम्यायां धातोर्भावेऽन-ञिनौ स्याताम् । संरविणम्, सांराविणम् । अभिव्याप्ताविति किम् ? संरावः ॥३१॥

स्त्रियां क्तिः ।५।३।९१॥

धातोर्भावा-ऽकर्त्रोः स्त्रियां क्तिः स्यात् । कृतिः । स्त्रियामिति किम् ? कारः ॥३२॥

गा-पा-पचो भावे ।५।३।९५॥

+एभ्यो भावे स्त्रियां क्तिः स्यात् । सङ्गीतिः, प्रपीतिः, पक्तिः ॥३३॥

स्थो वा ।५।३।९६॥

स्थो भावे स्त्रियां क्तिर्वा स्यात् । प्रस्थितिः, आस्था ॥३४॥

आस्यटि-व्रज्-यजः क्यप् ।५।३।९७॥

एभ्यो भावे स्त्रियां क्यप् स्यात् । आस्या, अटया, व्रज्या, इज्या ॥३५॥

भृगो नाम्नि ।५।३।९८॥

भृगो भावे स्त्रियां संज्ञायां क्यप् स्यात् । भृत्या । नाम्नीति किम् ? भृतिः ॥३६॥

कृगः श च वा ।५।३।१००॥

कृगो भावा-ऽकर्त्रोः स्त्रियां शो वा स्यात्, क्यप् च । क्रिया, कृत्या, कृतिः ॥३७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परेः सृ-चरेर्यः ।५।३।१०२॥

परिपूर्वाभ्यामाभ्यां भावा-ऽकर्त्रोः स्त्रियां यः स्यात् । परिसर्या, परिचर्या ॥३८॥

वाऽटाट्यात् ।५।३।१०३॥

अटेर्यङन्तात् स्त्रियां भावा-ऽकर्त्रोर्यो वा स्यात् । अटाट्या, अटाटा ॥३९॥

जागुरश्च ।५।३।१०४॥

जागुः स्त्रियां भावा-ऽकर्त्रोः अः यश्च स्यात् । जागरा, जागर्या ॥४०॥

शंसि-प्रत्ययात् ।५।३।१०५॥

शंसेः प्रत्ययान्ताच्च भावा-ऽकर्त्रोः स्त्रियामः स्यात् । प्रशंसा, गोपाया ॥४१॥

क्तेटो गुरोर्व्यञ्जनात् ।५।३।१०६॥

क्तस्येट् यस्मात् ततो गुरुमतो व्यञ्जनान्ताद् धातोर्भावा-ऽकर्त्रोरः स्यात् । ईहा । क्तेट इति किम् ? स्रस्तिः । गुरोरिति किम् ? स्फूर्त्तिः । व्यञ्जनादिति किम् ? संशीतिः ॥४२॥

षितोऽङ् ।५।३।१०७॥

षितो धातोर्भावा-ऽकर्त्रोः स्त्रियाम् अङ् स्यात् । पचा ॥४३॥

भिदादयः ।५।३।१०८॥

एते भावा-ऽकर्त्रोः स्त्रियामङन्ता यथालक्ष्यं निपात्यन्ते । भिदा, छिदा ॥४४॥

भीषि-भूषि-चिन्ति-पूजि-कथि-कुम्बि-चर्चि-स्पृहि-तोलि-दोलिभ्यः ।५।३।१०९॥

एभ्यो ण्यन्तेभ्यः स्त्रियां भावा-ऽकर्त्रोरङ् स्यात् । भीषा, भूषा, चिन्ता, पूजा, कथा, कुम्बा, चर्चा, स्पृहा, तोला, दोला ॥४५॥

उपसर्गादातः ।५।३।११०॥

उपसर्गपूर्वाद् आदन्तात् स्त्रियां भावा-ऽकर्त्रोरङ् स्यात् । उपदा । उपधा । उपसर्गादिति किम् ? दत्तिः ॥४६॥

णि-वेत्त्यास-श्रन्थ-घट्ट-वन्देरनः ।५।३।१११॥

ण्यन्ताद् वेत्त्यादिभ्यश्च स्त्रियां भावा-ऽकर्त्रोरनः स्यात् । कारणा, वेदना, आसना, श्रन्थना, घट्टना++, वन्दना ॥४७॥ शेषात्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इषोऽनिच्छायाम् ।५।३।११२॥

पर्यधेर्वा ।५।३।११३॥ इति ।

क्रुत्संपदादिभ्यः क्विप् ।५।३।११४॥

क्रुधादिभ्योऽनुपसर्गेभ्यः, पदादिभ्यश्च समादिपूर्वेभ्यः स्त्रियां भावा-ऽकर्त्रोः क्विप् स्यात् । क्रुत्, युत् ; संपत्, विपत् ॥४८-५०॥

व्यतिहारेऽनीहादिभ्यो ञः ।५।३।११६॥

व्यतीहारविषयेभ्य ईहादिवर्जधातुभ्यः स्त्रियां ञः स्यात्, बाहुलकाद् भावे । व्यावक्रोशी । अनीहादिभ्य इति किम् ? व्यतीहा, व्यतीक्षा ॥५१॥

नञोऽनिः शापे ।५।३।११७॥

नञः पराद्धातोः शापे गम्ये भावा-ऽकर्त्रोः स्त्रियाम् अनिः स्यात् । [अजननिस्ते भूयात् । शाप इति किम् ? अकृतिः पटस्य ॥५२॥

ग्ला-हा-ज्यः ।५।३।११८॥

एभ्यः स्त्रियां भावा-ऽकर्त्रोरनिः स्यात् ।] ग्लानिः, हानिः, ज्यानिः ॥५३॥

प्रश्ना-ऽऽख्याने वेञ् ।५।३।११९॥

प्रश्ने आख्याने च गम्ये स्त्रियां भावा-ऽकर्त्रोर्धातोरिञ् वा स्यात् । कां कारिं कारिकां क्रियां कृत्यां कृतिं वा अकार्षीः ? सर्वां कारिं कारिकां क्रियां कृत्यां कृतिं वा अकार्षम् ॥५४॥

पर्यायाऽर्हणोत्पत्तौ च णकः ।५।३।१२०॥

एष्वर्थेषु प्रश्ना-ऽऽख्यानयोश्च गम्ययोः स्त्रियां भावा-ऽकर्त्रोर्धातोर्णकः स्यात् । भवत आसिका, अर्हसि त्वमिक्षुभक्षिकाम्, इक्षुभक्षिकां मे धारयसि, इक्षुभक्षिका उदपादि, कां कारिकामकार्षीः ? सर्वां कारिकामकार्षम् ॥५५॥

नाम्नि पुंसि च ।५।३।१२१॥

धातोः परो भावा-ऽकर्त्रोः स्त्रियां संज्ञायां णकः स्यात्, यथालक्ष्यं पुंसि च । प्रच्छर्दिका, शालंभर्जिका, आरोचकः ॥५६॥

भावे ।५।३।१२२॥

धात्वर्थनिर्देशे स्त्रियां धातोर्णकः स्यात् । शायिका ॥५७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्लीबे क्तः ।५।३।१२३॥

नपुंसके भावे धातोः क्तः स्यात् । हसितं तव । क्लीबे इति किम् ? हासः ॥५८॥

अनट् ।५।३।१२४॥

क्लीबे भावेऽर्थे धातोरनट् स्यात् । गमनम् ॥५९॥

रम्यादिभ्यः कर्त्तरि ।५।३।१२६॥

एभ्यः कर्त्तरि अनट् स्यात् । रमणी, कमनी ॥६०॥

कारणम् ।५।३।१२७॥

इति शेषात् ।

करणा-ऽऽधारे ।५।३।१२९॥

अनयोरर्थयोर्धातोरनट् स्याद् । एषणी, सक्तुधानी ॥६१-६२॥

पुन्नाम्नि घः ।५।३।१३०॥

पुंसः संज्ञायां गम्यायां धातोः करणा-ऽऽधारयोर्घः स्यात् । दन्तच्छदः, आकरः । पुमिति [किम् ?] विचयनी । नाम्नीति किम् ? प्रहरणो दण्डः । शेषात् गोचरः, संचरः, वहः, व्रजः, व्यजः, खलः, आपणः, निगमः, बकः, भगः, कषः, आकषः ॥६३॥

व्यञ्जनाद् घञ् ।५।३।१३२॥

व्यञ्जनान्ताद् धातोः पुन्नाम्नि करणा-ऽऽधारे घञ् स्यात् । वेदः ॥६४॥

अवात् तॄ-स्तृभ्याम् ।५।३।१३३॥

आभ्यामवपूर्वाभ्यां करणा-ऽऽधारयोः पुन्नाम्नि घञ् स्यात् । अवतारः, अवस्तारः ॥६५॥

शेषात् न्यायः, आवायः, अध्यायः, उद्यावः, संहारः, अवहारः, आधारः, दाराः, जारः ॥

दुः-स्वीषतः कृच्छ्रा-ऽकृच्छ्रार्थे खल् ।५।३।१३९॥

कृच्छ्रवृत्तेर्दुरोऽर्थादकृच्छ्रवृत्तिभ्यां च स्वीषद्भ्यां च पराद् धातोः खल् स्यात् । दुःशयम्, दुष्करः ; सुशयम्, सुकरः ; ईषच्छयम्, ईषत्करः । कृच्छ्राकृच्छ्रार्थ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति किम् ? ईषल्लभ्यं धनम् ॥६६॥

च्व्यर्थे कर्त्राप्याद् भू-कृगः ।५।३।१४०॥

कृच्छ्रा-ऽकृच्छ्रार्थे दुः-स्वीषद्भ्यः पराभ्यां च्व्यर्थवृत्तिकर्तृ-कर्मवाचिभ्यां पराभ्यां यथासङ्ख्यं भू-कृग्भ्यां परः खल् स्यात् । दुराढ्यंभवम्, स्वाढ्यंभवम्, ईषदाढ्यंभवं भवता ; दुराढ्यंकरः, स्वाढ्यंकरः, ईषदाढ्यंकरश्चैत्रस्त्वया । च्व्यर्थ इति किम् ? दुराढ्येन भूयते ॥६७॥

शासू-युधि-दृशि-धृषि-मृषा-ऽऽतोऽनः ।५।३।१४१॥

कृच्छ्रा-[ऽकृच्छ्रा]र्थदुः-स्वीषत्पूर्वेभ्य एभ्य आदन्ताच्च धातोरनः स्यात् । दुःशासनः, सुशासनः, ईषच्छासनः ; एवं दुर्योधनः, दुर्दर्शनः, दुर्धर्षणः, दुर्मर्षणः, दुरुत्थानम् ॥६८॥

पञ्चमस्य तृतीयः पादः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[पञ्चमाध्याये चतुर्थः पादः]

सत्सामीप्ये सद्वद् वा ।५।४।१॥

समीपमेव सामीप्यम्, वर्त्तमानस्य सामीप्ये भूते भविष्यति चार्थे वर्त्तमानाद् धातोर्वर्त्तमाने इव प्रत्यया वा स्युः । कदा चैत्र ! आगतोऽसि ? अयमागच्छामि, आगच्छन्तमेव मां विद्धि ; पक्षे अयमागमम्, एषोऽस्म्यागतः ; कदा मैत्र ! गमिष्यसि ? एष गच्छामि, गच्छन्तमेव मां विद्धि ; पक्षे एष गमिष्यामि, गन्तास्मि, गमिष्यन्तमेव मां विद्धि ॥१॥

सप्तम्यर्थे क्रियातिपत्तौ क्रियातिपत्तिः ।५।४।९॥

सत्सामीप्ये [५।४।१] इति सन्निधापितयोर्भूत-वर्त्स्यतोः *भूते* [५।४।१०] इत्यत्र भूतस्योपयोगात्, ततोऽन्यो वर्त्स्यदर्थोऽत्र ग्राह्यः, सप्तम्या [अ]र्थो निमित्तम् उता-ऽप्यादिसामग्र्यम्, कुतश्चिद् वैगुण्यात् क्रियाया अनभिनिर्वृत्तौ सत्यामेष्यदर्थ-धातोः सप्तम्यर्थे क्रियातिपत्तिः स्यात् । उताऽकरिष्यत् । अप्यकरिष्यत् ॥२॥

भूते ।५।४।१०॥

भूतार्थाद् धातोः क्रियातिपत्तौ सत्यां सप्तम्यर्थे क्रियातिपत्तिः स्यात् । दृष्टो मया तव पुत्रोऽन्नार्थी चङ्क्रम्यमाणः, अन्यश्चातिथ्यर्थी, स यदि तेन दृष्टोऽभविष्यदुता-भोक्ष्यत, अप्यभोक्ष्यत ॥३॥

सप्तम्युता-ऽप्योर्बाढे ।५।४।२१॥

बाढार्थयोरुता-ऽप्योरुपपदयोः सप्तमी स्यात् । उत अपि वा कुर्यात् । बाढे इति किम् ? उत दण्डः पतिष्यति, अपि धास्यति द्वारम् ॥४॥

सम्भावनेऽलमर्थे तदर्थानुक्तौ ।५।४।२२॥

अलमोऽर्थे शक्तौ यत् सम्भावनं तस्मिन् गम्येऽलमर्थार्थस्याऽप्रयोगे सप्तमी स्यात् । अपि मासमुपवसेत् । अलमर्थ इति किम् ? निदेशस्थायी मे चैत्रः प्रायेण यास्यति । तदर्थानुक्ताविति किम् ? शक्तश्चैत्रो धर्मं करिष्यति ॥५॥

कामोक्तावकच्चिति ।५।४।२६॥

इच्छाप्रवेदने गम्ये सप्तमी स्यात्, न तु कच्चित्प्रयोगे । कामो मे भुञ्जीत सः । अकच्चितीति किम् ? कच्चित् जीवति मे माता ॥६॥

इच्छार्थे सप्तमी-पञ्चम्यौ ।५।४।२७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इच्छार्थे धातावुपपदे कामोक्तौ गम्यायां सप्तमी-पञ्चम्यौ स्याताम् । इच्छामि भुञ्जीत, भुङ्क्तां वा भवान् ॥७॥

विधि-निमन्त्रणा-ऽऽमन्त्रणा-ऽधीष्ट-सम्प्रश्न-प्रार्थने ।५।४।२८॥

विध्यादिविशिष्टेषु कर्तृ-कर्म-भावेषु प्रत्ययार्थेषु सप्तमी-पञ्चम्यौ स्याताम् । विधिः क्रियायां प्रेरणा, कटं कुर्यात्, करोतु भवान् । प्रेरणायामेव यस्यां प्रत्याख्याने प्रत्यवायस्तन्निमन्त्रणम्, द्विसन्ध्यमावश्यकं कुर्यात्, करोतु । प्रेरणायामेव यस्यां प्रत्याख्याने कामचारस्तदामन्त्रणम्, इहासीत, आस्ताम् । प्रेरणैव सत्कतु(सत्कारपूर्विका) अधीष्टम्, व्रतं रक्षेत्, रक्षतु । संप्रश्नः संप्रधारणा, किं नु खलु भो ! व्याकरणमधीयीय, अध्ययै, उत सिद्धान्तमधीयीय, अध्ययै ? । प्रार्थनं याच्ञा, प्रार्थना मे तर्कमधीयीय, अध्ययै ॥८॥

प्रैषा-ऽनुज्ञा-ऽवसरे कृत्य-पञ्चम्यौ ।५।४।२९॥

प्रैषादिविशिष्टे कर्त्रादावर्थे कृत्याः पञ्चमी [च] स्युः । न्यत्कारपूर्विका प्रेरणा प्रैषः, तेन खलु कटः कार्यः, स कटं करोतु, स हि प्रेषितोऽनुज्ञातस्तस्याऽवसरः कटकृतौ ॥९॥

काल-वेला-समये तुम्वाऽवसरे ।५।४।३३॥

एषूपपदेष्ववसरे गम्ये धातोस्तुम् वा स्यात् । कालो भोक्तुम्, वेला भोक्तुम्, समयो भोक्तुम्, कालो भोक्तव्यस्य । अवसर इति किम् ? कालः पचति भूतानि ॥१०॥

सप्तमी यदि ।५।४।३४॥

यच्छब्दप्रयोगे कालादिषूपपदेषु सप्तमी स्यात् । कालो यदधीयीत भवान्, वेला यद् भुञ्जीत, समयो यत् शयीत ॥११॥

शक्तार्हे कृत्याश्च ।५।४।३५॥

शक्तेऽर्हे च कर्त्तरि गम्ये कृत्याः सप्तमी च स्युः । भवता खलु भारो वाह्यः, उह्येत, भवान् भारं वहेत्, भवान् हि शक्तः ; भवता खलु कन्या वोढव्या, उह्येत, भवान् खलु कन्यां वहेत्, भवानेतदर्हति ॥१२॥

णिन् चाऽऽवश्यका-ऽऽधमर्ण्ये ।५।४।३६॥

अनयोर्गम्ययोः कर्त्तरि वाच्ये णिन् कृत्याश्च स्युः । कारी, अवश्यंहारी, अवश्यं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गेयो गीतस्य, शतं दायी, गेयो गाथानाम् ॥१३॥

अर्हे तृच् ।५।४।३७॥

अर्हे कर्त्तरि वाच्ये तृच् स्यात् । त्वं कन्याया वोढा ॥१४॥

आशिष्याशीः-पञ्चम्यौ ।५।४।३८॥

आशीर्विशिष्टार्थाद् आशीः-पञ्चम्यौ स्याताम् । जीयात्, जयतात् । आशिषीति किम् ? चिरं जीवति मैत्रः ॥१५॥

माङ्यद्यतनी ।५।४।३९॥

माङि उपपदेऽद्यतनी स्यात् । मा कार्षीत् ॥१६॥

सस्मे ह्यस्तनी च ।५।४।४०॥

स्मयुक्ते माङ्युपपदे ह्यस्तन्यद्यतनी च स्यात् । मा स्म करोत्, मा स्म कार्षीत् ॥१७॥

धातोः सम्बन्धे प्रत्ययाः ।५।४।४१॥

धात्वर्थानां संबन्धे विशेषणविशेष्यभावे सति अयथाकालमपि प्रत्ययाः साधवः स्यु । विश्वदृश्वाऽस्य पुत्रो भविता, भावि कृत्यमासीत्, गोमानासीत् ॥१८॥

भृशा-ऽऽभीक्ष्ण्ये हि-स्वौ यथाविधि त-ध्वमौ च तद्युष्मदि ।५।४।४२॥

भृशा-ऽऽभीक्ष्ण्ये सर्वकालेऽर्थे वर्त्तमानाद् धातोः सर्वविभक्तिवचनविषये हि-स्वौ स्याताम्, यथाविधि धातोः संबन्धे यत एव धातोर्यस्मिन्नेव कारके हि-स्वौ तस्यैव धातोस्तत्कारकविशिष्टस्यैव अनुप्रयोगे सति, तथा पञ्चम्या एव त-ध्वमौ, तयोः सम्बन्धिनि बहुत्वविशिष्टे युष्मद्यर्थे हि-स्वौ च स्यातां यथाविधि धातोः सम्बन्धे । लुनीहि लुनीहीत्येवायं लुनातीत्यादि, अधीष्वाधीष्वेत्येवायमधीते इत्यादि, लुनीत लुनीतेत्येव यूयं लुनीथ, लुनीहि लुनीहीत्येव यूयं लुनीथ, अधीध्वमधीध्व[मि त्येव] यूयमधीध्वे, अधीष्वाधीष्वेत्येव यूयमधीध्वे । यथाविधीति किम् ? लुनीहि लुनीहीत्येवायं लुनाति, छिनत्ति, लूयते वेति धातोः संबन्धे मा भूत् ॥१९॥

प्रचये नवा सामान्यार्थस्य ।५।४।४३॥

धात्वर्थानां समुच्चये गम्ये सामान्यार्थस्य धातोः सम्बन्धे सति धातोः परौ हि-स्वौ, त-ध्वमौ च तद्युष्मदि वा स्याताम् । व्रीहीन् वप, लुनीहि, पुनीहि, इत्येव यतते, यत्पते वा ; पक्षे व्रीहीन् वपति, लुनाति, पुनाति, इत्येव यतते,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यत्यते वा । सूत्रमधीष्व, निर्युक्तिमधीष्व, भाष्यमधीष्वेत्येवाधीते, पठ्यते वा ; पक्षे सूत्रमधीते, निर्युक्तिमधीते, [भाष्यमधीते,] इत्येवाधीते, पठ्यते वा । व्रीहीन् वपत, लुनीत, पुनीतेत्येव यतध्वे, व्रीहीन् वप, लुनीहि, पुनीहीत्येव चेष्टध्वे ; पक्षे व्रीहीन् वपथ, लुनीथ, पुनीथेत्येव यतध्वे । सूत्रमधीध्वं निर्युक्तिमधीध्वं भाष्यमधीध्वमित्येवाधीध्वे, सूत्रमधीष्व निर्युक्तिमधीष्व भाष्यमधीष्वेत्येवाधीष्व (ध्वे ?) ; पक्षे सूत्रमधीध्वे निर्युक्तिमधीध्वे भाष्यमधीध्वे । सामान्यार्थस्येति किम् ? व्रीहीन् वप लुनीहि पुनीहि इत्येव वपति लुना[ति पुना]तीति मा भूत् ॥२०॥

निषेधेऽलं-खल्वोः क्त्वा ।५।४।४४॥

निषेधार्थयोरलं-खल्वोरुपपदयोर्धातोः क्त्वा वा स्यात् । अलं कृत्वा, खलु कृत्वा, पक्षे अलं रुदितेन ॥२१॥

परा-ऽवरे ।५।४।४५॥

परे अवरे च गम्ये क्त्वा वा स्यात् । अतिक्रम्य नदीं गिरिः, नद्यतिक्रमेण गिरिः, [अप्राप्य नदीं गिरिः,] नद्यप्राप्या गिरिः ॥२२॥

निमील्यादि-मेङस्तुल्यकर्तृके ।५।४।४६॥

तुल्यो धात्वर्थान्तरेण कर्त्ता यस्य तद्वृत्तिभ्यो निमील्यादिभ्यो मेङश्च धातोः सम्बन्धे क्त्वा वा स्यात् । अक्षिणी निमील्य हसति, मुखं व्यादाय स्वपिति, अपमित्य याचते, पक्षे अपमातुं याचते । तुल्यकर्तृक इति किम् ? चैत्रस्याक्षिनिमीलने मैत्रो हसति ॥२३॥

प्राक्काले ।५।४।४७॥

परकालेन धात्वर्थेन तुल्यकर्तृके प्राक्कालेऽर्थे वर्त्तमानाद् धातोः सम्बन्धे क्त्वा वा । आसित्वा भुङ्क्ते, आस्यते भोक्तुम् । प्राक्काल इति किम् ? भुज्यते पीयते च ॥२४॥

ख्णम् चाभीक्ष्ण्ये ।५।४।४८।

आभीक्ष्ण्ये परकालेन तुल्यकर्तृके प्राक्कालेऽर्थे वर्त्तमानाद् धातोः सम्बन्धे ख्णम् क्त्वा च स्यात् । भोजं भोजं याति, भुक्त्वा भुक्त्वा याति ॥२५॥

पूर्वा-ऽग्रे-प्रथमे ।५।४।४९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एषूपपदेषु परकालेन तुल्यकर्तृके प्राक्कालेऽर्थे वर्त्तमानाद् धातोः सम्बन्धे ख्णम् वा स्यात् । पूर्वं भोजं याति, पूर्वं भुक्त्वा याति, एवम् अग्रे भोजम्, अग्रे भुक्त्वा ; प्रथमं भोजम्, प्रथमं भुक्त्वा ; पूर्वं भुज्यते ततो याति ॥२६॥

अन्यथैवं-कथमित्थमः कृगोऽनर्थकात् ।५।४।५०॥

एभ्यः परात् तुल्यकर्तृकार्थात् कृगोऽनर्थकाद् धातोः सम्बन्धे ख्णम् वा स्यात् । अन्यथाकारम्, एवङ्कारम्, कथङ्कारम्, इत्थङ्कारं भुङ्क्ते, पक्षे अन्यथा कृत्वा । अनर्थकादिति किम् ? अन्यथा कृत्वा शिरो भुङ्क्ते ॥२७॥

यथा-तथादीर्ष्योत्तरे ।५।४।५१॥

आभ्यां परात् तुल्यकर्तृकार्थादनर्थकात् कृगो धातोः सम्बन्धे ख्णम् वा स्यात्, ईर्ष्यश्चेदुत्तरयति । कथं त्वं भोक्ष्यसे ? इति पृष्टोऽसूयया तं प्रत्याह–यथाकारमहं भोक्ष्ये तथाकारमहं भोक्ष्ये, किं तवानेन ? । ईर्ष्योत्तर इति किम् ? यथा कृत्वाऽहं भोक्ष्ये तथा द्रक्ष्यसि ॥२८॥

शापे व्याप्यात् ।५।४।५२॥

कर्मणः परात् तुल्यकर्तृकार्थात् कृगो धातोः सम्बन्धे ख्णम् वा स्यात्, आक्रोशे गम्ये । चोरङ्कारमाक्रोशति । शाप इति किम् ? चोरं कृत्वा हेतुभिः कथयति ॥२९॥

स्वाद्वर्थाद् अदीर्घात् ।५।४।५३॥

स्वाद्वर्थाददीर्घान्ताद् व्याप्यात् परस्मात् तुल्यकर्तृकार्थात् कृगो धातोः सम्बन्धे ख्णम् वा स्यात् । स्वादुङ्कारं भुङ्क्ते, मिष्टङ्कारं भुङ्क्ते, पक्षे स्वादुं कृत्वा । अदीर्घादिति किम् ? स्वाद्वीं कृत्वा यवागूं भुङ्क्ते ॥३०॥

विद्-दृग्भ्यः कात्स्न्र्ये णम् ।५।४।५४॥

कात्स्न्र्यवतो व्याप्यात् परेभ्यस्तुल्यकर्तृके प्राक्कालेऽर्थे वर्त्तमानेभ्यो विदिभ्यो दृशेश्च धातोः सम्बन्धे णम् वा स्यात् । अतिथिवेदं भोजयति, कन्यादर्शं वरयति । कात्स्न्र्य इति किम् ? अतिथिं विदित्वा भोजयति ॥३१॥

यावतो विन्द-जीवः ।५।४।५५॥

कात्स्न्र्यवतो व्याप्याद् यावतः पराभ्यां तुल्यकर्तृकाभ्यां विन्द-जीविभ्यां धातोः सम्बन्धे णम् वा स्यात् । यावद्वेदं भुङ्क्ते, यावज्जीवमधीते ॥३२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चर्मोदरात् पूरेः ।५।४।५६॥

आभ्यां व्याप्याभ्यां परात् तुल्यकर्तृकार्थात् पूरयतेर्धातोः सम्बन्धे णम् वा स्यात्। चर्मपूरमास्ते, उदरपूरं शेते ॥३३॥

वृष्टिमान ऊलुक् चास्य वा ।५।४।५७॥

व्याप्यात् परात् पूरयतेर्धातोः सम्बन्धे णम् वा स्यात्, पूरयतेरूतो लुक् च वा, समुदायेन वृष्टीयत्ताऽवग[म्य]ते। गोष्पदप्रम्, गोष्पदपूरं वा वृष्टो मेघः ॥३४॥

शुष्क-चूर्ण-रूक्षात् पिषस्तस्यैव ।५।४।६०॥

एभ्यो व्याप्येभ्यः परात् पिषेर्णम् वा स्यात्, तस्यैव धातोः सम्बन्धे। शुष्कपेषं पिनष्टि, एवं चूर्णपिषम्, रूक्षपेषम् ॥३५॥

कृग्-ग्रहोऽकृत-जीवात् ।५।४।६१॥

आभ्यां व्याप्याभ्यां पराद् यथासङ्ख्यं कृगो ग्रहेश्च तस्यैव सम्बन्धे णम् वा स्यात्। अकृतकारं करोति, जीवग्राहं गृह्णाति ॥३६॥

निमूलात् कषः ।५।४।६२॥

निमूलाद् व्याप्यात् परात् कषेस्तस्यैव सम्बन्धे णम् वा स्यात्। निमूलकाषं कषति, निमूलस्य काषं कषति ॥३७॥

हनश्च समूलात् ।५।४।६३॥

समूलाद् व्याप्यात् पराद् हन्तेः कषेश्च तस्यैव सम्बन्धे णम् वा स्यात्। समूलघातं हन्ति, समूलकाषं कषति ॥३८॥

करणेभ्यः ।५।४।६४॥

करणार्थाद् पराद् हन्तेस्तस्यैव सम्बन्धे णम् वा स्यात्। पाणिघातं कुड्यमाहन्ति ॥३९॥

स्व-स्नेहनार्थात् पुष-पिषः ।५।४।६५॥

स्वशब्दार्थात् स्नेहनार्थाच्च करणार्थात् पराद् यथासङ्ख्यं पुषः पिषश्च तस्यैव सम्बन्धे णम् वा स्यात्। स्वपोषं पुष्णाति, एवम् आत्मपोषम्। उदपेषं पिनष्टि, एवं क्षीरपेषम् ॥४०॥

बन्धेर्नाम्नि ।५।४।६७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बन्धिः प्रकृतिर्नामविशेषणं च, बन्धेर्बन्धनस्य यन्नाम संज्ञा, तद्विषयात् करणार्थात् पराद् बन्धेस्तस्यैव सम्बन्धे णम् वा स्यात्। कौञ्चबन्धम्बद्धः ॥४१॥

आधारात् ।५।४।६८॥

आधारार्थात् पराद् बन्धेस्तस्यैव सम्बन्धे णम् वा स्यात्। चारकबन्धम्बद्धः ॥४२॥

कर्तुर्जीव-पुरुषान्नश्-वहः ।५।४।६९॥

आभ्यां कर्तृभ्यां पराद् यथासङ्ख्यं नशेर्वहेश्च तस्यैव सम्बन्धे णम् वा स्यात्। जीवनाशं नश्यति, पुरुषवाहं वहति। कर्तुरिति किम् ? जीवेन नश्यति ॥४३॥

ऊर्ध्वात् पूः-शुषः ।५।४।७०॥

कर्तुरूर्ध्वात् पूरः शुषश्च तस्यैव सम्बन्धे णम् वा स्यात्। ऊर्ध्वपूरं पूर्यते, ऊर्ध्वशोषं शुष्यति ॥४४॥

व्याप्याच्चेवात् ।५।४।७१॥

व्याप्यात् कर्तुश्चोपमानात् पराद् धातोस्तस्यैव सम्बन्धे णम् वा स्यात्। सुवर्णनिधायं निहितः, काकनाशं नष्टः ॥४५॥

दंशेस्तृतीयया ।५।४।७३॥

तृतीयान्तेन योगे तुल्यकर्तृकार्थादुपपूर्वाद् दंशेर्धातोः सम्बन्धे णम् वा स्यात्। मूलकेनोपदंशं मूलकोपदंशम्, मूलकेनोपदश्य भुङ्क्ते ॥४६॥

हिंसार्थादेकाऽऽप्यात् ।५।४।७४॥

हिंसार्थाद् धातोर्धात्वन्तरेणैकाऽऽप्यात् तुल्यकर्तृकार्थात् तृतीयान्तेन योगे णम् वा स्यात्। दण्डेनोपघातं दण्डोपघातं दण्डेनोपहत्य वा गाः सादयति। एकाप्यादिति किम् ? दण्डेनोपहत्य चोरं गोपालो गाः खेटयति ॥४७॥

उपपीड-रुध-कर्षस्तत्सप्तम्या ।५।४।७५॥

तृतीयया युक्ता सप्तमी तत्सप्तमी, तदन्तेन योगे उपपूर्वेभ्यस्तुल्यकर्तृकार्थेभ्यो धातोः सम्बन्धे णम् वा स्यात्। पार्श्वाभ्यामुपपीडं पार्श्वोपपीडं शेते, [पार्श्वयोरुपपीडं पार्श्वोपपीडं शेते ;] व्रजेनोपरोधं व्रजोपरोधम्, व्रजे उपरोधं व्रजोपरोधं गाः स्थापयति ; पाणिनोपकर्षं पाण्युपकर्षं धाना गृह्णाति ॥४८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पञ्चम्या त्वरायाम् ।५।४।७७॥

त्वरायां गम्यायां पञ्चम्यन्तेन योगे तुल्यकर्तृकार्थाद् धातोः सम्बन्धे णम् वा स्यात् । शय्याया उत्थायं शय्योत्थायं धावति, पक्षे शय्याया उत्थाय धावति । त्वरायामिति किम् ? आसनादुत्थाय याति ॥४९॥

द्वितीयया ।५।४।७८॥

द्वितीयान्तेन योगे त्वरायां गम्यायां तुल्यकर्तृकार्थाद् धातोः सम्बन्धे णम् वा स्यात् । लोष्टान् ग्राहं लोष्टग्राहम्, लोष्टान् गृहीत्वा युध्यन्ते ॥५०॥

विश-पत-पद-स्कन्दो वीप्सा-ऽऽभीक्ष्ण्ये ।५।४।८१॥

द्वितीयान्तेन योगे तुल्यकर्तृकार्थाद् [विश्यादेर्वीप्सा-ऽऽभीक्ष्ण्ययोर्गम्ययोः] धातोः सम्बन्धे णम् वा स्यात् । गेहं गेहमनुप्रवेशं गेहानुप्रवेश-मास्ते, गेहमनुप्रवेशमनुप्रवेशं गेहानुप्रवेशमास्ते, गेहं गेहमनुप्रपातं गेहानुप्रपातमास्ते, गेहमनुप्रपातमनुप्रपातं गेहानुप्रपातमास्ते ; गेहं गेहमनुप्रपादं गेहानुप्रपादमास्ते, गेहमनुप्रपादमनुप्रपादं गेहानुप्रपादमास्ते ; गेहं गेहमवस्कन्दं गेहावस्कन्दमास्ते, गेहमवस्कन्दमवस्कन्दं गेहावस्कन्दमास्ते ; पक्षे गेहं गेहमनुप्रविश्याऽऽस्ते, गेहमनुप्र-विश्यानुप्रविश्यास्ते इत्यादि ॥५१॥

इच्छार्थे कर्मणः सप्तमी ।५।४।८९॥

इच्छार्थे धातावुपपदे तुल्यकर्तृकार्थात् कर्मभूताद् धातोः सप्तमी स्यात् । भुञ्जीयेति इच्छति । इच्छार्थ इति किम् ? भोजको याति । कर्मण इति किम् ? इच्छन् करोति ॥५२॥

शक-धृष-ज्ञा-रभ-लभ-सहा-ऽर्ह-ग्ला-घटा-ऽस्ति-समर्थार्थे च तुम् ।५।४।९०॥

शक्याद्यर्थेषु इच्छार्थेषु च धातुषु, समर्थार्थेषु च नामसूपपदेषु कर्मभूताद् धातोस्तुम् स्यात् । शक्नोति पारयति वा भोक्तुम्, एवं धृष्णोति, जानाति, आरभते, लभते, सहते, अर्हति, ग्लायति, घटते, अस्ति, समर्थः, इच्छति वा भोक्तुम् ॥५३॥

इत्याचार्यश्रीहेमचन्द्रविरचितायां
स्वोपज्ञसिद्धहेमचन्द्राभिधानशब्दानुशासनरहस्यवृत्तौ
पञ्चमस्य चतुर्थः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[अथ षष्ठोऽध्यायः] [प्रथमः पादः]

तद्धितोऽणादिः ।६।१।१॥

वक्ष्यमाणोऽणादिस्तद्धितः स्यात् ॥१॥

पौत्रादि वृद्धम् ।६।१।२॥

परमप्रकृतेर्यत् पौत्रादि अपत्यं तद् वृद्धं स्यात् । गार्ग्यः, पुत्रस्तु गार्गिः ॥२॥

संज्ञा दुर्वा ।६।१।६॥

हठात् संज्ञा दुर्वा स्यात् । देवदत्तीयाः, दैवदत्ताः ॥३॥

त्यदादिः ।६।१।७॥

असौ दुः स्यात् । त्यदीयम्, तदीयम् ॥४॥

वृद्धिर्यस्य स्वरेष्वादिः ।६।१।८॥

यस्य स्वराणामादिः स्वरो वृद्धिः स दुः स्यात् । शालीयः ॥५॥

वा-ऽऽद्यात् ।६।१।११॥

वेति आद्यादिति च द्वयमधिकृतं स्यात्, तेन तद्धितप्रसङ्गे पक्षे वाक्य-समासावपि, सूत्रादौ च निर्दिष्टात् प्रत्ययः ॥६॥

प्राग् जितादण् ।६।१।१३॥

प्राग् जितोक्तेः पादत्रयं यावद् येऽर्थास्तेष्वण् वा स्यात् । औपगवः, माञ्जिष्ठम् ॥७॥

अनिदम्यणपवादे च दित्यदित्यादित्य-यम-पत्युत्तरपदाञ्ञ्यः ।६।१।१५॥

एभ्यः प्राग्जितीयेऽर्थे इदंवर्जेऽपत्याद्यर्थे योऽणोऽपवादस्तद्विषये च ञ्यः स्यात् । दैत्यः, आदित्यः, आदित्य्यः, याम्यः, बार्हस्पत्यः ॥८॥

द्विगोरनपत्ये य-स्वरादेर्लुबद्विः ।६।१।२४॥

अपत्यादन्यस्मिन् प्राग्जितीयेऽर्थे भूतस्य द्विगोः परस्य यादेः स्वरादेश्च प्रत्ययस्य लुप् स्यात्, न तु द्विः । द्विरथः, पञ्चकपालः । अनपत्य इति किम् ? पाञ्चनरिः । अद्विरिति किम् ? पाञ्चकपालम् ॥९॥

प्राग् वतः स्त्री-पुंसात् नञ्-स्नञ् ।६।१।२५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वतोऽर्वागर्थेष्वनिदम्यणपवादे चाभ्यां यथासङ्ख्यं नञ्-स्नञौ स्याताम्। स्त्रैणः, पौंस्नः। प्राग् वत इति किम् ? स्त्रीवत् ॥१०॥

गोः स्वरे यः ।६।१।२७॥

गोः स्वरादितद्धितप्राप्तौ यः स्यात्। गव्यम्। स्वर इति किम् ? गोमयग्॥११॥

ङसोऽपत्ये ।६।१।२८॥

षष्ठ्यन्तादपत्येऽर्थे यथाविहितमणादयः स्युः। औपगवः, दैत्यः ॥१२॥

आद्यात् ।६।१।२९॥

अपत्ये यस्तद्धितः स परमप्रकृतेरेव स्यात्। उपगोरपत्यमौपगवः, [तस्याऽप्यौपगविः,] औपगवेरप्यौपगवः ॥१३॥

वृद्धाद् यूनि ।६।१।३०॥

यूनि अपत्ये यः प्रत्ययः स आद्याद् यो वृद्धप्रत्ययस्तदन्तात् स्यात्। गार्ग्यस्यापत्यं युवा गार्ग्यायणः ॥१४॥

अत इञ् ।६।१।३१॥

अदन्तात् षष्ठ्यन्तादपत्ये इञ् स्यात्। दाक्षिः ॥१५॥

बाह्वादिभ्यो गोत्रे ।६।१।३२॥

स्वापत्यसन्तानस्य स्वव्यपदेशहेतुर्य आद्यपुरुषस्तदपत्यं गोत्रम्, एभ्यः षष्ठ्यन्तेभ्यो गोत्रेऽर्थे इञ् स्यात्। बाहविः, औपबाहविः ॥१६॥

विदादेर्वृद्धे ।६।१।४१॥

एभ्यो वृद्धेऽपत्येऽञ् स्यात्। वैदः, और्वः ॥१७॥

गर्गादेर्यञ् ।६।१।४२॥

एभ्यः षष्ठ्यन्तेभ्यो वृद्धेऽपत्ये यञ् स्यात्। गार्ग्यः। वात्स्यः ॥१८॥

कुञादेर्ञायन्यः ।६।१।४७॥

कुञ्जादेः षष्ठ्यन्ताद् वृद्धे ञायन्यः स्यात्। कौञायन्यः, ब्राह्मायन्यः ॥१९॥

स्त्रीबहुष्वायनञ् ।६।१।४८॥

कुञादेः षष्ठ्यन्ताद् बहुत्वविशिष्टे वृद्धे स्त्रियां [चाऽ]बहुत्वेऽप्यायनञ्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्यात् । कौञ्जायनी, कौञ्जायनाः ॥२०॥

नडादिभ्य आयनण् ।६।१।५३॥

एभ्यो वृद्धे आयनण् स्यात् । नाडायनः, चारायणः ॥२१॥

यञिञः ।६।१।५४॥

वृद्धे यौ यञिञौ तदन्ताद् यूनि आयनण् स्यात् । गार्ग्यायणः, दाक्षायणः ॥२२॥

शिवादेरण् ।६।१।६०॥

शिवादेरपत्येऽण् स्यात् । शैवः, प्रौष्ठः ॥२३॥

पीला-साल्वा-मण्डूकाद् वा ।६।१।६८॥

एभ्योऽपत्येऽण् वा स्यात् । पैलः, पैलेयः ; साल्वः, साल्वेयः ; माण्डूकः, माण्डूकिः ॥२४॥

दितेश्चैयण् वा ।६।१।६९॥

दितेर्मण्डूकाच्चाऽपत्ये एयण् वा स्यात् । दैतेयः, दैत्यः ; माण्डूकेयः, माण्डूकिः ॥२५॥

ङ्याप्-त्यूङः ।६।१।७०॥

ङ्यन्ताद् आबन्तात् [त्यन्ताद्] ऊङन्ताच्चापत्ये एयण् स्यात् । सौपर्णेयः, वैनतेयः, यौवतेयः, कामण्डलेयः ॥२६॥

द्विस्वरादनद्याः ।६।१।७१॥

द्विस्वराद् ङ्याप्-त्यूङन्तादनद्यर्थादपत्ये एयण् स्यात् । दात्तेयः । अनद्या इति किम् ? सैप्रः ॥२७॥

इतोऽनिञः ।६।१।७२॥

इञ्वर्जेदन्ताद् द्विस्वरादपत्ये एयण् स्यात् । नाभेयः । अनिञ इति किम् ? दाक्षायणः । द्विस्वरादित्येव, मारिचः ॥२८॥

राष्ट्र-क्षत्रियात् सरूपाद् राजा-ऽपत्ये द्विरञ् ।६।१।११४॥

राष्ट्र-क्षत्रियार्थाभ्यां [सरूपाभ्यां] यथासङ्ख्यं राजा-ऽपत्ययोरञ् स्यात्, स च द्विः । विदेहा राजानः, अपत्यानि वा । सरूपादिति किम् ? सौराष्ट्रको

Jain Education International For Private & Personal Use Only www.jainelibrary.org

राजा, शेषादकञ् ॥२९॥

शकादिभ्यो द्रेर्लुप् ।६।१।१२०॥

एभ्यः परस्य द्रिसंज्ञस्य लुप् स्यात् । शको राजाऽपत्यं वा, एवं यवनः ॥३०॥

बहुष्वस्त्रियाम् ।६।१।१२४॥

द्व्यन्तस्य बह्वर्थस्य यो द्रिस्तस्याऽस्त्रियां लुप् स्यात् । पञ्चाला राजानोऽपत्यानि वा । अस्त्रियामिति किम् ? पाञ्चाल्यः ॥३१॥

यस्कादेर्गोत्रे ।६।१।१२५॥

एभ्यो यः प्रत्ययस्तदन्तस्य बहुगोत्रार्थस्य यस्कादेर्यः स प्रत्ययस्तस्याऽस्त्रियां लुप् स्यात् । यस्काः, लह्याः । गोत्र इति किम् ? यास्काः छात्राः ॥३२॥

यञञोऽश्यापर्णान्त-गोपवनादेः ।६।१।१२६॥

यञञन्तस्य बहुगोत्रार्थस्य यः स प्रत्ययस्तस्याऽस्त्रियां लुप् स्यात्, न तु श्यापर्णान्तेभ्यो गोपवनादिभ्यः । गर्गाः, विदाः । अश्यापर्णेत्यादि किम् ? गौपवनाः ॥३३॥

भृग्वङ्गिरस्-कुत्स-वशिष्ठ-गोतमा-ऽत्रेः ।६।१।१२८॥

एभ्यो यः प्रत्ययस्तदन्तस्य बहुगोत्रार्थस्य यः स प्रत्ययस्तस्याऽस्त्रियां लुप् स्यात् । भृगवः, अङ्गिरसः, कुत्साः, वशिष्ठाः, गोतमाः, अत्रयः ॥३४॥

न प्राग्जितीये स्वरे ।६।१।१३५॥

गोत्रे उत्पन्नस्य या लुबुक्ता सा प्राग्जितीयेऽर्थे यः स्वरादिस्तद्धितः तद्विषये न स्यात् । गार्गीयः, आत्रेयीयाः । प्राग्जितीय इति किम् ? अत्रीयः । स्वर इति किम् ? गर्गमयम् ॥३५॥

षष्ठस्य प्रथमः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[षष्ठाध्याये द्वितीयः पादः]

रागाट्टो रक्ते ।६।२।१॥

रज्यते येन कुसुम्भादिना तदर्थात् तृतीयान्ताद् रक्तमित्यर्थे यथाविहितं प्रत्ययः स्यात् । कौसुम्भं वासः ॥१॥

उदितगुरोर्भाद् युक्तेऽब्दे ।६।२।५॥

उदितो बृहस्पतिर्यत्र नक्षत्रे तदर्थाट्टान्ताद् युक्तेऽब्दे यथाविहितं प्रत्ययः स्यात् । पौषं वर्षम् । *तिष्यपुष्ययोर्भणि* [२।४।९०] इति यलुक् ॥२॥

चन्द्रयुक्तात् काले, लुप् त्वप्रयुक्ते ।६।२।६॥

चन्द्रेण युक्तं यन्नक्षत्रं तदर्थाट्टान्ताद् युक्ते कालेऽर्थे यथाविहितं प्रत्ययः स्यात्, अप्रयुक्ते तु कालार्थे लुप् स्यात् । पौषमहः, अद्य पुष्यः ॥३॥

षष्ठ्याः समूहे ।६।२।९॥

षष्ठ्यन्तात् समूहेऽर्थे यथाविहितं प्रत्ययाः स्युः । चाषम्, स्त्रैणम् ॥४॥

गोत्रोक्ष-वत्सोष्ट्र-वृद्धा-ऽजोरभ्र-मनुष्य-राज-राजन्य-राजपुत्रादकञ् ।६।२।१२॥

गोत्रप्रत्ययान्तादुक्षादेश्च समूहेऽकञ् स्यात् । गार्गकम्, औक्षकम्, वात्सकम्, औष्ट्रकम्, वार्द्धकम्, आजकम्, औरभ्रकम्, मानुष्यकम्, राजकम्, राजन्यकम्, राजपुत्रकम् ॥५॥

केदाराण्ण्यश्च ।६।२।१३॥

केदारात् समूहे ण्योऽकञ् च स्यात् । कैदार्यम्, कैदारकम् ॥६॥

कवचि-हस्त्यचित्ताच्चेकण् ।६।२।१४॥

कवचि-हस्तिभ्यामचित्तार्थात् केदाराच्च समूहे इकण् स्यात् । कावचिकम्, हास्तिकम्, आपूपिकम्, कैदारिकम् ॥७॥

गो-रथ-वातात् त्रलू-कट्यलूलम् ।६।२।२४॥

एभ्यः समूहे यथासङ्ख्यमेते स्युः । गोत्रा, रथकट्या, वातूलः ॥८॥

पाशादेश्च ल्यः ।६।२।२५॥

अस्माद् गवादेश्च समूहे ल्यः स्यात् । पाश्या, तृण्या, गव्या, रथ्या,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वात्या ॥९॥

ग्राम-जन-बन्धु-गज-सहायात् तल् ।६।२।२८॥

एभ्यः समूहे +तल् स्यात् । ग्रामता, जनता, बन्धुता, गजता, सहायता ॥१०॥

पुरुषात् कृत-हित-वध-विकारे चैयञ् ।६।२।२९॥

एषु समूहे च पुरुषादेयञ् स्यात् । पौरुषेयो ग्रन्थः, पौरुषेयं पथ्यम्, पौरुषेयो वधो विकारो वा, पौरुषेयः समूहः ॥११॥

विकारे ।६।२।३०॥

षष्ठ्यन्ताद् विकारे यथाविहितं प्रत्ययाः स्युः । आश्मनः ॥१२॥

प्राण्यौषधि-वृक्षेभ्योऽवयवे च ।६।२।३१॥

एभ्यः षष्ठ्यन्तेभ्यो विकारेऽवयवे च यथाविहितं प्रत्ययाः स्युः । कापोतं सक्थि मांसं वा, दौर्वं काण्डं भस्म वा, एवं बैल्वम् ॥१३॥

हेमादिभ्योऽञ् ।६।२।४५॥

एभ्यो यथायोगं विकारेऽवयवे चाऽञ् स्यात् । हैमी यष्टिः, राजतः ॥१४॥

अभक्ष्या-ऽऽच्छादने वा मयट् ।६।२।४६॥

षष्ठ्यन्ताद् भक्ष्या-ऽऽच्छादनवर्जे यथायोगं विकारेऽवयवे च मयड् वा स्यात् । भस्ममयम्, भास्मनम् । अभक्ष्या-ऽऽच्छादन इति किम् ? मौद्गः सूपः, कार्पासः पटः ॥१५॥

एकस्वरात् ।६।२।४८॥

अस्माद् भक्ष्या-ऽऽच्छादन[वर्जे] विकारेऽवयवे च नित्यं मयट् स्यात् । वाङ्मयम् ॥१६॥

गोः पुरीषे ।६।२।५०॥

गोः पुरीषेऽर्थे मयट् स्यात् । गोः पुरीषं गोमयम्, पयस्तु गव्यम् ॥१७॥

ह्योगोदोहादीनञ् हियङ्गुश्चास्य ।६।२।५५॥

अस्माद् विकारे नाम्नि ईनञ् स्यात्, तद्योगे च प्रकृतेर्हियङ्गुः । हैयङ्गवीनं नवनीतं घृतं वा । नाम्नीत्येव, ह्योगोदोहं तक्रम् ॥१८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लुब् बहुलं पुष्प-मूले ।६।२।५७॥

विकारा-ऽवयवार्थस्य पुष्पे मूले चार्थे प्रत्ययस्य बहुलं लुप् स्यात् । मल्लिका पुष्पम्, विदारी मूलम् । बहुलमिति किम् ? वारणं पुष्पम्, ऐरण्डं मूलम् ॥१९॥

फले ।६।२।५८॥

विकारेऽवयवे वा फलेऽर्थे प्रत्ययस्य लुप् स्यात् । आमलकम् ॥२०॥

पितृ-मातुर्व्य-डुलं भ्रातरि ।६।२।६२॥

आभ्यां भ्रातर्यर्थे यथासङ्ख्यं व्य-डुलौ स्याताम् । पितृव्यः, मातुलः ॥२१॥

पित्रोर्डामहट् ।६।२।६३॥

पितृ-मातृभ्यां माता-पित्रोर्डामहट् स्यात् । पितामहः, पितामही ; मातामहः, मातामही ॥२२॥

निवासा-ऽदूरभव इति देशे नाम्नि ।६।२।६९॥

षष्ठ्यन्तान्निवासा-ऽदूरभवयोर्यथाविहितं प्रत्ययः स्यात्, तदन्तं चेद् रूढं देशनाम । शैवम्, वैदिशं पुरम् ॥२३॥

तदत्राऽस्ति ।६।२।७०॥

तदिति प्रथमान्ताद्, अत्रेति सप्तम्यर्थे यथाविहितं प्रत्ययः स्यात्, प्रथमं(मान्तं) चेदस्तीति, प्रत्ययान्तं चेद् देशनाम । औदुम्बरं पुरम् ॥२४॥

तेन निर्वृत्ते च ।६।२।७१॥

तेनेति तृतीयान्तात् निर्वृत्तेऽर्थे यथाविहितं प्रत्ययः स्यात्, देशनाम्नि । कौशाम्बी ॥२५॥

सुतङ्गमादेरिञ् ।६।२।८५॥

चातुरर्थिको देशनाम्नि स्यात् । सौतङ्गमिः++, [1]मौनिचित्तिः ॥२६॥

साऽस्य पौर्णमासी ।६।२।९८॥

प्रथमान्तादस्येति षष्ठ्यर्थे यथाविहितं नाम्नि प्रत्ययः स्यात्, प्रथमान्तं चेत् पौर्णमासी । पौषो मासोऽर्द्धमासो वा ॥२७॥

देवता ।६।२।१०१॥

१. "मुनेरिव चित्तमस्य" इति लघुवृत्तौ J2 टिप्पणे ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

देवतार्थात् प्रथमान्तात् षष्ठ्यर्थे यथाविहितं प्रत्ययः स्यात् । जैनः, आदित्यः ॥२८॥

तद् वेत्त्यधीते ।६।२।११७॥

तदिति द्वितीयान्ताद् वेत्ति अधीते वा इत्यर्थयोर्यथाविहितं प्रत्ययः स्यात् । मौहूर्त्तः ॥२९॥

न्यायादेरिकण् ।६।२।११८॥

एभ्यो वेत्त्यधीते वेत्यर्थे इकण् स्यात् । नैयायिकः, नैयासिकः ॥३०॥

कचित् ।६।२।१४५॥

अपत्यादिभ्योऽन्यत्राप्यर्थे कचिद् यथाविहितं प्रत्ययः स्यात् । चाक्षुषं रूपम्, आश्वो रथः ॥३१॥

इति षष्ठस्य द्वितीयः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[षष्ठाध्याये तृतीयः पादः]

शेषे ।६।३।१॥

अपत्यादिभ्योऽन्यस्मिन् प्राग्जितीयेऽर्थे इतोऽनुक्रम्यमाणं वेदितव्यम् ॥१॥

नद्यादेरेयण् ।६।३।२॥

एभ्यः प्राग्जितीयेऽर्थे एयण् स्यात् । नादेयः, वानेयः । शेष इत्येव, समूहे नादिकम् ॥२॥

राष्ट्रादियः ।६।३।३॥

राष्ट्रियः ॥३॥

दूरादेत्यः ।६।३।४॥

दूरेत्यः ॥४॥

उत्तरादाहञ् ।६।३।५॥

औत्तराहः ॥५॥

पारावारादीनः ।६।३।६॥

पारावारीणः ॥६॥

द्यु-प्रागपागुदक्-प्रतीचो यः ।६।३।८॥

दिव्यम्, प्राच्यम्, अपाच्यम्, उदीच्यम्, प्रतीच्यम् ॥७॥

ग्रामादीनञ् च ।६।३।९॥

शेषेऽर्थे यश्च स्यात् । ग्रामीणः, ग्राम्यः ॥८॥

दक्षिणा-पश्चात्-पुरसस्त्यण् ।६।३।१३॥

दाक्षिणात्यः, पाश्चात्त्यः, पौरस्त्यः ॥९॥

केहा-ऽमा-त्र-तससत्यच् ।६।३।१६॥

क्वत्यः, इहत्यः, अमात्यः, तत्रत्यः, कुतस्त्यः ॥१०॥

भवतोरिकणीयसौ ।६।३।३०॥

भावत्कम्, भवदीयम् ॥११॥

+पर-जन-राज्ञोऽकीयः ।६।३।३१॥

परकीयः, जनकीयः, राजकीयः ॥१२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दोरीयः ।६।३।३२॥

देवदत्तीयः, तदीयः ॥१३॥

उष्णादिभ्यः कालात् ।६।३।३३॥

उष्णादिपूर्वपदात् कालान्ताच्छेषे ईयः स्यात् । उष्णकालीयम् ॥१४॥

वा युष्मदस्मदोऽञीनञौ युष्माका-ऽस्माकं चास्यैकत्वे तु तवक-ममकम् ।६।३।३७॥

आभ्यां शेषेऽर्थेऽञीनञौ वा स्याताम्, तद्योगे च यथासङ्ख्यं युष्माका-ऽस्माकौ, एकार्थयोस्तु तवक-ममकौ । यौष्माकी, यौष्माकीणः ; आस्माकी, आस्माकीनः ; युष्मदीयः, अस्मदीयः ; तावकः, तावकीनः ; मामकः, मामकीनः ; त्वदीयः, मदीयः ॥१५॥

अमोऽन्ता-ऽवो-ऽधसः ।६।३।७४॥

अन्तादेः शेषेऽर्थेऽमः स्यात् । अन्तमः, अवमः, अधमः ॥१६॥

पश्चादाद्यन्ता-ऽग्रादिमः ।६।३।७५॥

पश्चिमः, आदिमः, अन्तिमः, अग्रिमः ॥१७॥

मध्यान्मः ।६।३।७६॥

मध्ये जातो मध्यमः ॥१८॥

मध्य उत्कर्षा-ऽपकर्षयोरः ।६।३।७७॥

अनयोर्मध्यार्थान्मध्याच्छेषेऽर्थे अः स्यात् । नात्युत्कृष्टो नात्यपकृष्टो मध्यपरिणामो मध्यो विद्वान् ॥१९॥

अध्यात्मादिभ्य इकण् ।६।३।७८॥

एभ्यः शेषेऽर्थे इकण् स्यात् । आध्यात्मिकम्, आधिदैविकम् ॥२०॥

समानपूर्व-लोकोत्तरपदात् ।६।३।७९॥

समानशब्दपूर्वपदेभ्यो लोकशब्दोत्तरपदेभ्यश्च शेषेऽर्थे इकण् स्यात् । सामानग्रामिकः, ऐहलौकिकः ॥२१॥

वर्षा-कालेभ्यः ।६।३।८०॥

वर्षायाः कालविशेषार्थाच्च शेषेऽर्थे इकण् स्यात् । वार्षिकः, मासिकः ॥२२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चिर-परुत्-परारेस्त्नः ।६।३।८५॥

एभ्यः शेषेऽर्थे त्नो वा स्यात् । चिरत्नम्, परुत्नम्, परारित्नम् ; चिरंतनम्, परुत्तनम्, परारितनम् ॥२३॥

पुरो नः ।६।३।८६॥

पुराशब्दात् कालार्थाच्छेषेऽर्थे नो वा स्यात् । पुराणम्, पुरातनम् ॥२४॥

पूर्वाह्ला-ऽपराह्लात् तनट् ।६।३।८७॥

आभ्यां शेषेऽर्थे तनड् वा स्यात् । पूर्वाह्लेतनः, अपराह्लेतनः ; पौर्वाह्लिकः, आपराह्लिकः ॥२५॥

सायं-चिरं-प्राह्णे-प्रगे-ऽव्ययात् ।६।३।८८॥

एभ्योऽव्ययाच्च कालार्थाच्छेषेऽर्थे तनड् नित्यं स्यात् । सायंतनम्, चिरन्तनम्, प्राह्णेतनम्, [प्रगेतनम्,] दिवातनम् ॥२६॥

भर्तु-सन्ध्यादेरण् ।६।३।८९॥

भं नक्षत्रम्, तदर्थाद् ऋत्वर्थात् सन्ध्यादेश्च कालार्थाच्छेषेऽर्थेऽण् स्यात् । पौषः, ग्रैष्मः, सान्ध्यः, आमावास्यः ॥२७॥

संवत्सरात् फल-पर्वणोः ।६।३।९०॥

अस्मात् फले पर्वणि च शेषेऽर्थेऽण् स्यात् । सांवत्सरं फलं पर्व वा ॥२८॥

प्रावृष एण्यः ।६।३।९२॥

अस्माच्छेषेऽर्थे एण्यः स्यात् । प्रावृषेण्यः ॥२९॥

तत्र कृत-लब्ध-क्रीत-सम्भूते ।६।३।९४॥

तत्रेति सप्तम्यन्तादेष्वर्थेषु यथायोगमणादय एयणादयश्च स्युः । स्रौघ्नः, औत्सः, बाह्यः, नादेयः, राष्ट्रियः ॥३०॥

कुशले ।६।३।९५॥

सप्तम्यन्तात् कुशलेऽर्थे यथाविहितमणेयणादयः स्युः । माथुरः, नादेयः ॥३१॥

जाते ।६।३।९८॥

सप्तम्यन्ताज्जातेऽर्थे यथाविहितमणेयणादयः स्युः । माथुरः, औत्सः, बाह्यः, नादेयः, राष्ट्रियः ॥३२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रावृष इकः ।६।३।९९॥

अस्मात् सप्तम्यन्ताज्जाते इकः स्यात् । प्रावृषिकः ॥३३॥

पूर्वाह्ण-ऽपराह्ण-ऽऽर्द्रा-मूल-प्रदोषा-ऽवस्करादकः ।६।३।१०२॥

एभ्यः सप्तम्यन्तेभ्यो जातेऽको नाम्नि स्यात् । पूर्वाह्णकः, अपराह्णकः, आर्द्रकः, मूलकः, प्रदोषकः, अवस्करकः ॥३४॥

सोदर्य-समानोदर्यौ ।६।३।११२॥

एतौ जातेऽर्थे यान्तौ निपात्येते । सोदर्यः, समानोदर्यो भ्राता ॥३५॥

कालाद् देये ऋणे ।६।३।११३॥

सप्तम्यन्तात् कालार्थाद् देये ऋणेऽर्थे यथाविहितं प्रत्ययः स्यात् । मासिकमृणम् ॥३६॥

उप्ते ।६।३।११८॥

सप्तम्यन्तात् कालार्थादुप्तेऽर्थे यथाविहितं प्रत्ययः स्यात् । शारदा यवाः, हैमनाः ॥३७॥

व्याहरति मृगे ।६।३।१२१॥

सप्तम्यन्तात् कालार्थाद् व्याहरति मृगेऽर्थे यथाविहितं प्रत्ययः स्यात् । नैशिको नैशो वा शृगालः, प्रादोषिकः प्रादोषो वा । मृग इति किम् ? वसन्ते व्याहरति कोकिलः ॥३८॥

जयिनि च ।६।३।१२२॥

सप्तम्यन्तात् कालार्थाज्जयिन्यर्थे यथाविहितं प्रत्ययः स्यात् । निशाभवमध्ययनं निशा, तत्र जयी नैशिकः, नैशः, प्रादोषिकः, प्रादोषः, वार्षिकः ॥३९॥

भवे ।६।३।१२३॥

सप्तम्यन्ताद् भवेऽर्थे यथासंभवमणेयणादयः स्युः । स्रौघ्रः, औत्सः, नादेयः, ग्राम्यः ॥४०॥

दिगादिदेहांशाद् यः ।६।३।१२४॥

दिगादेर्देहावयवार्थाच्च सप्तम्यन्ताद् भवे यः स्यात् । दिश्यः, अप्सव्यः, मूर्धन्यः ॥४१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जिह्वामूला-ऽङ्गुलेश्चेयः ।६।३।१२७॥

आभ्यां सप्तम्यन्ताभ्यां मध्याच्च भवे ईयः स्यात् । जिह्वामूलीयः, अङ्गुलीयः, मध्यीयः ॥४२॥

वर्गान्तात् ।६।३।१२८॥

अस्मात् सप्तम्यन्ताद् भवे ईयः स्यात् । कवर्गीयो वर्णः ॥४३॥

ईन-यौ चाशब्दे ।६।३।१२९॥

वर्गान्तात् सप्तम्यन्ताद् भवे एतावीयश्च स्युः, न तु शब्दे । भरतवर्गीणः, भरतवर्ग्यः, भरतवर्गीयः । शब्दे तु कवर्गीयः ॥४४॥

शिक्षादेश्चाण् ।६।३।१४८॥

एभ्यो ग्रन्थार्थेभ्यः छन्दसश्च तस्य व्याख्याने तत्र भवे चाऽण् स्यात् । शैक्षः, आर्गयनः, छान्दसः ॥४५॥

तत आगते ।६।३।१४९॥

तत इति पञ्चम्यन्ताद् आगतेऽर्थे यथाविहितमण्-एयणादयः स्युः । स्रौघ्नः, गव्यः, नादेयः, ग्राम्यः ॥४६॥

विद्या-योनिसम्बन्धादकञ् ।६।३।१५०॥

विद्याकृतो योनिकृतश्च सम्बन्धो येषां तदर्थात् पञ्चम्यन्तादागतेऽर्थेऽकञ् स्यात् । आचार्यकम्, पैतामहकम् ॥४७॥

पितुर्यो वा ।६।३।१५१॥

पितुर्योनिसम्बन्धार्थात् पञ्चम्यन्तादागतेऽर्थे यो वा स्यात् । पित्र्यम्, पैतृकम् ॥४८॥

प्रभवति ।६।३।१५७॥

पञ्चम्यन्तात् प्रागुपलभ्ये यथाविहितं प्रत्ययाः स्युः । हैमवती गङ्गा ॥४९॥

वैडूर्यः ।६।३।१५८॥

विडूरात् ततः प्रभवति ञ्यः स्यात् । वैडूर्यो मणिः ॥५०॥

त्यदादेर्मयट् ।६।३।१५९॥

एभ्यस्ततः प्रभवति मयट् स्यात् । तन्मयम्, भवन्मयी ॥५१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तस्येदम् ।६।३।१६०॥

तस्येति षष्ठ्यन्ताद् इदमित्यर्थे यथाविहितं प्रत्ययाः स्युः । माथुरम्, दैत्यम्, कालेयम्, नादेयम्, पारीणः, भानवीयः ॥५२॥

नटान्नृत्ते ञ्यः ।६।३।१६५॥

नटात् तस्येदमर्थे नृत्ते ञ्यः स्यात् । नाट्यम् ॥५३॥

रथात् सादेश्च वोढ्रङ्गे++ ।६।३।१७५॥

रथात् केवलात् सपूर्वाच्च तस्येदमित्यर्थे रथस्य वोढरि अङ्गे एव च प्रत्ययः स्यात् । रथ्योऽश्वः, रथ्यं चक्रम्, द्विरथोऽश्वः, आश्वरथं चक्रम् ॥५४॥

यः ।६।३।१७६॥

रथात् केवलात् सादेश्च तस्येदमित्यर्थे यः स्यात् । रथ्यः, द्विरथः ॥५५॥

तेन प्रोक्ते ।६।३।१८१॥

तेनेति टान्तात् प्रोक्ते यथाविहितं प्रत्ययाः स्युः । भाद्रबाहवं शास्त्रम्, पाणिनीयम्, बार्हस्पत्यम् ॥५६॥

उपज्ञाते ।६।३।१९१॥

प्रागुपदेशाद् विना वा ज्ञाते टान्ताद् यथाविहितं प्रत्ययः स्यात् । पाणिनीयं शास्त्रम् ॥५७॥

कृते ।६।३।१९२॥

टान्तात् कृतेऽर्थे यथाविहितं प्रत्ययाः स्युः । शैवो ग्रन्थः, सिद्धसेनीयः स्तवः ॥५८॥

अमोऽधिकृत्य ग्रन्थे ।६।३।१९८॥

द्वितीयान्तादधिकृत्य कृते ग्रन्थे यथाविहितं प्रत्ययः स्यात् । भाद्रः ॥५९॥

भजति ।६।३।२०४॥

अमो भजत्यर्थे यथोक्तं प्रत्ययः स्यात् । स्रौघ्नः, राष्ट्रियः ॥६०॥

षष्ठस्य तृतीयः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[षष्ठाध्याये चतुर्थः पादः]

इकण् ।६।४।१॥

आ पादान्ताद् यदनुक्तं स्यात् तत्राऽयमधिकृतो ज्ञेयः ॥१॥

तेन जित-जयद्-दीव्यत्-खनत्सु ।६।४।२॥

तेनेति टान्तादेष्वर्थेष्विकण् स्यात् । आक्षिकम्, आक्षिकः, आभ्रिकः ॥२॥

संस्कृते ।६।४।३॥

टान्तात् संस्कृते इकण् स्यात् । दाधिकम्, वैद्यिकः ॥३॥

संसृष्टे ।६।४।५॥

टान्तात् संसृष्टेऽर्थे इकण् स्यात् । दाधिकम् ॥४॥

तरति ।६।४।९॥

टान्तात् तरत्यर्थे इकण् स्यात् । औडुपिकः ॥५॥

नौ-द्विस्वरादिकः ।६।४।१०॥

नावो द्विस्वराच्च टान्तात् तरत्यर्थे इकः स्यात् । नाविका, बाहुका ॥६॥

चरति ।६।४।११॥

टान्ताच्चरतीकण् स्यात् । हास्तिकम्, दाधिकः ॥७॥

ओजस्-सहो-ऽम्भसो वर्तते ।६।४।२७॥

एभ्यष्टान्तेभ्यो वर्तते इत्यर्थे इकण् स्यात्। औजसिकः, साहसिकः, आम्भसिकः ॥८॥

तं प्रत्यनोर्लोमेप-कूलात् ।६।४।२८॥

तमिति द्वितीयान्तात् प्रत्यनुपूर्वलोमेपकूलान्ताद् वर्तते इत्यर्थे इकण् स्यात् । प्रातिलोमिकः, आनुलोमिकः, प्रातीपिकः, आन्वीपिकः, आनुकूलिकः ॥९॥

परदारादिभ्यो गच्छति ।६।४।३८॥

एभ्यो द्वितीयान्तेभ्यो गच्छत्यर्थे इकण् स्यात्। पारदारिकः, गौरुदारिकः ॥१०॥

सुस्नातादिभ्यः पृच्छति ।६।४।४२॥

एभ्यो द्वितीयान्तेभ्यः पृच्छत्यर्थे इकण् स्यात् । सौस्नातिकः, सौखरात्रिकः ॥११॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रभूतादिभ्यो ब्रुवति ।।६।४।४३।।

एभ्यो द्वितीयान्तेभ्यो ब्रुवत्यर्थे इकण् स्यात् । प्राभूतिकः, पार्यासिकः ।।१२।।

समूहार्थात् समवेते ।६।४।४६।।

अस्माद् द्वितीयान्तात् समवेते[ऽर्थे इकण् स्यात् । सामूहिकः, सामाजिकः ।।१३।।

पर्षदो ण्यः ।६।४।४७।।

अस्माद् द्वितीयान्तात् समवेते ण्यः स्यात् । पार्षद्यः ।।१४।।

सेनाया वा ।६।४।४८।।

अस्माद् द्वितीयान्तात् समवेते] ण्यो वा स्यात् । सैन्यः, सैनिकः ।।१५।।

धर्मा-ऽधर्माच्चरति ।६।४।४९।।

आभ्यां द्वितीयान्ताभ्यां चरत्यर्थे इकण् स्यात् । धार्मिकः, आधर्मिकः ।।१६।।

षष्ठ्या धर्म्ये ।६।४।५०।।

षष्ठ्यन्ताद् धर्मादनपेते इकण् स्यात् । शौल्कशालिकम् ।।१७।।

ऋन्नरादेरण् ।६।४।५१।।

ऋदन्तान्नरादेश्च षष्ठ्यन्ताद् धर्म्येऽर्थेऽण् स्यात् । नारम्, नरस्य धर्म्यं नारम्, माहिषम् ।।१८।।

तदस्य पण्यम् ।६।४।५४।।

तदिति प्रथमान्ताद् विक्रेयार्थाद् अस्येति षष्ठ्यर्थे इकण् स्यात् । आपूपिकः ।।१९।।

शिल्पम् ।६।४।५७।।

प्रथमान्तादस्येत्यर्थे इकण् स्यात्, तच्छिल्पं चेत् । नार्त्तिकः ।।२०।।

प्रहरणम् ।६।४।६२।।

प्रथमान्तात् षष्ठ्यर्थे इकण् स्यात्, तत् प्रहरणं चेत् । आसिकः ।।२१।।

तत्र नियुक्ते ।६।४।७४।।

तत्रेति सप्तम्यन्ताद् नियुक्तेऽर्थे इकण् स्यात् । शौल्कशालिकः ।।२२।।

संख्यादेश्चाऽऽर्हदलुचः ।६।४।८०।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अर्हदर्थमभिव्याप्य या प्रकृतिर्वक्ष्यते तस्याः केवलायाः संख्यापूर्वायाश्च वक्ष्यमाणः प्रत्ययः स्यादिति ज्ञेयम्, न चेत् सा लुगन्ता । चान्द्रायणिकः, द्वैचन्द्रायणिकः । *चन्द्रायणं चरति* [६।४।८२] इति इकण् । अलुच इति किम् ? द्विशूर्पेण क्रीतं द्विशौर्पिकम् ॥२३॥

त्रिंशद्-विंशतेर्डकोऽसंज्ञायामाऽर्हदर्थे ।६।४।१२९॥

आभ्यामा अर्हदर्थाद् योऽर्थो वक्ष्यते तस्मिन् डकः स्यात्, असंज्ञाविषये । त्रिंशकम्, त्रिंशकः, विंशकम्, विंशकः । असंज्ञायामिति किम् ? त्रिंशत्कम् ॥२४॥

सङ्ख्या-डतेश्चाऽशत्-ति-ष्टेः कः ।६।४।१३०॥

शदन्त-त्यन्त-ष्टयन्तवर्जसंख्याया डत्यन्तात् त्रिंशद्विंशतिभ्यां चाऽऽर्हदर्थे कः स्यात् । द्विकम्, कतिकम्, त्रिंशत्कम्, विंशतिकम् । अशत्तिष्टेरिति किम् ? चात्वारिंशत्कम्, साप्ततिकम्, षाष्टिकम् ॥२५॥

शूर्पाद् वाऽञ् ।६।४।१३७॥

आऽर्हदर्थेऽञ्वा स्यात् । शौर्पम्, शौर्पिकम् ॥२६॥

विंशतिकात् ।६।४।१३९॥

आऽर्हदर्थेऽञ् स्यात् । वैंशतिकम् ॥२७॥

द्विगोरीनः ।६।४।१४०॥

विंशतिकान्ताद् द्विगोराऽर्हदर्थे ईनः स्यात् । द्विविंशतिकीनम् ॥२८॥

अनाम्न्यद्विः प्लुप् ।६।४।१४१॥

द्विगोराऽर्हदर्थे जातस्य प्रत्ययस्य पित् लुप् स्यात्, न तु द्विः अनाम्नि । द्विकंसम् । अनाम्नीति किम् ? पाञ्चलोहित(तिक)म् । अद्विरिति किम् ? द्विशूर्पेण क्रीतं द्विशौर्पिकम् ॥२९॥

मूल्यैः क्रीते ।६।४।१५०॥

मूल्यार्थाट्टान्तात् क्रीतेऽर्थे यथोक्तं प्रत्ययाः स्युः । प्रास्थिकम्, त्रिंशकम् ॥३०॥

तस्य वापे ।६।४।१५१॥

तस्येति षष्ठ्यन्ताद् वापेऽर्थे यथोक्तं प्रत्ययाः स्युः । प्रास्थिकम् ॥३१॥

तमर्हति ।६।४।१७७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तमिति द्वितीयान्तादर्हत्यर्थे यथोक्तं प्रत्ययः स्यात् । वैषिकः ॥३२॥

दण्डादेर्यः ।६।४।१७८॥

एभ्यो द्वितीयान्तेभ्योऽर्हत्यर्थे यः स्यात् । दण्ड्यः, अर्घ्यः ॥३३॥

इत्याचार्यश्रीहेमचन्द्रविरचितायां **स्वोपज्ञसिद्धहेमचन्द्र**शब्दानुशासनरहस्यवृत्तौ षष्ठस्य चतुर्थः ॥

षष्ठोऽध्यायः समाप्तः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[अथ सप्तमोऽध्यायः] [प्रथमः पादः]

यः ।७।१।१।।

यदित ऊर्ध्वमनुक्रमिष्यामस्तत्र ईयादवां(वा ?)ग् [य] इत्यधिकृतं ज्ञेयम् ।।१।।

नौ-विषेण तार्य-वध्ये ।७।१।१२।।

आभ्यां निर्देशाट्टान्ताभ्यां यथासङ्ख्यं तार्ये वध्ये चार्थे यः स्यात् । नाव्या नदी, विष्यो गजः ।।२।।

न्याया-ऽर्थादनपेते ।७।१।१३।।

आभ्यां पञ्चम्यन्ताभ्यामनपेतेऽर्थे यः स्यात् । न्याय्यम्, अर्थ्यम् ।।३।।

तत्र साधौ ।७।१।१५।।

तत्रेति ङ्यन्तात् साधावर्थे यः स्यात् । सभ्यः ।।४।।

पथ्यतिथि-वसति-स्वपतेरेयण् ।७।१।१६।।

एभ्यस्तत्र साधावेयण् स्यात् । पाथेयम्, आतिथेयम्, वासतेयम्, स्वापतेयम् ।।५।।

पर्षदो ण्य-णौ ।७।१।१८।।

तत्र साधौ स्याताम् । पार्षद्यः, पार्षदः ।।६।।

सर्वजनाण्ण्येनञौ ।७।१।१९।।

तत्र साधौ स्याताम् । सार्वजन्यः, सार्वजनीनः ।।७।।

सादेश्चा तदः ।७।१।२५।।

तस्यार्हे [७।१।५१] इत्यत्र 'तत्'शब्दादर्वाग् केवलात् सादेश्च वक्ष्यमाणो विधिर्ज्ञेयः ।।८।।

ईयः ।७।१।२८।।

आ तदो वक्ष्यमाणार्थेषु ईयोऽधिकृतो ज्ञेयः ।।९।।

उवर्ण-युगादेर्यः ।७।१।३०।।

उवर्णान्ताद् युगादेश्चाऽऽतदोऽर्थेषु यः स्यात् । शङ्क्व्यं दारु, युग्यम्, हविष्यम् ।।१०।।

तस्मै हिते ।७।१।३५।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तस्मै इति चतुर्थ्यन्तात् हितेऽर्थे यथाधिकृतं प्रत्ययः स्यात् । वत्सीयः, आमिक्ष्यः, आमिक्षीयः, युग्यः ॥११॥

भोगोत्तरपदा-ऽऽत्मभ्यामीनः ।७।१।४०॥

भोग उत्तरपदं यस्य तस्माद् आत्मनश्च तस्मै हिते ईनः स्यात् । मातृभोगीणः, आत्मनीनः ॥१२॥

पञ्च-सर्व-विश्वाज्जनात् कर्मधारये ।७।१।४१॥

पञ्चादेः पराज्जनात् कर्मधारयवृत्तेः तस्मै हिते ईनः स्यात् । पञ्चजनीनः, सर्वजनीनः, विश्वजनीनः । कर्मधारय इति किम् ? पञ्चानां जनाय हितः पञ्चजनीयः ॥१३॥

परिणामिनि तदर्थे ।७।१।४४॥

चतुर्थ्यन्ताच्चतुर्थ्यन्तार्थार्थे परिणामिनि हेतावर्थे यथा[धि]कृतं प्रत्ययः स्यात् । अङ्गारीयाणि काष्ठानि, शङ्क्व्यं दारु ॥१४॥

तस्याऽर्हे क्रियायां वत् ।७।१।५१॥

तस्येति षष्ठचन्तात् क्रियारूपे[ऽर्हे]ऽर्थे वत् स्यात् । राजवद् वृत्तं राज्ञः । क्रियायामिति किम् ? राज्ञोऽर्हो मणिः ॥१५॥

स्यादेरिवे ।७।१।५२॥

स्याद्यन्तादिवार्थे सादृश्ये क्रियार्थे वत् स्यात् । अश्ववद् याति चैत्रः, देववत् पश्यन्ति मुनिम् ॥१६॥

तत्र ।७।१।५३॥

तत्रेति सप्तम्यन्तादिवार्थे वत् स्यात् । सुघ्नवत् साकेते परिखा ॥१७॥

तस्य ।७।१।५४॥

तस्येति षष्ठचन्तादिवार्थे वत् स्यात् । चैत्रवद् मैत्रस्य भूः ॥१८॥

भावे त्व-तल् ।७।१।५५॥

षष्ठचन्ताद् भावे एतौ स्याताम्, शब्दप्रवृत्तिहेतुर्गुणो भावः । गोत्वम्, गोता ; शुक्लत्वम्, शुक्लता ॥१९॥

पृथ्वादेरिमन् वा ।७।१।५८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एभ्यो भावे वा इमन् स्यात् । प्रथिमा, पृथुत्वम्, पृथुता, पार्थवम् ; म्रदिमा, मृदुत्वम्, मृदुता, मार्दवम् ॥२०॥

वर्ण-दृढादिभ्यष्ट्यण् च वा ।७।१।५९॥

वर्णविशेषार्थेभ्यो दृढादेश्च तस्य भावे ट्यण् इमन् च वा स्यात् । शौक्ल्यम्, शुक्लिमा, [शुक्लत्वम्,] शुक्लता ; शैत्यम्, शितिमा, शितित्वम्, शितिता, शैतम् ; दार्ढ्यम्, द्रढिमा, दृढत्वम्, दृढता ; वैमत्यम्, विमतिमा, विमतित्वम्, विमतिता, वैमतम् ॥२१॥

पति-राजान्त-गुणाङ्ग-राजादिभ्यः कर्मणि च ।७।१।६०॥

पत्यन्तराजान्तेभ्यो गुणोऽङ्गं प्रवृत्तौ हेतुर्येषां तेभ्यो राजादेश्च तस्य भावे क्रियायां च ट्यण् स्यात् । आधिपत्यम्, अधिपतित्वम्, अधिपतिता ; आधिराज्यम्, अधिराजत्वम्, अधिराजता ; मौढ्यम्, मूढत्वम्, मूढता ; राज्यम्, राजत्वम्, राजता ; काव्यम्, कवित्वम्, कविता ॥२२॥

तदस्य सञ्जातं तारकादिभ्य इतः ।७।१।१३८॥

तदिति स्यन्तेभ्य एभ्योऽस्येति षष्ठ्यर्थे इतः स्यात्, स्यन्तं सञ्जातं चेत् । तारकितं नभः, पुष्पितस्तरुः ॥२३॥

प्रमाणान्मात्रट् ।७।१।१४०॥

त[दिति] स्यन्तात् प्रमाणार्थात् षष्ठ्यर्थे मात्रट् स्यात् । आयामः प्रमाणम् । जानुमात्रं जलम्, तन्मात्री भूः ॥२४॥

वोर्ध्वं दघ्नट् द्वयसट् ।७।१।१४२॥

ऊर्ध्वं यत् प्रमाणं तदर्थात् स्यन्तात् षष्ठ्यर्थे वैतौ स्याताम् । ऊरुदघ्नम्, ऊरुद्वयसम्, ऊरुमात्रं जलम् । ऊर्ध्वमिति किम् ? रज्जुमात्री भूः ॥२५॥

मानादसंशये लुप् ।७।१।१४३॥

मानार्थ एव साक्षाद् यः प्रमाणशब्दो हस्त-वितस्त्यादिर्न तु रज्ज्वादिः, तस्मात् प्रस्तुतस्य मात्रडादेरसंशये गम्ये लुप् स्यात् । हस्तः, वितस्तिः । मानादिति किम् ? ऊरुमात्रं जलम् । असंशय इति किम् ? शममात्रं स्यात् ॥२६॥

यत्-तत्-किमः सङ्ख्याया डतिर्वा ।७।१।१५०॥

संख्यारूपं यन्मानं तदर्थेभ्य एभ्यः स्यन्तेभ्यः षष्ठ्यर्थे संख्येये डतिर्वा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्यात् । यति, तति, कति ॥२७॥

अवयवात् तयट् ।७।१।१५१॥

अवयववृत्तेः संख्यार्थात् स्यन्तात् षष्ठ्यर्थेऽवयविनि तयट् स्यात् । पञ्चतयो यमः ॥२८॥

द्वि-त्रिभ्यामयड् वा ।७।१।१५२॥

आभ्यामवयवार्थाभ्यां स्यन्ताभ्यां षष्ठ्यर्थेऽयड् वा स्यात् । द्वयम्, त्रयम्, द्वितयम्, त्रितयम् ॥२९॥

सङ्ख्यापूरणे डट् ।७।१।१५५॥

संख्या पूर्यते येन तत्रार्थे संख्याया डट् स्यात् । एकादशी । संख्येति किम् ? एकादशानामुष्ट्रिकाणां पूरणो घटः ॥३०॥

विंशत्यादेर्वा तमट् ।७।१।१५६॥

अस्याः संख्यायाः संख्यापूरणे तमट् वा स्यात् । विंशतितमः, विंशः ; त्रिंशत्तमः, त्रिंशः ॥३१॥

षष्ट्यादेरसङ्ख्यादेः ।७।१।१५८॥

संख्या आदिरवयवो यस्य तद्भर्जात् षष्ट्यादेः संख्यापूरणे तमट् स्यात् । षष्टितमः, सप्ततितमः । [अ]संख्यादेरिति किम् ? एकषष्टः ॥३२॥

नो मट् ।७।१।१५९॥

असंख्यादेर्नान्तायाः संख्यायाः संख्यापूरणे मट् स्यात् । पञ्चमी । [अ]संख्यादेरित्येव, द्वादशः ॥३३॥

पित् तिथट् बहु-गण-पूग-संघात् ।७।१।१६०॥

एभ्यः संख्यापूरणे तिथट् स्यात् पित् । बहुतिथी, गणतिथः, पूगतिथः, सङ्घतिथः ॥३४॥

षट्-कति-कतिपयात् थट् ।७।१।१६२॥

एभ्यः संख्यापूरणे थट् स्यात् पित् । षष्ठी, कतिथः, कतिपयथी ॥३५॥

चतुरः ।७।१।१६३॥

अस्मात् संख्यापूरणे थट् स्यात् । चतुर्थी ॥३६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

येयौ च लुक् च ।७।१।१६४॥

चतुरः संख्यापूरणे एतौ स्याताम्, चस्य लुक् च । तुर्यः, तुरीयः ॥३७॥

द्वेस्तीयः ।७।१।१६५॥

द्वेः संख्यापूरणे तीयः स्यात् । द्वितीयः ॥३८॥

त्रेस्तृ च ।७।१।१६६॥

त्रेः संख्यापूरणे तीयः स्यात्, तद्योगे चास्य तृः । तृतीया ॥३९॥

पूर्वमनेन सादेश्चेन् ।७।१।१६७॥

पूर्वमित्यमन्तात् केवलात् सपूर्वाच्चाऽनेनेति टार्थे कर्त्तरि इन् स्यात् । पूर्वी कटम्, पीतपूर्वी पयः ॥४०॥

इष्टादेः ।७।१।१६८॥

एभ्योऽर्थात् स्यन्तेभ्यष्टार्थे कर्त्तरि इन् स्यात् । इष्टी यज्ञे, पूर्त्ती श्राद्धे ॥४१॥

इति सप्तमस्य प्रथमः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[सप्तमाध्याये द्वितीयः पादः]

तदस्याऽस्त्यस्मिन्निति मन्तुः ।७।२।१॥

तदिति स्यन्ताद्, **अस्येति** षष्ठ्यर्थेऽस्मिन्निति ङ्यर्थे वा मन्तुः स्यात्, चेत् स्यन्तमस्तीति । गोमान्, वृक्षवान् गिरिः । अस्तीति किम् ? गावोऽस्यासन् । **इतेः** प्रायो भूमादौ मत्वादयः ॥१॥

आ यात् ।७।२।२॥

रूपात् प्रशस्ताहतात् [७।२।५४] इति आ यविधेर्वक्ष्यमाणप्रकृतिभ्यो मन्तुः स्यात्, तदस्यास्ति तदस्मिन्नस्तीति विषये । कुमारीमान् ॥२॥

नावादेरिकः ।७।२।३॥

एभ्यो मन्त्वर्थे इकः स्यात् । नाविकः, नौमान् । एवं कुमारिकः ॥३॥

शिखादिभ्य इन् ।७।२।४॥

एभ्यो मन्त्वर्थे इन् स्यात् । शिखी, शिखावान् ; माली ॥४॥

व्रीह्यादिभ्यस्तौ ।७।२।५॥

एभ्यो मन्त्वर्थे इकेनौ स्याताम् । व्रीहिकः ॥५॥

अतोऽनेकस्वरात् ।७।२।६॥

अदन्तादनेकस्वराद् मन्त्वर्थे इकेनौ स्याताम् । दण्डिकः, दण्डी, दण्डिवान् ; छत्रिकः, छत्री । अनेकस्वरादिति किम् ? खवान् ॥६॥

हीनात् स्वाङ्गादः ।७।२।४५॥

हीनत्वोपाधेः स्वाङ्गार्थाद् मन्त्वर्थे अः स्यात् । कर्णः । हीनादिति किम् ? कर्णवान् ॥७॥

अभ्रादिभ्यः ।७।२।४६॥

एभ्यो मन्त्वर्थे अः स्यात् । अभ्रं नभः, अर्शसो मैत्रः ॥८॥

अस्-तपो-माया-मेधा-स्रजो विन् ।७।२।४७॥

असन्तात् तपसादेश्च मन्त्वर्थे विन् स्यात् । यशस्वी, यशस्वान् ; तपस्वी, मायावी, मेधावी, स्रग्वी ॥९॥

गुणादिभ्यो यः ।७।२।५३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एभ्यो मन्त्वर्थे यः स्यात्। गुण्यो ना, हिम्यो गिरिः, हिमवान् ॥१०॥

प्रकारे जातीयर् ।७।२।७५॥

स्यन्तात् षष्ठ्यर्थेऽयं स्यात्, चेत् स्यन्तं प्रकारार्थम्, सामान्यस्य विशेषो विशेषान्तरानुयायी प्रकारः। पटुजातीयः ॥११॥

भूतपूर्वे प्चरट् ।७।२।७८॥

भूतपूर्वार्थात् स्वार्थे प्चरट् स्यात्। आढ्यचरी ॥१२॥

व्याश्रये तसुः ।७।२।८१॥

अर्थात् षष्ठ्यन्ताद् नानापक्षाश्रये गम्ये तसुः स्यात्। देवा अर्जुनतोऽभवन्, रविः कर्णतोऽभवत् ॥१३॥

आद्यादिभ्यः ।७।२।८४॥

एभ्यः सम्भवा(व)त्स्याद्यन्तेभ्यस्तसुः स्यात्। आदितः, मध्यतः ॥१४॥

प्रतिना पञ्चम्याः ।७।२।८७॥

प्रतिना योगे *यतः प्रतिनिधिप्रतिदाने प्रतिना* [२।२।७२] इति जातपञ्चम्यन्तात् तसुर्वा स्यात्। अभिमन्युरर्जुनाद् अर्जुनतो वा प्रति ॥१५॥

अहीय-रुहोऽपादाने ।७।२।८८॥

अपादानपञ्चम्यन्तात् तसुर्वा स्यात्, न चेत् तद् हीय-रुहोः। ग्रामाद् ग्रामतो वैति। अहीय-रुह इति किम् ? सार्थाद् हीनः, गिरेरवरोहति ॥१६॥

किमद्व्यादिसर्वाद्यवैपुल्यबहोः पित् तस् ।७।२।८९॥

किमो द्व्यादिवर्जसर्वादिभ्योऽवैपुल्यार्थबहोश्च ङस्यन्तात् तस् पित् स्यात्। कुतः, सर्वतः, बहुतः। द्व्यादिवर्जनं किम् ? द्वाभ्याम्, त्वत्। अवैपुल्येति किम् ? बहोः सूपात् ॥१७॥

इतोऽतः कुतः ।७।२।९०॥

एते तसन्ता निपात्याः ॥१८॥

भवन्त्वायुष्मद्-दीर्घायुर्देवानांप्रियैकार्थात् ।७।२।९१॥

भवन्त्वाद्यैस्तुल्याधिकरणात् किमद्व्यादिसर्वाद्यवैपुल्यबहोः सर्वस्याद्यन्तात् पित्

१. "आद्यादिभ्यः सम्भवद्भिक्त्यन्तेभ्यः" इति तालपत्रोपरि लिखितायां बृहद्वृत्तौ पाठः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तस् [वा ?] स्यात् । स भवान्, ततो भवान् ; ते भवन्तः, ततो भवन्तः, स आयुष्मान्, तत आयुष्मान्, स दीर्घायुः, ततो दीर्घायुः ; तं देवानांप्रियम्, ततो देवानांप्रियम् ॥१९॥

त्रप् च ।७।२।९२॥

भवन्त्वाद्यैरेकार्थात् किमद्वयादिसर्वाद्यवैपुल्यबहोः सर्वस्याद्यन्तात् त्रप् तस् च [वा ?] स्यात्। स भवान्, तत्र भवान्, ततो भवि(व ?)ता। आयुष्मदादिनाऽप्येवम् ॥२०॥

क्व-कुत्रा-ऽत्रेह ।७।२।९३॥

एते त्रबन्ता निपात्याः ॥२१॥

सप्तम्याः ।७।२।९४॥

सप्तम्यन्तात् किमद्वयादिसर्वाद्यवैपुल्यबहोः त्रप् स्यात् । कुत्र, सर्वत्र, [तत्र,] बहुत्र ॥२२॥

किम्-यत्-तत्-सर्वैका-ऽन्यात् काले दा ।७।२।९५॥

एभ्यो ङ्यन्तेभ्यः कालेऽर्थे दाः स्यात् । कदा, यदा, तदा, सर्वदा, एकदा, अन्यदा ॥२३॥

सदा-ऽधुनेदानीं-तदानीमेतर्हि ।७।२।९६॥

एते कालेऽर्थे निपात्याः ॥२४॥

सद्यो-ऽद्य-परेद्यव्यह्नि ।७।२।९७॥

एतेऽह्नि काले निपात्याः ॥२५॥

पूर्वा-ऽपरा-ऽधरोत्तरा-ऽन्या-ऽन्यतरेतरादेद्युस् ।७।२।९८॥

एभ्यो ङ्यन्तेभ्योऽह्नि काले[ऽर्थे ए]द्युस् स्यात्। पूर्वेद्युः, [अपरेद्युः], अधरेद्युः, उत्तरेद्युः, अन्येद्युः, अन्यतरेद्युः, [इतरेद्युः] ॥२६॥

उभयाद् द्युस् च ।७।२।९९॥

अतोऽह्नयर्थे द्युसेद्युसौ स्याताम् । उभयद्युः, उभयेद्युः ॥२७॥

ऐषमः-परुत्-परारि वर्षे ।७।२।१००॥

एते वत्सरेऽर्थे निपात्याः ॥२८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अनद्यतने र्हिः ।७।२।१०१॥

ड्यन्तादनद्यतनकालार्थाद् यथासम्भवं किमद्ब्यादिसर्वाद्यवैपुल्यबहोः र्हिः स्यात् । कर्हि, यर्हि, अमुर्हि, बहुर्हि ॥२९॥

प्रकारे था ।७।२।१०२॥

प्रकारार्थात् सम्भवा(व)त्स्याद्यन्तात् किमद्ब्यादिसर्वाद्यवैपुल्यबहोः था स्यात् । सर्वथा, अन्यथा ॥३०॥

कथमित्थम् ।७।२।१०३॥

एतौ प्रकारे निपात्यौ ॥३१॥

सङ्ख्याया धा ।७।२।१०४॥

सङ्ख्यार्थात् प्रकारवृत्तेर्धा स्यात् । एकधा, कतिधा ॥३२॥

वारे कृत्वस् ।७।२।१०९॥

वारवृत्तेः संख्यार्थाद् वारवति धात्वर्थे कृत्वस् स्यात् । पञ्चकृत्वो भुङ्क्ते ॥३३॥

द्वि-त्रि-चतुरः सुच् ।७।२।११०॥

एभ्यो वारार्थेभ्यस्तद्वति सुच् स्यात् । द्विः, त्रिः, चतुर्भुङ्क्ते ॥३४॥

एकात् सकृच्चास्य ।७।२।१११॥

अस्माद् वारार्थात् तद्वति सुच् स्यात्, सकृच्चाऽस्य । सकृद् भुङ्क्ते ॥३५॥

कृ-भ्वस्तिभ्यां कर्म-कर्तृभ्यां प्रागतत्तत्त्वे च्विः ।७।२।१२६॥

कर्मार्थात् कृगा योगे, कर्त्रर्थाच्च भ्वस्तियोगे प्रागभूततद्भावे गम्ये च्विः स्यात् । शुक्लीकरोति पटम्, शुक्लीभवति, शुक्लीस्यात् पटः । प्रागिति किम् ? अशुक्लं शुक्लं करोत्येकदा ॥३६॥

व्याप्तौ स्सात् ।७।२।१३०॥

कृ-भ्वस्तिभ्यां कर्म-कर्तृभ्यां प्रागतत्तत्त्व इति विषये सादिः सात् स्यात्, व्याप्तौ प्रागत[त्त]त्त्वस्य सर्वात्मना द्रव्येण सम्बन्धे गम्ये । अग्निसात् करोति काष्ठं, अग्निसाद्भवति, अग्निसात् स्यात् ॥३७॥

तत्राऽधीने ।७।२।१३२॥

---

१. °र्धा वा स्यात् Jमू० ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्रेति ङ्यन्ताद् आयत्तेऽर्थे कृ-भ्वस्ति-योगे स्सात् स्यात्। [राजसात् करोति,] राजसाद् भवति, राजसात् स्यात्, भ्वस्तिभ्यां सम्पदेरुपलक्षणात् राजसात् सम्पद्यते ॥३८॥

देये त्रा च ।७।२।१३३॥

ङ्यन्ताद् देये आयत्तेऽर्थे कृ-भ्वस्ति-सम्पद्योगे त्राः स्यात् । देवत्रा करोति द्रव्यम्, देवत्रा भवेत्, स्यात्, सम्पद्यते वा । देय इति किम् ? राजसाद् भवति, राजसात् स्याद् राष्ट्रम् ॥३९॥

तीय-शम्ब-बीजात् कृगा कृषौ डाच् ।७।२।१३५॥

तीयान्ताच्छम्ब-बीजाभ्यां च कृग्योगे कृषिविषये डाच् स्यात्। द्वितीया करोति, शम्बा करोति, बीजा करोति क्षेत्रम् । कृषाविति किम् ? द्वितीयं पटं करोति ॥४०॥

अव्यक्तानुकरणादनेकस्वरात् कृ-भ्वस्तिनाऽनितौ द्विश्च ।७।२।१४५॥

यस्मिन् ध्वनौ वर्णा विशेषरूपेण नाभिव्यज्यन्ते सोऽव्यक्तः, तदनुकरणार्थादनेकस्वराद् अनितिपरात् कृ-भ्वस्तियोगे डाच् वा स्यात्, द्विश्चास्य प्रकृतिः । पटपटा करोति, भवेत्, स्याद् वा । अनेकस्वरादिति किम् ? खाट् करोति । अनिताविति किम् ? पटिति करोति ॥४१॥

इतावतो लुक् ।७।२।१४६॥

अव्यक्तानुकरणस्यानेकस्वरस्य योऽदिति [तस्येति]शब्दे लुक् स्यात् । पटिति ॥४२॥

तो वा ।७।२।१४८॥

द्वित्वेऽव्यक्तानुकरणस्यानेकस्वरस्यातस्तो लुग् वा स्यात् । पटत्पटेति करोति, पटत्पटदिति वा ॥४३॥

डाच्यादौ ।७।२।१४९॥

अव्यक्तानुकरणस्यानेकस्वरस्याच्छब्दान्तस्य द्वित्वे सति आद्य[त]स्तो डाचि लुक् स्यात् । पटपटा करोति । आदाविति किम् ? पतपता करोति ॥४४॥

बह्वल्पार्थात् कारकादिष्टा-ऽनिष्टे प्सास् ।७।२।१५०॥

बह्वल्पार्थाभ्यां कारकवाचिभ्यां यथासंख्यमिष्टेऽनिष्टे च विषये प्सस् [वा]

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्यात्, इष्टं प्राशित्रादि, +अनिष्टं श्राद्धादि । ग्रामे बहुशो ददति, एवं भूरिशः, अल्पमल्पशो वा धनं दत्ते श्राद्धे, एवं स्तोकशः । इष्टानिष्ट इति किम् ? बहु दत्ते श्राद्धे, अल्पं प्राशित्रे ॥४५॥

तीयाट्टीकण् न विद्या चेत् ।७।२।१५३॥

तीयान्तादविद्यार्थात् स्वार्थे टीकण् वा स्यात् । द्वितीयम्, द्वैतीयीकम् । विद्या तु द्वितीया ॥४६॥

प्रायोऽन्तोर्द्वयसट्-मात्रट् ।७।२।१५५॥

अन्त्वन्तात् स्वार्थे एतौ स्याताम्, यावल्लक्ष्यम् । यावद्द्वयसम्, यावन्मात्रम् ॥४७॥

वर्णा-ऽव्ययात् स्वरूपे कारः ।७।२।१५६॥

एभ्यः स्वरूपार्थेभ्यः कारो वा स्यात् । अकारः, ॐकारः । स्वरूप इति किम् ? अः विष्णुः ॥४८॥

रादेफः ।७।२।१५७॥

वा स्यात् । रेफः । प्रायोऽधिकाराद् रकारः ॥४९॥

नाम-रूप-भागाद् धेयः ।७।२।१५८॥

एभ्यः स्वार्थे धेयो वा स्यात् । नामधेयम्, रूपधेयम्, भागधेयम् ॥५०॥

मर्तादिभ्यो यः ।७।२।१५९॥

मर्त्यः, सूर्यः ॥५१॥

नवादीन-तन-त्नं च नू चास्य ।७।२।१६०॥

नवात् स्वार्थे एते यश्च वा स्युः, तद्योगे च नवस्य नूः । नवीनम्, नूतनम्, नूत्नम्, नव्यम् ॥५२॥

प्रात् पुराणे नश्च ।७।२।१६१॥

पुराणार्थात् प्रात् [न] ईन-तन-त्नाश्च स्युः । प्रणम्, [प्रीणम्,] प्रतनम्, प्रत्नं पुराणम् ॥५३॥

देवात् तल् ।७।२।१६२॥

स्वार्थे वा स्यात् । देवता ॥५४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

होत्राया ईयः ।७।२।१६३॥

स्वार्थे वा स्यात् । होत्रीयम् ॥५५॥

भेषजादिभ्यष्ट्यण् ।७।२।१६४॥

स्वार्थे वा स्यात् । भैषज्यम्, आनन्त्यम् ॥५६॥

विनयादिभ्यः ।७।२।१६९॥

स्वार्थे इकण् वा स्यात् । वैनयिकम्, सामयिकम् ॥५७॥

उपायाद्ध्रस्वश्च ।७।२।१७०॥

स्वार्थे इकण् वा स्यात्, तद्योगे च ह्रस्वः । औपयिकम् ॥५८॥

इति सप्तमस्याध्यायस्य द्वितीयः पादः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[सप्तमाध्याये तृतीयः पादः]

प्रकृते मयट् ।७।३।१॥

प्राचुर्येण प्राधान्येन वा कृतं प्रकृतम्, तदर्थात् स्वार्थे मयट् स्यात्। अन्नमयम्, पूजामयम् ॥१॥

अस्मिन् ।७।३।२॥

प्रकृतार्थादस्मिन्निति विषये मयट् स्यात्। अपूपमयं पर्व ॥२॥

तयोः समूहवच्च बहुषु ।७।३।३॥

प्रकृतेऽस्मिन्निति च विषययोर्बह्वर्थात् समूह इव प्रत्ययः स्यात्, मयट् च। अ(आ)पूपिकम्, अपूपमयम्, अपूपास्तत्पर्व वा ॥३॥

निन्द्ये पाशप् ।७।३।४॥

निन्द्या[र्था]त् स्वार्थे पाशप् स्यात्। छान्दसपाशः ॥४॥

प्रकृष्टे तमप् ।७।३।५॥

प्रकृष्टार्थात् तमप् स्यात्। शुक्लतमः, कारकतमः ॥५॥

द्वयोर्विभज्ये च तरप् ।७।३।६॥

द्वयोर्मध्ये प्रकृष्टे विभज्ये च प्रकृष्टे वर्त्तमानात् तरप् स्यात्। पटुतरा स्त्री, साङ्काश्यकेभ्यः पाटलिपुत्रका आढ्यतराः ॥६॥

क्वचित् स्वार्थे ।७।३।७॥

यथालक्ष्यं स्वार्थेऽपि तरप् स्यात्। अभिन्नतरकम्, उच्चैस्तराम् ॥७॥

किं-त्याद्ये-ऽव्ययादसत्त्वे तयोरन्तस्याऽऽम् ।७।३।८॥

किमस्त्याद्यन्तादेदन्तादव्ययाच्च परयोस्तमप्-तरपोरन्तस्याऽऽम् स्यात्, न चेत् तौ **सत्त्वे** द्रव्ये वर्त्तेते। किन्तमाम्, किन्तराम् ; पचतितमाम्, पचतितराम् ; पूर्वाह्णेतरां भुङ्क्ते, पूर्वाह्णेतमाम्, अतितराम्, अतितमाम्। [अ]सत्त्व इति किम् ?++ किन्तरं दारु ॥८॥

गुणाङ्गाद् वेष्टेयसौ(सू) ।७।३।९॥

गुणप्रवृत्तिहेतुकात् तमप्-तरपोर्विषये यथासंख्यमेतौ वा स्याताम्। पटिष्ठः, पटुतमः ; गरीयान्, गुरुतरः ॥९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्यादेश्च प्रशस्ते रूपप् ।७।३।१०॥

त्याद्यन्ताद् नाम्नश्च प्रशस्तार्थाद् रूपप् स्यात् । पचतिरूपम्, दस्युरूपः ॥१०॥

अतमबादेरीषदसमाप्ते कल्पब्-देश्यब्-देशीयर् ।७।३।११॥

किञ्चिदसमाप्तार्थात् त्याद्यन्तात् नाम्नश्च तमबाद्यन्तवर्जादेते स्युः । पचतिकल्पम्, पचतिदेश्यम्, पचतिदेशीयम् ; पटुकल्पा, पटुदेश्या, पटुदेशीया ॥११॥

यावादिभ्यः कः ।७।३।१५॥

स्वार्थे स्यात् । यावकः, मणिकः ॥१२॥

एकादाकिन् चासहाये ।७।३।२७॥

असहा[या]र्थादेकाद् आकिन् कश्च स्यात् । एकाकी, एककः ॥१३॥

प्राग् नित्यात् कप् ।७।३।२८॥

नित्यशब्दसङ्कीर्त्तनात् प्राग् येऽर्थास्तेषु द्योत्येषु कप् अधिकृतो ज्ञेयः । कुत्सितोऽल्पोऽज्ञातो वाऽश्वः अश्वकः ॥१४॥

त्यादि-सर्वादेः स्वरेष्वन्त्यात् पूर्वोऽक् ।७।३।२९॥

त्याद्यन्तस्य, सर्वादेश्च स्वराणां मध्ये योऽन्त्यस्वरस्तस्मात् पूर्वोऽक् स्यात्, प्राग् नित्यात् । कुत्सितमल्पमज्ञातं वा पचति [पचतकि,] सर्वके, विश्वके ।१५॥

युष्मदस्मदोऽसोभादिस्यादेः ।७।३।३०॥

अनयोः स्-ओ-भादिवर्जस्याद्यन्तयोः स्वरेष्वन्त्यात् पूर्वोऽक् स्यात् । त्वयका, मयका । असोभादिस्यादेरिति किम् ? युष्मकासु, युवकयोः, युवकाभ्याम् ॥१६॥

अव्ययस्य को द् च ।७।३।३१॥

प्राग् नित्याद् येऽर्थास्तेषु द्योत्येष्वव्ययस्य [स्वरेष्वन्त्य]स्वरात् पूर्वोऽक् स्यात् तद्योगे चास्य को द् । कुत्सिताद्युच्चैः उच्चकैः, एवं धिक् धकिद् ॥१७॥

कुत्सिता-ऽल्पा-ऽज्ञाते ।७।३।३३॥

कुत्सिताद्युपाधिकार्थाद् यथायोगं कबादयः स्युः । [अश्वकः, पचतकि, उच्चकैः ॥१८॥

अनुकम्पा-तद्युक्तनीत्योः ।७।३।३४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अनुकम्पायां तद्युक्तायां च नीतौ गम्यायां यथायोगं कबादयः स्युः ।] पुत्रकः, स्वपिषकि, पुत्रक ! एहकि, उत्सङ्गके उपविश, कर्दमकेनाऽसि दिग्धकः ॥१९॥

वैकाद् द्वयोर्निर्धार्ये डतरः ।७।३।५२॥

एकाद् द्वयोः निर्धार्यार्थाद् डतरो वा स्यात् । एकतरः, एकको वा भवतोः कठः पटुर्गन्ता चैत्रो दण्डी वा ॥२०॥

यत्-तत्-किमन्यात् ।७।३।५३॥

एभ्यो द्वयोरेकस्मिन्निर्धार्ये[ऽर्थे] वर्त्तमानेभ्यो डतरः स्यात् । यतरो भवतोः कठादिस्ततर आगच्छेत्, एवं कतरः, अन्यतरः ॥२१॥

बहूनां प्रश्ने डतमश्च वा ।७।३।५४॥

यदादिभ्यो बहूनां मध्ये निर्धार्यार्थेभ्यः प्रश्ने डतमो डतरश्च वा स्यात् । यतमो यतरो वा भवतां कठस्ततमस्ततरो वा यातु, एवं कतमः, कतरः, अन्यतमः, अन्यतरः, पक्षे यको यो वा, सकः स वा भवतां कठ इत्यादि ॥२२॥

वैकात् ।७।३।५५॥

एकाद् बहूनां मध्ये निर्धार्यार्थात् डतमो वा स्यात् । एकतमः, एकः, एको वा भवतां कठः ॥२३॥

नित्यं ञ-ञिनोऽण् ।७।३।५८॥

ञ-ञिनन्तात् स्वार्थे नित्यमण् स्यात् । व्याघ्रक्रोशी, साङ्कोटिनम् ॥२४॥

समासान्तः ।७।३।६९॥

अतः परं विधास्यमानं समासस्यावयवः स्यात्, ततस्तस्य तत्तत्समाससंज्ञा । सुजम्भे, सुजम्भानौ स्त्रियौ, उपधुरम्, द्विधुरी, सक्त्वचिनी ॥२५॥

न किमः क्षेपे ।७।३।७०॥

निन्दार्थात् किमः परं यद् ऋगादिस्तदन्तात् समासात् समासान्तो न स्यात् । किंधूः, किंसखा । क्षेप इति किम् ? केषां राजा किंराजः ॥२६॥

पूजास्वतेः प्राक् टात् ।७।३।७२॥

पूजार्थस्वतिभ्यां परं यद् ऋगादि तदन्तात् टात् प्राग् यः समासान्तः स न स्यात् । सुधूः, अतिधूरियम् । पूजेति किम् ? अतिराजोऽरिः । प्राक् टादिति किम् ? स्वङ्गुलं काष्ठम् ॥२७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इज् युद्धे ।७।३।७४॥

युद्धे यः समास उक्तस्तस्मादिच् समासान्तः स्यात् । केशाकेशि ॥२८॥

ऋक्-पूः-पथ्यपोऽत् ।७।३।७६॥

ऋगाद्यन्तात् समासादः समासान्तः स्यात् । अर्धर्चः, त्रिपुरम्, जलपथः, द्वीपम् ॥२९॥

जात-महद्-वृद्धादुक्षः कर्मधारयात् ।७।३।९५॥

एभ्यः परो य उक्षा तदन्तात् कर्मधारयादत् स्यात् । जातोक्षः, महोक्षः, वृद्धोक्षः । कर्मधारयादिति किम् ? जातस्योक्षा जातोक्षा ॥३०॥

स्त्रियाः पुंसो द्वन्द्वाच्च ।७।३।९६॥

स्त्रियाः परो यः पुमान् तदन्तात् द्वन्द्वात् कर्मधारयाच्चाऽत् स्यात् । स्त्रीपुंसौ, स्त्रीपुंसः ॥३१॥

चवर्ग-द-ष-हः समाहारे ।७।३।९८॥

एतदन्ताद् द्वन्द्वात् समाहारार्थादत् स्यात्। वाक्त्वचम्, संपद्विपदम्, वाक्त्विषम्, छत्रोपानहम् । समाहार इति किम् ? प्रावृट्-शरद्भ्याम् ॥३२॥

द्विगोरन्नह्नोऽट् ।७।३।९९॥

अन्नन्तादहन्नन्ताच्च समाहारार्थाद् द्विगोरट् स्यात् । पञ्चतक्षी, पञ्चतक्षम्, द्व्यहः । द्विगोरिति किम् ? समहाः ॥३३॥

द्वि-त्रेरायुषः ।७।३।१००॥

आभ्यां परो य आयुस्तदन्तात् समाहारद्विगोरट् स्यात् । द्व्यायुषम्, त्र्यायुषम् ॥३४॥

वाऽञ्जलेरलुकः ।७।३।१०१॥

द्वित्रिभ्यां परो योऽञ्जलिस्तदन्ताद् द्विगोरट् वा स्यात्, न चेद् द्विगुस्तद्धितलुगन्तः । द्व्यञ्जलम्, द्व्यञ्जलि ; त्र्यञ्जलमयम्, त्र्यञ्जलिमयम् । अलुक इति किम् ? द्व्यञ्जलिर्घटः ॥३५॥

खार्या वा ।७।३।१०२॥

खार्यन्ताद् द्विगोरलुकोऽट् वा स्यात् । द्विखारम्, द्विखारि ; पञ्चखारधनः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पञ्चखारीधनः ॥३६॥

वाऽर्धाच्च ।७।३।१०३॥

अर्धशब्दात् परा या खारी तदन्तसमासादलुकोऽट् वा स्यात् । अर्धखारम्, अर्धखारी ॥३७॥

नावः ।७।३।१०४॥

अर्धात् परो यो नौस्तदन्तात् समासाद् द्विगोश्चाऽलुकोऽट् वा स्यात् । अर्धनावम्, अर्धनावी, पञ्चनावम् । अलुक इत्येव, द्विनौः ॥३८॥

गोस्तत्पुरुषात् ।७।३।१०५॥

गवन्तात् तत्पुरुषादलुकोऽट् स्यात् । राजगवी । तत्पुरुषादिति किम् ? चित्रगुः । अलुक इत्येव, पञ्चगुः पटः ॥३९॥

राजन्-सखेः ।७।३।१०६॥

एतदन्तात् तत्पुरुषादट् स्यात् । पञ्चराजी, राजसखः ॥४०॥

अह्नः ।७।३।११६॥

अहन्नन्तात् तत्पुरुषादट् स्यात् । परमाहः ॥४१॥

संख्यातादह्नश्च वा ।७।३।११७॥

सङ्ख्यातात् परो योऽहा तदन्तात् तत्पुरुषादट् स्यात्, अह्न[श्च] वाऽह्न[:] । सङ्ख्याताह्नः, सङ्ख्याताहः ॥४२॥

सर्वा-ऽश-संख्या-ऽव्ययात् ।७।३।११८॥

सर्वादंशार्थात् संख्यार्थादव्ययाच्च परो योऽहा तदन्तात् तत्पुरुषादट् स्यात्, अह्नश्चाह्नः । सर्वाह्नः, पूर्वाह्णः, द्व्यह्नः पटः, अत्यह्नी कथा ॥४३॥

नञव्ययात् संख्याया डः ।७।३।१२३॥

आभ्यां परो यः सङ्ख्यार्थस्तदन्तात् तत्पुरुषाद् डः स्यात् । अदशाः, निस्त्रिंशः खड्गः ॥४४॥

संख्या-ऽव्ययादङ्गुलेः ।७।३।१२४॥

आभ्यां परो योऽङ्गुलिस्तदन्तात् तत्पुरुषाद् डः स्यात् । द्व्यङ्गुलम्, निरङ्गुलम् ॥४५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बहुव्रीहेः काष्ठे टः ।७।३।१२५।।

काष्ठार्थादङ्गुल्यन्ताद् बहुव्रीहेः टः स्यात् । द्व्यङ्गुलं काष्ठम् । काष्ठ इति किम् ? पञ्चाङ्गुलिर्हस्तः ।।४६।।

प्रमाणी-संख्याड्डः ।७।३।१२८।।

प्रमाण्यन्तात् सङ्ख्यार्थाच्च बहुव्रीहेर्डः स्यात् । स्त्रीप्रमाणाः कुटुम्बिनः, द्वित्राः ।।४७।।

पूरणीभ्यस्तत्प्राधान्येऽप् ।७।३।१३०।।

पूरणप्रत्ययान्ता या स्त्री तदन्ताद् बहुव्रीहेरप् स्यात्, पूरण्याः प्राधान्ये समासार्थत्वे सति । कल्याणीपञ्चमा रात्रयः । तत्प्राधान्य इति किम् ? कल्याणपञ्चमीकः पक्षः ।।४८।।

सु-पूत्युत्-सुरभेर्गन्धादिद् गुणे ।७।३।१४४।।

एभ्यः परो गुणार्थो यो गन्धस्तदन्ताद् बहुव्रीहेरित् स्यात् । सुगन्धि, पूतिगन्धि, उद्गन्धि, सुरभिगन्धि द्रव्यम् । गुण इति किम् ? द्रव्ये सुगन्ध आपणिकः ।।४९।।

वोपमानात् ।७।३।१४७।।

उपमानात् परो यो गन्धस्तदन्ताद् बहुव्रीहेरिद् वा स्यात् । उत्पलगन्धि उत्पलगन्धं मुखम् ।।५०।।

पात् पादस्याऽहस्त्यादेः ।७।३।१४८।।

हस्त्यादिवर्जादुपमानात् परस्य पादस्य बहुव्रीहौ पात् स्यात् । व्याघ्रपात् । अहस्त्यादेरिति किम् ? हस्तिपादः, अश्वपादः ।।५१।।

सु-संख्यात् ।७।३।१५०।।

सोः संख्यायाश्च परस्य पादस्य बहुव्रीहौ पात् स्यात् । सुपात्, द्विपात् ।।५२।।

स्त्रियामूधसो न् ।७।३।१६९।।

स्त्र्यर्थस्योधसो बहुव्रीहौ न् स्यात् । कुण्डोध्नी गौः ।।५३।।

इनः कच् ।७।३।१७०।।

इन्नन्ताद् बहुव्रीहेः स्त्र्यर्थात् कच् स्यात् । बहुदण्डिका सेना ।।५४।।

ऋन्नित्यदितः ।७।३।१७१।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ऋदन्तात्, नित्यं दिदादेशो यस्मात् तदन्ताच्च बहुव्रीहेः कच् स्यात्। बहुकर्तृकः, बहुनदीको देशः। नित्येति किम् ? पृथुश्रीः ॥५५॥

शेषाद् वा ।७।३।१७५॥

उपयु(र्यु)क्तात् परस्माद् बहुव्रीहेः कच् वा स्यात्। बहुखट्वकः, बहुखट्वः। शेषादिति किम् ? प्रियपथः ॥५६॥

न नाम्नि ।७।३।१७६॥

नाम्नि विषये कच् न स्यात्। बहुदेवदत्तो नाम ग्रामः ॥५७॥

ईयंसोः ।७।३।१७७॥

ईयंस्वन्तात् समासात् कच् न स्यात्। बहुश्रेयसी सेना ॥५८॥

सप्तमस्य तृतीयः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[सप्तमाध्याये चतुर्थः पादः]

वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते ।७।४।१।।

ञिति णिति च तद्धिते परे प्रकृतेः स्वराणां मध्ये आद्यस्वरस्य वृद्धिः स्यात्। दाक्षिः, भार्गवः। तद्धित इति किम् ? चिकीर्षकः ।।१।।

य्वः पदान्तात् प्रागैदौत् ।७।४।२।।

पदान्ते वर्तमानाभ्यां यकारवकाराभ्यां प्राक् ञ्णिति तद्धिते यथासङ्ख्यमैदौतौ स्याताम्। नैयायिकः, सौवश्वः। पदान्तादिति किम् ? यत इमे याताः ।।२।।

द्वारादेः ।७।४।६।।

एषां यौ य्वौ तयोः समीपस्य स्वरेष्वादेः स्वरस्य वृद्धिप्राप्तौ ताभ्यामेव प्रागैदौतौ स्यातां ञ्णिति तद्धिते। दौवारिकः, सौवरो ग्रन्थः ।।३।।

न अ-स्वङ्गादेः ।७।४।९।।

आन्तस्य स्वङ्गादेश्च ञ्णिति तद्धिते य्वः प्रागैदौतौ न स्याताम्। व्यावक्रोशी, स्वाङ्गिः, व्याङ्गिः ।।४।।

विन्-मन्तोर्णिष्ठियंसौ लुप् ।७।४।३२।।

विन्मन्त्वोरेषु परेषु लुप् स्यात्। स्रजयति, स्रजिष्ठः, स्रजीयान्, त्वचयति, त्वचिष्ठः, त्वचीयान् ।।५।।

प्रशस्यस्य श्रः ।७।४।३४।।

अस्य ण्यादौ श्रः स्यात्। श्रयति, श्रेष्ठः, श्रेयान् ।।६।।

वृद्धस्य च ज्यः ।७।४।३५।।

अस्य प्रशस्यस्य च ण्यादौ ज्यः स्यात्। ज्यायति, ज्येष्ठः ।।७।।

प्रिय-स्थिर-स्फिरोरु-गुरु-बहुल-तृप्र-दीर्घ-वृद्ध-वृन्दारकस्येमनि च प्रा-स्था-स्फा-वर-गर-बंह-त्रप-द्राघ-वर्ष-वृन्दम् ।७।४।३८।।

प्रियादीनां यथासंभवमिमनि ण्यादौ च यथासंख्यमेते स्युः। प्रेमा, प्रापयति, प्रेष्ठः, प्रेयान् ; स्थेमा, स्थापयति, [स्थेष्ठः,] स्थेयान् ; स्फापयति, वरिमा, गरिमा, बंहिमा, त्रपिमा, द्राघिमा, [वर्षिमा,] वृन्दिमा ।।८।।

पृथु-मृदु-भृश-कृश-दृढ-परिवृढस्य ऋतो रः ।७।४।३९।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एषामृत इम्नि ण्यादौ च रः स्यात् । प्रथिमा, प्रथयति, प्रथिष्ठः, प्रथीयान् ; एवं म्रदिमा, भ्रशिमा, क्रशिमा, द्रढिमा, परिब्रढिमा ॥९॥

बहोर्णिष्ठे भूयू ।७।४।४०॥

भूययति, भूयिष्ठः ॥१०॥

भूर्लुक् चेवर्णस्य ।७।४।४१॥

बहोरीयंसाविम्नि च भूः स्यात्, लुक् चाऽनयोरिवर्णस्य । भूयान्, भूमा ॥११॥

त्रन्त्यस्वरादेः ।७।४।४३॥

तुरन्त्यस्वरादेश्चांशस्येम्नि ण्यादौ च लुक् स्यात् । करयति, करिष्ठः, करीयान् ; पटिमा, [पटयति,] पटिष्ठः, पटीयान् ॥१२॥

नैकस्वरस्य ।७।४।४४॥

एकस्वरस्य योऽन्त्यस्वरादिरंशः तस्येम्नि ण्यादौ च लुग् न स्यात् । स्रजयति, स्रजिष्ठः, स्रजीयान् ॥१३॥

ईनेऽध्वा-ऽऽत्मनोः ।७।४।४८॥

अन्त्यस्वरादेर्लुग् न स्यात् । अध्वनीनः, *अध्वानं येनौ* [७।१।१०३]इतीनः । आत्मनीनः ॥१४॥

अनोऽटचे ये ।७।४।५१॥

अन्नन्तस्य टचवर्जे यादावन्त्यस्वरादेर्लुग् न स्यात् । सामन्यः । अटच इति किम् ? राज्यम् ॥१५॥

अणि ।७।४।५२॥

अन्नन्तस्याऽणि अन्त्यस्वरादेर्लुग् न स्यात् । सौत्वनः ॥१६॥

संयोगादिनः ।७।४।५३॥

संयोगात् परो य इन्, तदन्तस्याऽण्यन्त्यस्वरादेर्लुग् न स्यात् । शाङ्खिनः ॥१७॥

अनपत्ये ।७।४।५५॥

इन्नन्तस्यानपत्यार्थेऽण्यन्त्यस्वरादेर्लुग् न स्यात् । सांराविणम् ॥१८॥

उक्ष्णो लुक् ।७।४।५६॥

उक्ष्णोऽनपत्येऽण्यन्त्यस्वरादेर्लुक् स्यात् । औक्षं पक्ष(द)म् । अनपत्य इत्येव,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

औक्ष्णः *षादिहन्धृतराज्ञोऽणि* [२।१।११०] इत्यनोऽस्य लुक् स्यात् ॥१९॥

नोऽपदस्य तद्धिते ।७।४।६१॥

नन्तस्यापदस्य तद्धिते परेऽन्त्यस्वरादेर्लुक् स्यात् । मैधावः । अपदस्येति किम् ? मेधाविरूप्यम् ॥२०॥

विंशतेस्तेर्डिति ।७।४।६७॥

अस्यापदस्य तेर्डिति तद्धिते लुक् स्यात् । विंशकः पटः ॥२१॥

अवर्णेवर्णस्य ।७।४।६८॥

एतदन्तस्यापदस्य तद्धिते लुक् स्यात् । दाक्षिः, चौडिः, नाभेयः, दौलेयः । अपदस्येति किम् ? ऊर्णायुः ॥२२॥

अकद्रू-पाण्ड्वोरुवर्णस्यैये ।७।४।६९॥

एतद्वर्जोवर्णान्तस्य अपदस्य एये तद्धिते लुक् स्यात् । जाम्बेयः । कद्रूवादिवर्जनं किम् ? काद्रवेयः, *शुभ्रादिभ्यः* [६।१।७३] इत्येयण् । पाण्डवेयः ॥२३॥

अस्वयम्भुवोऽव् ।७।४।७०॥

स्वयंभूवर्जोवर्णान्तस्यापदस्य तद्धितेऽव् स्यात् । औपगवः । अस्वयम्भुव इति किम् ? स्वायम्भुवः ॥२४॥

भृशा-ऽऽभीक्ष्ण्या-ऽविच्छेदे द्विः प्राक् तमबादेः ।७।४।७३॥

क्रियायाअवयवक्रियाणांकात्स्न्र्यंभृशार्थः, +पौनःपुन्यमाभीक्ष्ण्यम्, क्रियान्तराव्यवधानमविच्छेदः, एषु द्योत्येषु पदं वाक्यं वा तमबादेः प्राग् द्विः स्यात् । लुनीहि लुनीहीत्येवाऽयं लुनाति, भोजं भोजं याति, प्रपचति प्रपचति ॥२५॥

नानावधारणे ।७।४।७४॥

नानाभूतानामियत्तापरिच्छेदे गम्ये शब्दो द्विः स्यात् । अस्मात् कार्षापणादिह भवद्भ्यां माषं माषं देहि ॥२६॥

आधिक्या-ऽऽनुपूर्ल्ये ।७।४।७५॥

एतद्वृत्ति द्विः स्यात् । नमो नमः, मूले मूले स्थूलाः ॥२७॥

सामीप्येऽधोऽध्युपरि ।७।४।७९॥

एते सामीप्येऽर्थे द्विः स्युः । अधोऽधः, अध्यधि, उपर्युपरि ग्रामम् ॥२८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वीप्सायाम् ।७।४।८०॥

अस्यां वर्तमानं द्विः स्यात् । वृक्षं वृक्षं सिञ्चति, ग्रामो ग्रामो रमणीयः ॥२९॥

प्लुप् चादावेकस्य स्यादेः ।७।४।८१॥

एकस्य वीप्सायां द्व्युक्तस्याद्यस्य स्यादेः पिल्लुप् स्यात् । एकैकस्याः ॥३०॥

द्वन्द्वं वा ।७।४।८२॥

वीप्सायां द्व्युक्तस्य द्वेरादेः स्यादेर्लुप् स्यात्, एश्चाऽम्, उत्तरत्रेतोऽत्वं स्यादेश्चाऽम् वा निपात्यः । द्वन्द्वं द्वौ द्वौ वा तिष्ठतः ॥३१॥

लोकज्ञातेऽत्यन्तसाहचर्ये ।७।४।८४॥

अत्र द्योत्ये द्वेः पूर्ववद् द्वन्द्वमिति निपात्यम् । द्वन्द्वं रामलक्ष्मणौ ॥३२॥

प्रिय-सुखं चाकृच्छ्रे ।७।४।८७॥

एतावक्लेशार्थौ वा द्विः स्याताम्, आदौ स्यादेर्लुप् च । [प्रियप्रियेण,] प्रियेण वा दत्ते ; सुखसुखेन, सुखेन वाऽधीते ॥३३॥

वाक्यस्य परिर्वर्जने ।७।४।८८॥

वर्जनार्थो वाक्यांशः परिर्वा द्विः स्यात् । परि परि, परि वा त्रिगर्त्तेभ्यो वृष्टो मेघः । वाक्यस्येति किम् ? परित्रिगर्त्तं वृष्टो मेघः ॥३४॥

क्षिया-ऽऽशीः-प्रैषे ।७।४।९२॥

क्षिया आचारे प्रेषः । एतद्वृत्तेर्वाक्यस्य स्वरेष्वन्त्यः स्वरः त्याद्यन्तस्य वाक्यान्तराकाङ्क्षस्यांशः प्लुतो वा स्यात् । स्वयं ह रथेन याति [३ याति वा, उपाध्यायं पदातिं गमयति । सिद्धान्तमध्येषीष्ठाः ३ अध्येषीष्ठा वा, तर्कं च तात ! । कटं च कुरु ३ कुरु वा, ग्रामं च गच्छ] ॥३५॥

ओमः प्रारम्भे ।७।४।९६॥

ओमः प्रणामाद्यर्थाभ्याद(दा)नार्थस्य स्वरेष्वन्त्यः स्वरः प्लुतो वा स्यात् । ओ [३] म् ओम् वा ऋषभ[मृषभ]गामिनं प्रणमत ॥३६॥

पञ्चम्या निर्दिष्टे परस्य ।७।४।१०४॥

पञ्चम्या निर्दिष्टे यत् कार्यमुक्तं तत् परस्याऽव्यवधेः स्यात् । *अतो भिस ऐस्* [१।४।२] वृक्षैः, इह मा भूत्, मालाभिरत्र, दृषद्भिः ॥३७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सप्तम्या पूर्वस्य ।७।४।१०५।।

सप्तम्या निर्दिष्टे यत् कार्यमुक्तं तत् पूर्वस्याऽव्यवधेः स्यात् । दध्यत्र । इह न भवति, समिदत्र ।।३८।।

षष्ठ्याऽन्त्यस्य ।७।४।१०६।।

षष्ठ्या निर्दिष्टे यदुक्तं तत् षष्ठ्युक्तस्य योऽन्त्यस्तस्य स्यात् । अष्टाभिः ।।३९।।

अनेकवर्णः सर्वस्य ।७।४।१०७।।

अयं विधिः षष्ठ्युक्तस्य सर्वस्यैव भवति । तिसृभिः ।।४०।।

प्रत्ययस्य ।७।४।१०८।।

प्रत्ययस्थानिनो विधिः सर्वस्य स्यात् । सर्वे ।।४१।।

स्थानीवाऽवर्णविधौ ।७।४।१०९।।

आदेश आदेशिदेशीयः स्यात्, न चेत् स्थानिवर्णाश्रयं कार्यम् । भव्यम्, कस्मै, राजा, प्रकृत्य । अवर्णविधाविति किम् ? द्यौः, क इष्टः, प्रदीव्य ।।४२।।

स्वरस्य परे प्राग्विधौ ।७।४।११०।।

स्वरस्यादेशः परे परनिमित्तकः पूर्वस्य विधौ विधेये स्थानीव स्यात् । कथयति, पादिकः, स्रंस्यते । पर इति किम् ? द्विपदिकां दत्ते । प्राग्विधाविति किम् ? नैधेयः ।।४३।।

न सन्धि-ङी-य-क्वि-द्वि-दीर्घा-ऽसद्विधावस्कृलुकि ।७।४।१११।।++

सन्धिविधौ [ङीविधौ] यविधौ क्विविधौ द्वित्वविधौ दीर्घविधौ *संयोगस्यादौ स्कोर्लुक् [२।१।८८]* इति स्कृलुग्वर्जे चाऽसद्विधौ स्वरस्याऽऽदेशः स्थानीव न स्यात् । सन्धि- वियन्ति, ङी- बिम्बम्, य- कण्डूतिः, क्वि- दयूः, द्वि- दद्धत्र, दीर्घ- शामं शामम्, [असद्विधौ]- यायष्टिः । अस्कृलुकीति किम् ? सुकूः, काष्ठतक् ।।४४।।

लुप्यव्वृल्लेनत् ।७।४।११२।।

प्रत्ययस्य लुपि लु[ब्भू]तपरनिमित्तकं पूर्वं कार्यं न स्यात्, व्वृत् लम् एनच्च मुक्त्वा । तद्, गर्गाः । लुपीत्युक्ते लुकि स्यादेव, गोमान् । अव्वृल्लेनदिति किम् ? जरीगृहीति, निजागलीति, एनत् पश्य ।।४५।।

विशेषणमन्तः ।७।४।११३।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अभेदेनोक्तोऽवयवो विशेषणं विशेष्यस्य समुदायस्यान्तः स्यात् *अतः स्यमोऽम् [१।४।५७]* कुण्डम् । इह न स्यात्, तद् ॥४६॥

सप्तम्या आदिः ।७।४।११४॥

सप्तम्यन्तविशेष्यस्य यद् विशेषणं तत् तस्याऽऽदिः स्यात् । *इन् ङीस्वरे लुक् [१।४।७९]* पथः । इह मा भूत्, पथिषु ॥४७॥

प्रत्ययः प्रकृत्यादेः ।७।४।११५॥

यस्माद् यः प्रत्ययो विधीयते सा तस्य प्रकृतिः, प्रत्ययः प्रकृत्यादेः समुदायस्य विशेषणं स्यात्, नोनाधिकस्य । मातृभोगीणः ॥४८॥

परः ।७।४।११८॥

प्रत्ययः प्रकृतेः पर एव स्यात् । अजा, वृक्षः, जुगुप्सते ॥४९॥

स्पर्द्धे ।७।४।११९॥

द्वयोर्विध्योरन्यत्र सावकाशयोस्तुल्यबलयोरेकत्रानेकत्र चोपनिपातः स्पर्द्धः, तत्र यः सूत्रपाठे परः स विधिः स्यात् । वनानि, अत्र *शसोऽता सश्च नः पुंसि [१।४।४९]* इत्यतो *नपुंसकस्य शिः [१।४।५५]* इत्येव स्यात् ॥५०॥

आसन्नः ।७।४।१२०॥

यथास्वं स्थाना-ऽर्थ-प्रमाणादिभिरासन्न एव विधिः स्यात् । दण्डाग्रम्, अत्र कण्ठ्ययोरतोः कण्ठ्य एव आ दीर्घः स्यात् । वातण्ड्ययुवतिः, वा(व)तण्ड्याः पुंवद्भावेऽर्थत आसन्नो वा[तण्ड्यः] स्यात् । अमुष्मै, *मादुवर्णोऽनु [२।१।४७]* इति मात्रिकस्य मात्रिकः ॥५१॥

समर्थः पदविधिः ।७।४।१२२॥

समर्थपदाश्रयत्वात् समर्थः, पदसम्बन्धी विधिः सर्वः पदविधिः समर्थो ज्ञेयः, सामर्थ्यं च व्यपेक्षा एकार्थीभावश्च । पदविधिस्तु समास-नामधातु-कृत्-तद्धितोपपदविभक्ति-युष्मदस्मदादेश-प्लुतरूपः । धर्मश्रितः, पुत्रीयति, कुम्भकारः, औपगवः, नमो देवेभ्यः, धर्मस्ते स्वम्, धर्मो मे स्वम्, [अङ्ग ! कूज३ इदानीं ज्ञास्यसि जाल्म ! ।] समर्थ इति किम् ? पश्य धर्मं श्रितो मैत्रो गुरुकुलम्, पश्यति पुत्रमिच्छति सुखम्, पश्य कुम्भं करोति कटम्, गृहमुपगोरपत्यं तव, इदं नमो देवाः ! शृणुत, ओदनं +पच तव मम वा भविष्यति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अङ्ग ! कूजत्ययमिदानीं ज्ञास्यति जाल्मः । पदोक्तवर्णविधिरसामर्थ्येऽपि स्यात् —तिष्ठतु दध्यशान त्वं शाकेन । एवं समास-नामधातु-कृत्-तद्धितेषु वाक्ये व्यपेक्षा । वृत्तावेकार्थीभावः, शेषेषु पुनर्व्यपेक्षैव सामर्थ्यम् ॥५२॥

इत्याचार्यश्रीहेमचन्द्रविरचितायां स्वोपज्ञसिद्धहेमचन्द्रशब्दानुशासनरहस्यवृत्तौ सप्तमस्याध्यायस्य चतुर्थः पादः समाप्तः ॥७।४॥++

॥ सप्तमोऽध्यायः समाप्तः ॥

[समाप्तम्]

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आचार्यभगवत्-कलिकालसर्वज्ञ-श्रीहेमचन्द्रसूरिप्रणीतं

श्रीसिद्धहेमचन्द्रशब्दानुशासनम् ।

(सप्ताध्यायात्मकः सूत्रपाठः)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रीसिद्धाचलमण्डन श्री ऋषभदेवस्वामिने नमः ।
श्री शान्तिनाथाय नमः । श्री नेमिनाथाय नमः ।
श्री शङ्खेश्वरपार्श्वनाथाय नमः । श्री महावीरस्वामिने नमः ।
श्री पुण्डरीकस्वामिने नमः । श्रीगौतमस्वामिने नमः ।
श्री सद्गुरुभ्यो नमः ।
ॐ श्रीं ह्रीं अर्हं नमः ।
आचार्यभगवत्-कलिकालसर्वज्ञ-श्री हेमचन्द्रसूरिप्रणीतं

श्री सिद्धहेमचन्द्रशब्दानुशासनम् ।

[सप्ताध्यायात्मकः सूत्रपाठः]
[अथ प्रथमाध्याये प्रथमः पादः]

(१) अर्हं ।।
(२) सिद्धिः स्याद्वादात्
(३) लोकात्
(४) औदन्ताः स्वराः
(५) एक-द्वि-त्रिमात्रा ह्रस्व-दीर्घ-प्लुताः
(६) अनवर्णा नामी
(७) ऌदन्ताः समानाः
(८) ए-ऐ-ओ-औ सन्ध्यक्षरम्
(९) अं-अः अनुस्वार-विसर्गौ
(१०) कादिर्व्यञ्जनम्
(११) अपञ्चमान्तस्थो धुट्
(१२) पञ्चको वर्गः
(१३) आद्य-द्वितीय-श-ष-सा अघोषाः
(१४) अन्यो घोषवान्
(१५) य-र-ल-वा अन्तस्थाः
(१६) अं-अः क-प-श-ष-साः शिट्
(१७) तुल्यस्थाना-ऽऽस्यप्रयत्नः स्वः
(१८) स्यौ-जसमौ-शस्-टा-भ्याम्-भिस्-ङे-भ्याम्-भ्यस्-ङसि-भ्याम्-भ्यस्-ङसोसाम्-ङ्योस्-सुपां त्रयी त्रयी प्रथमादिः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(१९) स्त्यादिर्विभक्तिः
(२०) तदन्तं पदम्
(२१) नाम सिदय्व्यञ्जने
(२२) नं क्ये
(२३) न स्तं मत्वर्थे
(२४) मनुर्नभोऽङ्गिरो वति
(२५) वृत्त्यन्तोऽसषे
(२६) सविशेषणमाख्यातं वाक्यम्
(२७) अधातु-विभक्ति-वाक्य-मर्थवन्नाम
(२८) शिर्घुट्
(२९) पुं-स्त्रियोः स्यमौ-जस्
(३०) स्वरादयोऽव्ययम्
(३१) चादयोऽसत्त्वे
(३२) अधणृतस्वाद्या शसः
(३३) विभक्ति-थमन्तत-साद्याभाः
(३४) वत्-तस्याम्
(३५) क्त्वा-तुमम्
(३६) गतिः
(३७) अप्रयोगीत्
(३८) अनन्तः पञ्चम्याः प्रत्ययः
(३९) डत्यतु संख्यावत्
(४०) बहु-गणं भेदे
(४१) क-समासेऽध्यर्द्धः
(४२) अर्द्धपूर्वपदः पूरणः

[प्रथमाध्याये द्वितीयः पादः]

(१) समानानां तेन दीर्घः
(२) ऋलति ह्रस्वो वा
(३) लृत र्ऌलृ ऋलभ्यां वा
(४) ऋतो वा , तौ च
(५) ऋस्तयोः
(६) अवर्णस्येवर्णादिनैदोदरल्
(७) ऋणे प्र-दशार्ण-वसन-कम्बल-वत्सर-वत्सतर-स्याऽऽर्
(८) ऋते तृतीयासमासे
(९) ऋत्यारुपसर्गस्य
(१०) नाम्नि वा
(११) लृत्याल् वा
(१२) ऐदौत् सन्ध्यक्षरैः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(१३) ऊटा
(१४) प्रस्यैषैष्योढोढ्यूहे स्वरेण
(१५) स्वैर-स्वैर्यक्षौहिण्याम्
(१६) अनियोगे लुगेवे
(१७) वौष्ठौतौ समासे
(१८) ओमाङि
(१९) उपसर्गस्यानिणेधेदोति
(२०) वा नाम्नि
(२१) इवर्णादेरस्वे स्वरे य-व-र-लम्
(२२) ह्रस्वोऽपदे वा
(२३) एदैतोऽयाय्
(२४) ओदौतोऽवाव्
(२५) व्यक्ये
(२६) ऋतो रस्तद्धिते
(२७) एदोतः पदान्तेऽस्य लुक्
(२८) गोर्नाम्न्यवोऽक्षे
(२९) स्वरे वाऽनक्षे
(३०) इन्द्रे
(३१) वाऽत्यसन्धिः
(३२) प्लुतोऽनितौ
(३३) इ ३ वा
(३४) ईदूदेद् द्विवचनम्
(३५) अदोमु-मी
(३६) चादिः स्वरोऽनाङ्
(३७) ओदन्तः
(३८) सौ नवेतौ
(३९) ऊँ चोञ्
(४०) अञ्वर्गात् स्वरे वोऽसन्
(४१) अ-इ-उ-वर्णस्यान्तेऽनुनासिकोऽनीदादेः

[प्रथमाध्याये तृतीयः पादः]

(१) तृतीयस्य पञ्चमे
(२) प्रत्यये च
(३) ततो हश्चतुर्थः
(४) प्रथमादधुटि शश्छः
(५) रः कख-पफयोः५क-७पौ
(६) श-ष-से श-ष-सं वा
(७) च-ट-ते सद्वितीये
(८) नोऽप्रशानोऽनुस्वारा-ऽनुनासिकौ च पूर्वस्याऽधुट्परे
(९) पुमोऽशिट्यघोषेऽख्यागि रः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(१०) नॄनः पेषु वा
(११) द्विः कानः कानि सः
(१२) स्सटि समः
(१३) लुक्
(१४) तौ मु-मो व्यञ्जने स्वौ
(१५) म-न-य-व-लपरे हे
(१६) सम्राट
(१७) ङ्-णोः क-टावन्तौ शिटि नवा
(१८) ङ्नः सः त्सोऽश्वः
(१९) नः शि श्च्
(२०) अतोऽति रोरुः
(२१) घोषवति
(२२) अवर्ण-भो-भगो-ऽघोर्लुग-सन्धिः
(२३) व्योः
(२४) स्वरे वा
(२५) अस्पष्टाववर्णात्त्वनुञि वा
(२६) रोर्यः
(२७) ह्रस्वान्ङ-ण-नो द्वे
(२८) अनाङ्-माङो दीर्घाद् वा छः
(२९) प्लुताद् वा
(३०) स्वरेभ्यः
(३१) र्हादर्ह-स्वरस्याऽनु नवा
(३२) अदीर्घाद् विरामैकव्यञ्जने
(३३) अञ्वर्गस्यान्तस्थातः
(३४) ततोऽस्याः
(३५) शिटः प्रथम-द्वितीयस्य
(३६) ततः शिटः
(३७) न रात् स्वरे
(३८) पुत्रस्याऽऽदिन्-पुत्रादि-न्याक्रोशे
(३९) म्रां धुड्वर्गेऽन्त्योऽपदान्ते
(४०) शिड्-हेऽनुस्वारः
(४१) रो रे लुग् दीर्घश्चाऽदिदुतः
(४२) ढस्तड्ढे
(४३) सहि-वहेरोच्चाऽवर्णस्य
(४४) उदः स्था-स्तम्भः सः
(४५) तदः सेः स्वरे पादार्था
(४६) एतदश्च व्यञ्जनेऽनग्-नञ्समासे
(४७) व्यञ्जनात् पञ्चमा-ऽन्त-स्थायाः सरूपे वा
(४८) धुटो धुटि स्वे वा
(४९) तृतीयस्तृतीय-चतुर्थे
(५०) अघोषे प्रथमोऽशिटः
(५१) विरामे वा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(५२) न सन्धिः
(५३) रः पदान्ते विसर्गस्तयोः
(५४) ख्याग्नि
(५५) शिट्यघोषात्
(५६) व्यत्यये लुग् वा
(५७) अरोः सुपि रः
(५८) वाऽहर्पत्यादयः
(५९) शिट्याद्यस्य द्वितीयो वा
(६०) तवर्गस्य श्ववर्ग-ष्टवर्गाभ्यां योगे च-टवर्गौ
(६१) सस्य श-षौ
(६२) न शात्
(६३) पदान्ताट्टवर्गादनाम्--नगरी-नवतेः
(६४) षि तवर्गस्य
(६५) लि लौ

[प्रथमाध्याये चतुर्थः पादः]

(१) अत आः स्यादौ जस्-भ्याम्-ये
(२) भिस ऐस्
(३) इदमदसोऽक्येव
(४) एद् बहुस्भोसि
(५) टा-ङसोरिन-स्यौ
(६) ङे-ङस्योर्या-ऽऽतौ
(७) सर्वादेः स्मै-स्मातौ
(८) ङेः स्मिन्
(९) जस इः
(१०) नेमा-ऽर्द्ध-प्रथम-चरम-तया-ऽया-ऽल्प-कतिपय-स्य वा
(११) द्वन्द्वे वा
(१२) न सर्वादेः
(१३) तृतीयान्तात् पूर्वा-ऽवरं योगे
(१४) तीयं ङित्कार्ये वा
(१५) अवर्णस्याऽऽमः साम्
(१६) नवभ्यः पूर्वेभ्य इ-स्मात्-स्मिन् वा
(१७) आपो ङितां यै-यास्-यास्-याम्
(१८) सर्वादेर्डस्पूर्वाः
(१९) टौस्येत्
(२०) औता

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(२१) इदुतोऽस्त्रेरीदूत्
(२२) जस्येदोत्
(२३) ङित्यदिति
(२४) टः पुंसि ना
(२५) ङिर्डौ
(२६) केवलसखिपतेरौ
(२७) न ना ङिदेत्
(२८) स्त्रिया ङितां वा दै-दास्-दास्-दाम्
(२९) स्त्रीदूतः
(३०) वेयुवोऽस्त्रियाः
(३१) आमो नाम् वा
(३२) ह्रस्वा-ऽऽपश्च
(३३) संख्यानां ष्णाम्
(३४) त्रेस्त्रयः
(३५) एदोद्भ्यां ङसि-ङसो रः
(३६) खि-ति-खी-तीय उर्
(३७) ऋतो डुर्
(३८) तृ-स्वसृ-नप्तृ-नेष्टृ-त्वष्टृ-क्षत्तृ-होतृ-पोतृ-प्रशास्तृ-णां घुटचार्
(३९) अर्डौ च
(४०) मातुर्मातः पुत्रेऽर्हे सिनाऽऽमन्त्र्ये
(४१) ह्रस्वस्य गुणः
(४२) एदापः
(४३) नित्यदिद्-द्विस्वराम्बार्थस्य ह्रस्वः
(४४) अदेतः स्यमोर्लुक्
(४५) दीर्घड्याब्-व्यञ्जनात् सेः
(४६) समानादमोऽतः
(४७) दीर्घो नाम्यतिसृ-चतसृ-भ्रः
(४८) नुर्वा
(४९) शसोऽता सश्च नः पुंसि
(५०) संख्या-साय-वेरह्स्या-ऽहन् डौ वा
(५१) निय आम्
(५२) वाष्टन आः स्यादौ
(५३) अष्ट औ जस्-शसोः
(५४) डति-ष्णः संख्याया लुप्
(५५) नपुंसकस्य शिः
(५६) औरी
(५७) अतः स्यमोऽम्
(५८) पञ्चतोऽन्यादेरनेकतरस्य दः
(५९) अनतो लुप्
(६०) जरसो वा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(६१) नामिनो लुग् वा
(६२) वाऽन्य तः पुमांष्टादौ स्वरे
(६३) दध्यस्थिसक्थ्यक्ष्णोऽन्त-स्याऽन्
(६४) अनाम्स्वरे नोऽन्तः
(६५) स्वराच्छौ
(६६) धुटां प्राक्
(६७) लों वा
(६८) घुटि
(६९) अचः
(७०) ऋदुदितः
(७१) युग्रोऽसमासे
(७२) अनडुहः सौ
(७३) पुंसोः पुमन्स्
(७४) ओत औ
(७५) आ अम्-शसोऽता
(७६) पथिन्-मथिनृभुक्षः सौ
(७७) एः
(७८) थो न्थ्
(७९) इन् ङी-स्वरे लुक्
(८०) वोशनसो नश्चामन्त्र्ये सौ
(८१) उतोऽनडुच्चतुरो वः
(८२) वाः शेषे
(८३) सख्युरितोऽशावैत्
(८४) ऋदुशनस्-पुरुदंशो-ऽने-हसश्च सेर्डाः
(८५) नि दीर्घः
(८६) न्स्महतोः
(८७) इन्-हन्-पूषा-ऽर्यम्णः शि-स्योः
(८८) अपः
(८९) नि वा
(९०) अभ्वादेरत्वसः सौ
(९१) क्रुशस्तुनस्तृच् पुंसि
(९२) टादौ स्वरे वा
(९३) स्त्रियाम्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[द्वितीयाध्याये प्रथमः पादः]

(१) त्रि-चतुरस्तिसृ-चतसृ स्यादौ
(२) ऋतो रः स्वरेऽनि
(३) जराया जरस् वा
(४) अपोऽद् भे
(५) आ रायो व्यञ्जने
(६) युष्मदस्मदोः
(७) टाङ्योसि यः
(८) शेषे लुक्
(९) मोर्वा
(१०) मन्तस्य युवा-ऽऽवौ द्वयोः
(११) त्व-मौ प्रत्ययोत्तरपदे चैकस्मिन्
(१२) त्वमहं सिना प्राक् चाऽकः
(१३) यूयं वयं जसा
(१४) तुभ्यं मह्यं ङया
(१५) तव मम ङसा
(१६) अमौ मः
(१७) शसो नः
(१८) अभ्यम् भ्यसः
(१९) ङसेश्चाऽद्
(२०) आम आकम्
(२१) पदाद् युग्विभक्त्यैकवाक्ये वस्-नसौ बहुत्वे
(२२) द्वित्वे वाम्-नौ
(२३) डे-ङसा ते मे
(२४) अमा त्वा मा
(२५) असदिवाऽऽमन्त्र्यं पूर्वम्
(२६) जस्विशेष्यं वाऽऽमन्त्र्ये
(२७) नान्यत्
(२८) पादाद्योः
(२९) चा-ऽह-ह-वैवयोगे
(३०) दृश्यर्थैश्चिन्तायाम्
(३१) नित्यमन्वादेशे
(३२) सपूर्वात् प्रथमान्ताद् वा
(३३) त्यदामेनदेतदो द्वितीया-टौस्यवृत्त्यन्ते
(३४) इदमः
(३५) अद् व्यञ्जने
(३६) अनक्
(३७) टौस्यनः
(३८) अयमियं पुंस्त्रियोः सौ
(३९) दो मः स्यादौ
(४०) किमः कस्तसादौ च

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(४१) आ द्वेरः
(४२) तः सौ सः
(४३) अदसो दः सेस्तु डौ
(४४) असुको वाऽकि
(४५) मोऽवर्णस्य
(४६) वाऽद्रौ
(४७) मादुवर्णोऽनु
(४८) प्रागिनात्
(४९) बहुष्वेरी
(५०) धातोरिवर्णोवर्णस्येयुव् स्वरे प्रत्यये
(५१) इणः
(५२) संयोगात्
(५३) भ्रू-इनोः
(५४) स्त्रियाः
(५५) वाऽम्-शसि
(५६) योऽनेकस्वरस्य
(५७) स्यादौ वः
(५८) क्विब्वृत्तेरसुधियस्तौ
(५९) दृन्-पुन-र्वर्षा-कारैर्भुवः
(६०) ण-षमसत् परे स्यादिविधौ च
(६१) क्तादेशोऽषि
(६२) ष-ढोः कस्सि
(६३) भ्वादेर्नामिनो दीर्घो वोर्व्यञ्जने
(६४) पदान्ते
(६५) न यि तद्धिते
(६६) कुरुच्छुरः
(६७) मो नो म्वोश्च
(६८) स्रंस्-ध्वंस्-क्रस्सनडुहो दः
(६९) ऋत्विज्-दिश्-दृश्-स्पृश्-स्रज्-दधृषुष्णिहो गः
(७०) नशो वा
(७१) युजश्च-क्रुञ्चो नो ङः
(७२) सो रुः
(७३) सजुषः
(७४) अह्नः
(७५) रो लुप्यरि
(७६) धुटस्तृतीयः
(७७) ग-ड-द-बादेश्चतुर्थान्त-स्यैकस्वरस्याऽऽदेश्चतुर्थः स्ध्वोश्च प्रत्यये
(७८) धागस्त-थोश्च
(७९) अधश्चतुर्थात् तथोर्धः
(८०) र्नाम्यन्तात् परोक्षाद्यतन्या-शिषो धो ढः
(८१) हान्तस्थाञ्जीड्भ्यां वा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(८२) हो धुट्-पदान्ते
(८३) भ्वादेर्दार्दिर्घः
(८४) मुह-द्रुह-ष्णुह-ष्णिहो वा
(८५) नहाहोर्ध-तौ
(८६) च-जः क-गम्
(८७) यज-सृज-मृज-राज-भ्राज-भ्रस्ज-ब्रश्च-परि-व्राजः शः षः
(८८) संयोगस्यादौ स्कोर्लुक्
(८९) पदस्य
(९०) रात् सः
(९१) नाम्नो नोऽनह्नः
(९२) नाऽऽमन्त्रचे
(९३) क्लीबे वा
(९४) मावर्णान्तोपान्तापञ्चम-वर्गान् मतोर्मो वः
(९५) नाग्नि
(९६) चर्मण्वत्यष्ठीवच्चक्रीवत्-कक्षीवद्-रुमण्वत्
(९७) उदन्वानब्धौ च
(९८) राजन्वान् सुराज्ञि
(९९) नोर्म्यादिभ्यः
(१००) मास-निशा-ऽऽसनस्य शसादौ लुग्वा
(१०१) दन्त-पाद-नासिका-हृदया-ऽसृग्-यूषोदक-दोर्यकृच्छकृतो दत्-पन्नस्-हृदसन्-यूषन्नुदन्-दोषन्-यकन्-शकन् वा
(१०२) य-स्वरे पादः पदणि-क्य-घुटि
(१०३) उदच उदीच्
(१०४) अच् प्राग् दीर्घश्च
(१०५) क्वसुष् मतौ च
(१०६) श्वन्-युवन्-मघोनो ङी-स्याद्यघुट्स्वरे व उः
(१०७) लुगातोऽनापः
(१०८) अनोऽस्य
(१०९) ई-ङौ वा
(११०) षादि-हन्-धृतराज्ञोऽणि
(१११) न व-मन्तसंयोगात्
(११२) हनो ह्नो घ्न्
(११३) लुगस्यादेत्यपदे
(११४) ङित्यन्त्यस्वरादेः
(११५) अवर्णादश्नोऽन्तो वाऽतुरीङ्चोः
(११६) श्य-शवः
(११७) दिव औः सौ

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

(११८) उः पदान्तेऽनूत्

[द्वितीयाध्याये द्वितीयः पादः]

(१) क्रियाहेतुः कारकम्
(२) स्वतन्त्रः कर्त्ता
(३) कर्तुर्व्याप्यं कर्म
(४) वाऽकर्मणामणिक्कर्त्ता णौ
(५) गति-बोधा-ऽऽहारार्थ-शब्दकर्म-नित्याकर्मणामनी-खाद्यदि-ह्वा- शब्दाय-क्रन्दाम्
(६) भक्षेर्हिंसायाम्
(७) वहेः प्रवेयः
(८) हृ-क्रोर्नवा
(९) दृश्यभिवदोरात्मने
(१०) नाथः
(११) स्मृत्यर्थ-दयेशः
(१२) कृगः प्रतियत्ने
(१३)रुजार्थस्याऽज्वरि-सन्तापेभ्यो कर्त्तरि
(१४)जास-नाट-क्राथ-पिषो हिंसायाम्
(१५) नि-प्रेभ्यो घ्नः
(१६) विनिमेय-द्यूतपणं पणि-व्यवह्नोः
(१७) उपसर्गाद् दिवः
(१८) न
(१९) करणं च
(२०) अधेः शीङ्-स्था-ऽऽस आधारः
(२१) उपान्वध्याङ्वसः
(२२) वाऽभिनिविशः
(२३) कालाध्व-भाव-देशं वाऽकर्म चाऽकर्मणाम्
(२४) साधकतमं करणम्
(२५) कर्माभिप्रेयः संप्रदानम्
(२६) स्पृहेर्व्याप्यं वा
(२७) क्रुध्-द्रुहेर्ष्या-ऽसूयार्थैर्यं प्रति कोपः
(२८) नोपसर्गात् क्रुद्-द्रुहा
(२९) अपायेऽवधिरपादानम्
(३०) क्रियाश्रयस्याऽऽधारोऽधि-करणम्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(३१) नाम्नः प्रथमैक-द्वि-बहौ
(३२) आमन्त्र्ये
(३३) गौणात् समया-निकषा-हा-धिगन्तरा-ऽन्तरेणा-ऽति-येन-तेनैर्द्वितीया
(३४) द्वित्वेऽधोऽध्युपरिभिः
(३५) सर्वोभया-ऽभि-परिणा तसा
(३६) लक्षण-वीप्स्येत्थम्भू-तेष्वभिना
(३७) भागिनि च प्रति-पर्यनुभिः
(३८) हेतु-सहार्थैऽनुना
(३९) उत्कृष्टेऽनूपेन
(४०) कर्मणि
(४१) क्रियाविशेषणात्
(४२) काला-ऽध्वनोर्व्याप्तौ
(४३) सिद्धौ तृतीया
(४४) हेतु-कर्तृ-करणेत्थम्भू-तलक्षणे
(४५) सहार्थे
(४६) यद्भेदैस्तद्भदाख्या
(४७) कृताद्यैः
(४८) काले भान्नवाऽऽधारे
(४९) प्रसितोत्सुका-ऽवबद्धैः
(५०) व्याप्ये द्विद्रोणादिभ्यो वीप्सायाम्
(५१) समो ज्ञोऽस्मृतौ वा
(५२) दामः संप्रदानेऽधर्म्य आत्मने च
(५३) चतुर्थी
(५४) तादर्थ्ये
(५५) रुचि-कृप्यर्थ-धारिभिः प्रेय-विकारोत्तमर्णेषु
(५६) प्रत्याङः श्रुवार्थिनि
(५७) प्रत्यनोर्गृणाऽऽख्यातरि
(५८) यद्वीक्ष्ये राधीक्षी
(५९) उत्पातेन ज्ञाप्ये
(६०) श्लाघ-ह्नु-स्था-शपा प्रयोज्ये
(६१) तुमोऽर्थे भाववचनात्
(६२) गम्यस्याऽऽप्ये
(६३) गतेर्नवाऽनाप्ते
(६४) मन्यस्याऽनावादि-भ्योऽतिकुत्सने
(६५) हित-सुखाभ्याम्
(६६) तद्-भद्रा-ऽऽयुष्य-क्षेमा-ऽर्थार्थेनाऽऽशिषि
(६७) परिक्रयणे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(६८) शक्तार्थ-वषड्-नमः-
स्वस्ति-स्वाहा-स्वधाभिः
(६९) पञ्चम्यपादाने
(७०) आङाऽवधौ
(७१) पर्यपाभ्यां वर्ज्ये
(७२) यतः प्रतिनिधि-प्रतिदाने
प्रतिना
(७३) आख्यातर्युपयोगे
(७४) गम्ययपः कर्मा-ऽऽधारे
(७५) प्रभृत्यन्यार्थ-दिक्शब्द-
बहिरारादितरैः
(७६) ऋणाद्धेतोः
(७७) गुणादस्त्रियां नवा
(७८) आरादर्थैः
(७९) स्तोका-ऽल्प-कृच्छ्र-
कतिपयादसत्त्वे करणे
(८०) अज्ञाने ज्ञः षष्ठी
(८१) शेषे
(८२) रि-रिष्टात्-स्तादस्ता-
दसतसाता
(८३) कर्मणि कृतः
(८४) द्विषो वाऽतृशः
(८५) वैकत्र द्वयोः
(८६) कर्तरि
(८७) द्विहेतोरस्त्र्यणकस्य वा
(८८) कृत्यस्य वा
(८९) नोभयोर्हेतोः
(९०) तृन्नुदन्ता-ऽव्यय-
कस्वाना-ऽतृश्-शतृ-
ङि-णकच्-खलर्थस्य
(९१) क्तयोरसदाधारे
(९२) वा क्लीबे
(९३) अकमेरुकस्य
(९४) एष्यदृणेनः
(९५) सप्तम्यधिकरणे
(९६) नवा सुजर्थैः काले
(९७) कुशला-ऽऽयुक्तेना-
ऽऽसेवायाम्
(९८) स्वामीश्वराधिपति-
दायाद-साक्षि-प्रतिभू-प्रसूतैः
(९९) व्याप्ये क्तेनः
(१००) तद्युक्ते हेतौ
(१०१) अप्रत्यादावसाधुना
(१०२) साधुना
(१०३) निपुणेन चाऽर्चायाम्
(१०४) स्वेशेऽधिना
(१०५) उपेनाऽधिकिनि
(१०६) यद्भावो भावलक्षणम्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(१०७) गते गम्येऽध्वनोऽन्तेनै-
काऽर्थ्यं वा
(१०८) षष्ठी वाऽनादरे
(१०९) सप्तमी चाऽविभागे
निर्धारणे
(११०) क्रियामध्येऽध्व-काले
पञ्चमी च
(१११) अधिकेन भूयसस्ते
(११२) तृतीयाऽल्पीयसः
(११३) पृथग्-नाना पञ्चमी च
(११४) ऋते द्वितीया च
(११५) विना ते तृतीया च
(११६) तुल्यार्थैस्तृतीया-षष्ठ्यौ
(११७) द्वितीया-षष्ठ्यावे-
नेनाऽनञ्चेः
(११८) हेत्वर्थैस्तृतीयाद्याः
(११९) सर्वादेः सर्वाः
(१२०) असत्त्वारादर्थात् टा-
ङसि-ङ्यम्
(१२१) जात्याख्यायां नवैकोऽ-
संख्यो बहुवत्
(१२२) अविशेषणे द्वौ चाऽस्मदः
(१२३) फल्गुनी-प्रोष्ठपदस्य भे
(१२४) गुरावेकश्च

[द्वितीयाध्याये तृतीयः पादः]

(१) नमस्-पुरसो गतेः
क-ख-प-फि रः सः
(२) तिरसो वा
(३) पुंसः
(४) शिरो-ऽधसः पदे समासैक्ये
(५) अतः कृ-कमि-कंस-कुम्भ-
कुशा-कर्णी-पात्रेऽनव्ययस्य
(६) प्रत्यये
(७) रोः काम्ये
(८) नामिनस्तयोः षः
(९) निर्दुर्बहिराविष्प्रादुश्चतुराम्
(१०) सुचो वा
(११) वेसुसोऽपेक्षायाम्
(१२) नैकार्थेऽक्रिये
(१३) समासेऽसमस्तस्य
(१४) भ्रातुष्पुत्र-कस्कादयः
(१५) नाम्यन्तस्था-कवर्गात्
पदान्तः कृतस्य सः शिड्-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नान्तरेऽपि
(१६) समासेऽग्नेः स्तुतः
(१७) ज्योतिरायुर्म्यां च स्तोमस्य
(१८) मातृ-पितुः स्वसुः
(१९) अलुपि वा
(२०) नि-नद्याः स्नातेः कौशले
(२१) प्रतेः स्नातस्य सूत्रे
(२२) स्नानस्य नाम्नि
(२३) वेः स्रः
(२४) अभिनिष्टानः
(२५) गवि-युधेः स्थिरस्य
(२६) एत्यकः
(२७) भादितो वा
(२८) वि-कु-शमि-परेः स्थलस्य
(२९) कपेर्गोत्रे
(३०) गो-ऽम्बा-ऽऽम्ब-सव्या-ऽप-द्वि-त्रि-भूम्यग्नि-शेकु-शङ्कु-क्वङ्गु-मञ्जि-पुञ्जि-बर्हिः-परमे-दिवेः स्थस्य
(३१) निर्दुस्सोः सेध-सन्धि-साम्राम्
(३२) प्रष्ठोऽग्रगे
(३३) भीरुष्ठानादयः
(३४) ह्रस्वान्नाम्नस्ति
(३५) निसस्तपेऽनासेवायाम्
(३६) घस्-वसः
(३७) णिस्तोरेवाऽस्वद-स्विद-सहः षणि
(३८) सञ्जेर्वा
(३९) उपसर्गात् सुग्-सुव-सो-स्तु-स्तुभोऽदव्यप्यद्वित्वे
(४०) स्था-सेनि-सेध-सिच-सञ्जां द्वित्वेऽपि
(४१) अङप्रतिस्तब्ध-निस्तब्धे स्तम्भः
(४२) अवाच्चाऽऽश्रयोर्जा-ऽविदूरे
(४३) व्यवात् स्वनोऽशने
(४४) सदोऽप्रतेः परोक्षायां त्वादेः
(४५) स्वञ्जश्च
(४६) परि-नि-वेः सेवः
(४७) सय-सितस्य
(४८) असो-ऽसिवू-सह-स्सटाम्
(४९) स्तु-स्वञ्जश्चाऽटि नवा
(५०) निरभ्यनोश्च स्यन्दस्या-ऽप्राणिनि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(५१) वेः स्कन्दोऽक्तयोः
(५२) परेः
(५३) निर्नेः स्फुर-स्फुलोः
(५४) वेः
(५५) स्कभ्नः
(५६) निर्-दुः-सु-वेः सम-सूतेः
(५७) अवः स्वपः
(५८) प्रादुरुपसर्गाद्यस्वरेऽस्तेः
(५९) न स्सः
(६०) सिचो यङि
(६१) गतौ सेधः
(६२) सुगः स्य-सनि
(६३) र-षृवर्णान्नो ण एकपदे-ऽनन्त्यस्याऽल-च-ट-तवर्ग-श-सान्तरे
(६४) पूर्वपदस्थान्नाम्न्यगः
(६५) नसस्य
(६६) निष्प्रा-ऽग्रे-ऽन्तः-खदिर-काश्मर्या-ऽऽम्र-शरेक्षु-प्लक्ष-पीयुक्षाभ्यो वनस्य
(६७) द्वि-त्रिस्वरौषधि-वृक्षेभ्यो नवाऽनिरिकादिभ्यः
(६८) गिरिनद्यादीनाम्
(६९) पानस्य भावकरणे
(७०) देशे
(७१) ग्रामा-ऽग्रान्नियः
(७२) वाह्याद् वाहनस्य
(७३) अतोऽह्नस्य
(७४) चतुस्त्रेर्हायनस्य वयसि
(७५) वोत्तरपदान्तन-स्यादेरयुव-पक्वा-ऽह्नः
(७६) कवर्गैकस्वरवति
(७७) अदुरुपसर्गान्तरो ण-हिनु-मीनाऽऽनेः
(७८) नशः शः
(७९) नेर्ईमा-दा-पत-पद-नद-गद-वपी-वही-शमू-चिग्-याति-वाति-द्राति-प्साति-स्यति-हन्ति-देग्धौ
(८०) अक-खाद्यषान्ते पाठे वा
(८१) द्वित्वेऽप्यन्तेऽप्यनितेः, परेस्तु वा
(८२) हनः
(८३) व-मि वा
(८४) निंस-निक्ष-निन्दः कृति वा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(८५) स्वरात्
(८६) नाम्यादेरेव ने
(८७) व्यञ्जनादेर्नाम्युपान्त्याद् वा
(८८) णेर्वा
(८९) निर्विण्णः
(९०) न ख्या-पूग्-भू-भा-कम-गम-प्याय-वेपो णेश्च
(९१) देशेऽन्तरोऽयन-हनः
(९२) षात् पदे
(९३) पदेऽन्तरेऽनाङ्यतद्धिते
(९४) हनो घि
(९५) नृतेर्यङि
(९६) क्षुभ्नादीनाम्
(९७) पाठे धात्वादेर्णो नः
(९८) षः सोऽष्टचै-ष्ठिव-ष्वष्कः
(९९) ऋ-र ऌ-लं कृपोऽकृपीटादिषु
(१००) उपसर्गस्याऽयौ
(१०१) ग्रो यङि
(१०२) नवा स्वरे
(१०३) परेर्घा-ऽङ्क-योगे
(१०४) ऋफिडादीनां डश्च लः
(१०५) जपादीनां पो वः

[द्वितीयाध्याये चतुर्थः पादः]

(१) स्त्रियां नृतोऽस्वस्रादेर्ङीं
(२) अधातूदितः
(३) अश्वः
(४) ण-स्वरा-ऽघोषाद् वनो रश्च
(५) वा बहुव्रीहेः
(६) वा पादः
(७) ऊध्नः
(८) अशिशोः
(९) संख्यादेर्हायनाद् वयसि
(१०) दाम्नः
(११) अनो वा
(१२) नाम्नि
(१३) नोपान्त्यवतः
(१४) मनः
(१५) ताभ्यां वाऽऽप् ङित्
(१६) अजादेः
(१७) ऋचि पादः पात्पदे
(१८) आत्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(१९) गौरादिभ्यो मुख्यान्ङी
(२०) अणञेयेकण्-नञ्-स्नञ्-टिताम्
(२१) वयस्यनन्त्ये
(२२) द्विगोः समाहारात्
(२३) परिमाणात् तद्धित-लुक्यबिस्ता-ऽऽचित-कम्बल्यात्
(२४) काण्डात् प्रमाणादक्षेत्रे
(२५) पुरुषाद् वा
(२६) रेवत-रोहिणाद् भे
(२७) नीलात् प्राण्यौषध्योः
(२८) क्तात्र नाम्नि वा
(२९) केवल-मामक-भागधेय-पापा-ऽपर-समाना-ऽऽर्यकृत-सुमङ्गल- भेषजात्
(३०) भाज-गोण-नाग-स्थल-कुण्ड-काल-कुश-कामुक-कट-कबरात् पक्वा-ऽऽवपन-स्थूला-ऽकृत्रिमा-ऽमत्र-कृष्णा-ऽऽयसी-रिरंसु-श्रोणि-केशपाशे
(३१) नवा शोणादेः
(३२) इतोऽक्त्यर्थात्
(३३) पद्धतेः
(३४) शक्तेः शस्त्रे
(३५) स्वरादुतो गुणादखरोः
(३६) श्येतैत-हरित-भरत-रोहिताद् वर्णात् तो नश्च
(३७) क्रः पलिता-ऽसितात्
(३८) असह-नञ्-विद्यमान-पूर्वपदात् स्वाङ्गादक्रोडादिभ्यः
(३९) नासिकोदरौष्ठ-जङ्घा-दन्त-कर्ण-शृङ्गा-ऽङ्ग-गात्र-कण्ठात्
(४०) नख-मुखादनाम्नि
(४१) पुच्छात्
(४२) कबर-मणि-विष-शरादेः
(४३) पक्षाच्चोपमादेः
(४४) क्रीतात् करणादेः
(४५) क्तादल्पे
(४६) स्वाङ्गादेरकृत-मित-जात-प्रतिपन्नाद् बहुव्रीहेः
(४७) अनाच्छादजात्यादेर्नवा
(४८) पत्युर्नः
(४९) सादेः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(५०) सपत्न्यादौ
(५१) ऊढायाम्
(५२) पाणिगृहीतीति
(५३) पतिवत्न्यन्तर्वत्न्यौ भार्या-गर्भिण्योः
(५४) जातेरयान्त-नित्यस्त्री-शूद्रात्
(५५) पाक-कर्ण-पर्ण-वालान्तात्
(५६) असत्-काण्ड-प्रान्त-शतैकाश्चः पुष्पात्
(५७) असम्-भस्त्रा-ऽजिनैक-शण-पिण्डात् फलात्
(५८) अनञो मूलात्
(५९) धवाद् योगादपालकान्तात्
(६०) पूतक्रतु-वृषाकप्यग्नि-कुसित-कुसिदादै च
(६१) मनोरौ च वा
(६२) वरुणेन्द-रुद्र-भव-शर्व-मृडादान् चान्तः
(६३) मातुला-ऽऽचार्यो-पाध्यायाद् वा
(६४) सूर्याद् देवतायां वा
(६५) यव-यवना-ऽरण्य-हिमाद् दोष-लिप्युरु-महत्त्वे
(६६) आर्य-क्षत्रियाद् वा
(६७) यञो डायन् च वा
(६८) लोहितादिशकलान्तात्
(६९) षा-ऽवटाद् वा
(७०) कौरव्य-माण्डूका-ऽऽसुरेः
(७१) इञ इतः
(७२) नुर्जातेः
(७३) उतोऽप्राणिनश्चाऽयु-रज्ज्वादिभ्य ऊङ्
(७४) बाह्वन्त-कद्रु-कमण्डलोर्नाम्नि
(७५) उपमान-सहित-संहित-सह-शफ-वाम-लक्ष्मणाद्यूरोः
(७६) नारी-सखी-पङ्गू-श्वश्रू
(७७) यूनस्तिः
(७८) अनार्षे वृद्धेऽणिञो बहुस्वर-गुरूपान्त्यस्याऽन्तस्य ष्यः
(७९) कुलाख्यानाम्
(८०) क्रौड्यादीनाम्
(८१) भोज-सूतयोः क्षत्रिया-युवत्योः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(८२) दैवयज्ञि-शौचिवृक्षि-सात्यमुग्रि-काण्ठेविद्धेर्वा
(८३) ष्या पुत्र-पत्योः केवलयो-रिच् तत्पुरुषे
(८४) बन्धौ बहुव्रीहौ
(८५) मात-मातृ-मातृके वा
(८६) अस्य ङ्यां लुक्
(८७) मत्स्यस्य यः
(८८) व्यञ्जनात् तद्धितस्य
(८९) सूर्या-ऽऽगस्त्ययोरीये च
(९०) तिष्य-पुष्ययोर्भाणि
(९१) आपत्यस्य क्य-च्व्योः
(९२) तद्धितयस्वरेऽनाति
(९३) बिल्वकीयादेरीयस्य
(९४) न राजन्य-मनुष्ययोरके
(९५) ङ्यादेर्गौणस्याकिपस्त-द्धितलुक्यगोणी-सूच्योः
(९६) गोश्चान्ते ह्रस्वोऽनंशिसमा-सेयोबहुव्रीहौ
(९७) क्लीबे
(९८) वेदूतोऽनव्यय-व्यृदीच्-ङीयुवः पदे
(९९) ङ्यापो बहुलं नाम्नि
(१००) त्वे
(१०१) भ्रुवोऽच्च कुंस-कुटचोः
(१०२) मालेषीकेष्टकस्याऽन्ते-ऽपि भारि-तूल-चिते
(१०३) गोण्या मेये
(१०४) ङ्यादीदूतः के
(१०५) न कचि
(१०६) नवाऽऽपः
(१०७) इच्चाऽपुंसोऽनित्क्याप्परे
(१०८) स्व-ज्ञा-ऽज-भस्त्रा-ऽधातुत्ययकात्
(१०९) द्व्येष-सूत-पुत्र-वृन्दारस्य
(११०) वौ वर्त्तिका
(१११) अस्याऽयत्-तत्-क्षिपकादीनाम्
(११२) नरिका-मामिका
(११३) तारका-वर्णका-ऽष्टका ज्योतिस्-तान्तव-पितृदेवत्ये

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[तृतीयाध्याये प्रथमः पादः]

(१) धातोः पूजार्थस्वति-
गतार्थाधिपर्यतिक्रमार्था-
तिवर्जः प्रादिरुपसर्गः प्राक् च
(२) ऊर्याद्यनुकरण-च्वि-डाचश्च
गतिः
(३) कारिका स्थित्यादौ
(४) भूषा-ऽऽदर-क्षेपेऽलं-
सद-ऽसत्
(५) अग्रहा-ऽनुपदेशेऽन्तरदः
(६) कणे-मनस् तृप्तौ
(७) पुरोऽस्तमव्ययम्
(८) गत्यर्थ-वदोऽच्छः
(९) तिरोऽन्तर्द्धौ
(१०) कृगो नवा
(११) मध्ये-पदे-निवचने-
मनस्युरस्यनत्याधाने
(१२) उपाजेऽन्वाजे
(१३) स्वाम्येऽधिः
(१४) साक्षादादिश्च्व्यर्थे
(१५) नित्यं हस्ते-पाणावुद्ग्राहे
(१६) प्राध्वं बन्धे
(१७) जीविकोपनिषदौपम्ये
(१८) नाम नाम्नैकार्थ्ये समासो
बहुलम्
(१९) सुज्-वार्थे संख्या संख्येये
संख्यया बहुव्रीहिः
(२०) आसन्ना-ऽदूरा-ऽधिका-
ऽध्यर्द्धा-ऽर्द्धादिपूरणं
द्वितीयाद्यन्यार्थे
(२१) अव्ययम्
(२२) एकार्थं चाऽनेकं च
(२३) उष्ट्रमुखादयः
(२४) सहस्तेन
(२५) दिशो रूढ्याऽन्तराले
(२६) तत्राऽऽदाय मिथस्तेन
प्रहृत्येति सरूपेण युद्धेऽ-
व्ययीभावः
(२७) नदीभिर्नाम्नि
(२८) सङ्ख्या समाहारे
(२९) वंश्येन पूर्वार्थे
(३०) पारे-मध्ये-ऽग्रे-ऽन्तः
षष्ठ्या वा
(३१) यावदियत्त्वे
(३२) पर्यपा-ऽऽङ्-बहिरच्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पञ्चम्या
(३३) लक्षणेनाऽभि-
प्रत्याभिमुख्ये
(३४) दैर्घ्येऽनुः
(३५) समीपे
(३६) तिष्ठद्ग्वित्यादयः
(३७) नित्यं प्रतिनाऽल्पे
(३८) सङ्ख्या-ऽक्ष-शलाकं
परिणा द्यूतेऽन्यथावृत्तौ
(३९) विभक्ति-समीप-समृद्धि-
व्यृद्ध्यर्थाभावा-ऽत्यया-
ऽसंप्रति-पश्चात्-क्रम-
ख्याति-युगपत्-सदृक्-
सम्पत्-साकल्या-
ऽन्तेऽव्ययम्
(४०) योग्यता-वीप्सा-
ऽर्थानतिवृत्ति-सादृश्ये
(४१) यथाऽथा
(४२) गति-कन्यस्तत्पुरुषः
(४३) दुर्निन्दा-कृच्छ्रे
(४४) सुः पूजायाम्
(४५) अतिरतिक्रमे च
(४६) आङल्पे
(४७) प्रात्यव-परि-निरादयो
गत-क्रान्त-क्रुष्ट-ग्लान-
क्रान्ताद्यर्थाः प्रथमाद्यन्तैः
(४८) अव्ययं प्रवृद्धादिभिः
(४९) ङस्युक्तं कृता
(५०) तृतीयोक्तं वा
(५१) नञ्
(५२) पूर्वा-ऽपरा-ऽधरोत्त-
रमभिन्नेनांशिना
(५३) सायाह्नादयः
(५४) समेंऽशेऽर्द्धं नवा
(५५) जरत्यादिभिः
(५६) द्वि-त्रि-चतुष्पूरणा-
ऽग्रादयः
(५७) कालो द्विगौ च मेयैः
(५८) स्वयं-सामी क्तेन
(५९) द्वितीया खट्वा क्षेपे
(६०) कालः
(६१) व्याप्तौ
(६२) श्रितादिभिः
(६३) प्राप्ता-ऽऽपन्नौ तयाऽच
(६४) ईषद् गुणवचनैः
(६५) तृतीया तत्कृतैः
(६६) चतस्रार्द्धम्
(६७) ऊनार्थपूर्वाद्यैः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(६८) कारकं कृता
(६९) नविंशत्यादिनैकोऽचान्तः
(७०) चतुर्थी प्रकृत्या
(७१) हितादिभिः
(७२) तदर्थार्थेन
(७३) पञ्चमी भयाद्यैः
(७४) क्तेनाऽसत्त्वे
(७५) परःशतादिः
(७६) षष्ठचयत्नाच्छेषे
(७७) कृति
(७८) याजकादिभिः
(७९) पत्ति-रथौ गणकेन
(८०) सर्वपश्चादादयः
(८१) अकेन क्रीडा-ऽऽजीवे
(८२) न कर्त्तरि
(८३) कर्मजा तृचा च
(८४) तृतीयायाम्
(८५) तृप्तार्थ-पूरणा-ऽव्यया-ऽतृश्-शत्रानशा
(८६) ज्ञानेच्छा-ऽर्चार्था-ऽऽधारक्तेन
(८७) अस्वस्थगुणैः
(८८) सप्तमी शौण्डाद्यैः
(८९) सिंहाद्यैः पूजायाम्
(९०) काकाद्यैः क्षेपे
(९१) पात्रेसमितेत्यादयः
(९२) क्तेन
(९३) तत्राहोरात्रांशम्
(९४) नाम्नि
(९५) कृद्येनाऽऽवश्यके
(९६) विशेषणं विशेष्येणैकार्थं कर्मधारयश्च
(९७) पूर्वकालैक-सर्व-जरत्-पुराण-नव-केवलम्
(९८) दिगधिकं संज्ञा-तद्धितोत्तरपदे
(९९) संख्या समाहारे च द्विगुश्चाऽनाम्ययम्
(१००) निन्द्यं कुत्सनैरपापाद्यैः
(१०१) उपमानं सामान्यैः
(१०२) उपमेयं व्याघ्राद्यैः साम्यानुक्तौ
(१०३) पूर्वा-ऽपर-प्रथम-चरम-जघन्य-समान-मध्य-मध्यम-वीरम्
(१०४) श्रेण्यादि कृताद्यैश्च्व्यर्थे
(१०५) क्तं नञादिभिन्नैः
(१०६) सेड् नाऽनिटा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(१०७) सन्महत्परमोत्तमोत्कृष्टं पूजायाम्
(१०८) वृन्दारक-नाग-कुञ्जरैः
(१०९) कतर-कतमौ जातिप्रश्ने
(११०) किं क्षेपे
(१११) पोटा-युवति-स्तोक-कतिपय-गृष्टि-धेनु-वशा- वेहद्-बष्कयणी-प्रवक्तृ- श्रोत्रिया-ऽध्यायक-धूर्त्त-प्रशंसारूढैर्जातिः
(११२) चतुष्पाद् गर्भिण्या
(११३) युवा खलति-पलित-जरद्-वलिनैः
(११४) कृत्य-तुल्याख्यमजात्या
(११५) कुमारः श्रमणादिना
(११६) मयूरव्यंसकेत्यादयः
(११७) चार्थे द्वन्द्वः सहोक्तौ
(११८) समानामर्थेनैकः शेषः
(११९) स्यादावसंख्येयः
(१२०) त्यदादिः
(१२१) भ्रातृ-पुत्राः स्वसृ-दुहितृभिः
(१२२) पिता मात्रा वा
(१२३) श्वशुरः श्वश्रूभ्यां वा
(१२४) वृद्धो यूना तन्मात्रभेदे
(१२५) स्त्रीपुंवच्च
(१२६) पुरुषः स्त्रिया
(१२७) ग्राम्याशिशुद्विशफसंघे स्त्री प्रायः
(१२८) क्लीबमन्येनैकं च वा
(१२९) पुष्यार्थाद् भे पुनर्वसुः
(१३०) विरोधिनामद्रव्याणां नवा द्वन्द्वः स्वैः
(१३१) अश्ववडव-पूर्वापरा-ऽधरोत्तराः
(१३२) पशु-व्यञ्जनानाम्
(१३३) तरु-तृण-धान्य-मृग-पक्षिणां बहुत्वे
(१३४) सेनाङ्ग-क्षुद्रजन्तूनाम्
(१३५) फलस्य जातौ
(१३६) अप्राणि-पश्वादेः
(१३७) प्राणि-तूर्याङ्गाणाम्
(१३८) चरणस्य स्थेणो-ऽद्यतन्यामनुवादे
(१३९) अक्लीबेऽध्वर्युक्रतोः
(१४०) निकटपाठस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(१४१) नित्यवैरस्य
(१४२) नदी-देश-पुरां विलिङ्गा-
नाम्
(१४३) पात्यशूद्रस्य
(१४४) गवाश्वादिः
(१४५) न दधिपयआदिः
(१४६) संख्याने
(१४७) वाऽन्तिके
(१४८) प्रथमोक्तं प्राक्
(१४९) राजदन्तादिषु
(१५०) विशेषण-सर्वादि-संख्यं
बहुव्रीहौ
(१५१) क्ताः
(१५२) जाति-काल-सुखादेर्नवा
(१५३) आहिताग्न्यादिषु
(१५४) प्रहरणात्
(१५५) न सप्तमीन्द्रादिभ्यश्च
(१५६) गड्वादिभ्यः
(१५७) प्रियः
(१५८) कडारादयः कर्मधारये
(१५९) धर्मार्थादिषु द्वन्द्वे
(१६०) लघ्वक्षरा-ऽसखीदुत्-
स्वराद्यदल्पस्वरा-
ऽर्च्यमेकम्
(१६१) मास-वर्ण-भ्रात्रऽनुपूर्वम्
(१६२) भर्तुतुल्यस्वरम्
(१६३) संख्या समासे

[तृतीयाध्याये द्वितीयः पादः]

(१) परस्परा-ऽन्योन्येतरेतरस्याम्
स्यादेर्वाऽपुंसि
(२) अमव्ययीभावस्याऽतोऽ-
पञ्चम्याः
(३) वा तृतीयायाः
(४) सप्तम्या वा
(५) ऋद्ध-नदी-वंश्यस्य
(६) अनतो लुप्
(७) अव्ययस्य
(८) ऐकार्थ्ये
(९) न नाम्येकस्वरात्
खित्युत्तरपदेऽमः
(१०) असत्त्वे ङसेः
(११) ब्राह्मणाच्छंसी

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(१२) ओजो-ऽञ्जः-सहो-ऽम्भस्-तमस्-तपसष्टः
(१३) पुंजनुषोऽनुजा-ऽन्धे
(१४) आत्मनः पूरणे
(१५) मनसश्चाऽऽज्ञायिनि
(१६) नाम्नि
(१७) परा-ऽऽत्मभ्यां डेः
(१८) अद्-व्यञ्जनात् सप्तम्या बहुलम्
(१९) प्राक्कारस्य व्यञ्जने
(२०) तत्पुरुषे कृति
(२१) मध्या-ऽन्ताद् गुरौ
(२२) अमूर्द्ध-मस्तकात् स्वाङ्गाद् कामे
(२३) बन्धे घञि नवा
(२४) कालात् तन-तर-तम-काले
(२५) शय-वासि-वासेष्वकालात्
(२६) वर्ष-क्षर-वरा-ऽप्-सरः-शरोरो-मनसो जे
(२७) द्यु-प्रावृड्-वर्षा-शरत्-कालात्
(२८) अपो य-योनि-मति-चरे
(२९) नेन्-सिद्ध-स्थे
(३०) षष्ठ्याः क्षेपे
(३१) पुत्रे वा
(३२) पश्यद्-वाग्-दिशो हर-युक्ति-दण्डे
(३३) अदसोऽकञायनणोः
(३४) देवानांप्रियः
(३५) शेप-पुच्छ-लाङ्गूलेषु नाम्नि शुनः
(३६) वाचस्पति-वास्तोष्पति-दिवस्पति-दिवोदासम्
(३७) ऋतां विद्या-योनिसम्बन्धे
(३८) स्वसृ-पत्योर्वा
(३९) आ द्वन्द्वे
(४०) पुत्रे
(४१) वेदसहश्रुताऽवायु-देवतानाम्
(४२) ई षोम-वरुणेऽग्नेः
(४३) इर्वृद्धिमत्यविष्णौ
(४४) दिवो द्यावा
(४५) दिवस्-दिवः पृथिव्यां वा
(४६) उषासोषसः
(४७) मातरपितरं वा
(४८) वर्चस्कादिष्ववस्करादयः
(४९) परतः स्त्री पुंवत्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्त्र्येकार्थेऽनूङ्
(५०) क्यङ्-मानि-पित्तद्धिते
(५१) जातिश्च णि-तद्धितय-स्वरे
(५२) एयेऽग्नायी
(५३) नाऽपू-प्रियाऽऽदौ
(५४) तद्धिताऽककोपान्त्य-पूरण्याख्याः
(५५) तद्धितः स्वरवृद्धिहेतुररक्त-विकारे
(५६) स्वाङ्गान्ङीर्जातिश्चाऽमानिनि
(५७) पुंवत् कर्म्मधारये
(५८) रिति
(५९) त्व-ते गुणः
(६०) च्वौ क्वचित्
(६१) सर्वादयोऽस्यादौ
(६२) मृगक्षीरादिषु वा
(६३) ऋदुदित् तर-तम-रूप-कल्प-ब्रुव-चेलड्-गोत्र-मत-हते वा ह्रस्वश्च
(६४) ङ्यः
(६५) भोगवद्-गौरिमतोर्नाम्नि
(६६) नवैकस्वराणाम्
(६७) ऊङः
(६८) महतः कर-घास-विशिष्टे डाः
(६९) स्त्रियाम्
(७०) जातीयैकार्थेऽञ्चेः
(७१) न पुंवन्निषेधे
(७२) इच्यस्वरे दीर्घ आच्च
(७३) हविष्यष्टनः कपाले
(७४) गवि युक्ते
(७५) नाग्नि
(७६) कोटर-मिश्रक-सिध्रक-पुरग-सारिकस्य वणे
(७७) अञ्चनादीनां गिरौ
(७८) अनजिरादिबहुस्वर-शरादीनां मतौ
(७९) ऋषौ विश्वस्य मित्रे
(८०) नरे
(८१) वसु-राटोः
(८२) वलच्यपित्रादेः
(८३) चितेः कचि
(८४) स्वामिचिह्नस्याऽविष्टाऽष्ट-पञ्च-भिन्न-च्छिन्न-च्छिद्र-स्रुव-स्वस्तिकस्य कर्णे
(८५) गति-कारकस्य नहि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृति-वृषि-व्यधि-रुचि-सहि-तनौ कौ
(८६) घञ्युपसर्गस्य बहुलम्
(८७) नामिनः काशे
(८८) दस्ति
(८९) अपील्वादेर्वहे
(९०) शुनः
(९१) एकादश-षोडश-षोडत्-षोढा-षड्ढा
(९२) द्वित्र्यष्टानां द्वा-त्रयो-ऽष्टाः प्राक् शतादनशीति-बहुव्रीहौ
(९३) चत्वारिंशदादौ वा
(९४) हृदयस्य हृल्लास-लेखा-ऽण्-ये
(९५) पदः पादस्याऽऽज्याति-गोपहते
(९६) हिम-हति-काषि-ये पद्
(९७) ऋचः श्शसि
(९८) शब्द-निष्क-घोष-मिश्रे वा
(९९) नस् नासिकायास्तः क्षुद्रे
(१००) येऽवर्णे
(१०१) शिरसः शीर्षन्
(१०२) केशे वा
(१०३) शीर्षः स्वरे तद्धिते
(१०४) उदकस्योदः पेषं-धि-वास-वाहने
(१०५) वैकव्यञने पूर्वे
(१०६) मन्थौदन-सक्तु-बिन्दु-वज्र-भार-हार-वीवध-गाहे वा
(१०७) नाम्युत्तरपदस्य च
(१०८) ते लुग्वा
(१०९) द्व्यन्तरनवर्णोपसर्गादप ईप्
(११०) अनोर्देशे उप्
(१११) खित्यनव्यया-ऽरुषो मोऽन्तो ह्रस्वश्च
(११२) सत्या-ऽगदा-ऽस्तोः कारे
(११३) लोकम्पृण-मध्यन्दिना-ऽनभ्याशमित्यम्
(११४) भ्राष्ट्रा-ऽग्नेरिन्धे
(११५) अगिलाद् गिल-गिलगिलयोः
(११६) भद्रोष्णात् करणे
(११७) नवाऽखित्कृदन्ते रात्रेः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(११८) धेनोर्भव्यायाम्
(११९) अषष्ठीतृतीयादन्याद् दोऽर्थे
(१२०) आशीराशा-ऽऽस्थिता-ऽऽस्थोत्सुकोति-रागे
(१२१) ईय-कारके
(१२२) सर्वादि-विश्वगु-देवाड्डद्रिः क्वचञ्चौ
(१२३) सह-समः सधि्र-समि
(१२४) तिरसस्तिर्यति
(१२५) नञत्
(१२६) त्यादौ क्षेपे
(१२७) नगोऽप्राणिनि वा
(१२८) नखादयः
(१२९) अन् स्वरे
(१३०) कोः कत् तत्पुरुषे
(१३१) रथ-वदे
(१३२) तृणे जातौ
(१३३) कत्रिः
(१३४) काऽक्ष-पथोः
(१३५) पुरुषे वा
(१३६) अल्पे
(१३७) का-कवौ वोष्णे
(१३८) कृत्येऽवश्यमो लुक्
(१३९) समस्तत-हिते वा
(१४०) तुमश्च मनः कामे
(१४१) मांसस्याऽनड्-वञि पचि नवा
(१४२) दिक्शब्दात् तीरस्य तारः
(१४३) सहस्य सोऽन्यार्थे
(१४४) नाग्नि
(१४५) अदृश्या-ऽधिके
(१४६) अकालेऽव्ययीभावे
(१४७) ग्रन्थान्ते
(१४८) नाऽऽशिष्यगो-वत्स-हले
(१४९) समानस्य धर्मादिषु
(१५०) सब्रह्मचारी
(१५१) दृक्-दृश-दृक्षे
(१५२) अन्य-त्यदादेराः
(१५३) इदं-किमीत्-की
(१५४) अनञः क्त्वो यप्
(१५५) पृषोदरादयः
(१५६) वाऽवाऽप्योस्तनि-क्री धाग्-नहोर्व-पी

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[तृतीयाध्याये तृतीयः पादः]

(१) वृद्धिराऽऽरैदौत्
(२) गुणोऽरेदोत्
(३) क्रियार्थो धातुः
(४) न प्रादिरप्रत्ययः
(५) अवौ दा-धौ दा
(६) वर्तमाना–तिव् तस् अन्ति, सिव् थस् थ , मिव् वस् मस् ; ते आते अन्ते , से आथे ध्वे , ए वहे महे
(७) सप्तमी–यात् याताम् युस् , यास् यातम् यात , याम् याव याम ; ईत ईयाताम् ईरन् , ईथास् ईयाथाम् ईध्वम् , ईय ईवहि ईमहि
(८) पञ्चमी–तुव् ताम् अन्तु , हि तम् त , आनिव् आवव् आमव् ; ताम् आताम् अन्ताम् , स्व आथाम् ध्वम् , ऐव् आवहैव् आमहैव्
(९) ह्यस्तनी–दिव् ताम् अन् , सिव् तम् त , अम्व् व म ; त आताम् अन्त , थास् आथाम् ध्वम् , इ वहि महि
(१०) एताः शितः
(११) अद्यतनी–दि ताम् अन् , सि तम् त , अम् व म ; त आताम् अन्त , थास् आथाम् ध्वम् , इ वहि महि
(१२) परोक्षा–णव् अतुस् उस् , थव् अथुस् अ , णव् व म ; ए आते इरे , से आथे ध्वे , ए वहे महे
(१३) आशीः– क्यात् क्यास्ताम् क्यासुस् , क्यास् क्यास्तम् क्यास्त , क्यासम् क्यास्व क्यास्म ; सीष्ट सीयास्ताम् सीरन् , सीष्ठास् सीया स्थाम् सीध्वम् , सीय सीवहि सीमहि
(१४) श्वस्तनी- ता तारौ तारस् , तासि तास्थस् तास्थ , तास्मि तास्वस् तास्मस् ; ता तारौ तारस् , तासे तासाथे ताध्वे , ताहे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तास्वहे तास्महे

(१५) भविष्यन्ती- स्यति स्यतस् स्यन्ति , स्यसि स्यथस् स्यथ , स्यामि स्यावस् स्यामस् ; स्यते स्येते स्यन्ते , स्यसे स्येथे स्यध्वे , स्ये स्यावहे स्यामहे

(१६) क्रियातिपत्तिः- स्यत् स्यताम् स्यन् , स्यस् स्यतम् स्यत , स्यम् स्याव स्याम ; स्यत स्येताम् स्यन्त , स्यथास् स्येथाम् स्यध्वम् , स्ये स्यावहि स्यामहि

(१७) त्रीणि त्रीण्यन्ययुष्मदस्मदि

(१८) एक-द्वि-बहुषु

(१९) नवाऽऽद्यानि शतृ-क्वसू च परस्मैपदम्

(२०) पराणि काना-ऽऽनशौ चाऽऽत्मनेपदम्

(२१) तत् साप्या-ऽनाप्यात् कर्म-भावे , कृत्य-क्त-खलर्थाश्च

(२२) इङितः कर्त्तरि

(२३) क्रियाव्यतिहारेऽगति-हिंसा-शब्दार्थ-हसो हृ-वहश्चाऽनन्योन्यार्थे

(२४) निविशः

(२५) उपसर्गादस्योहो वा

(२६) उत्-स्वराद् युजेरयज्ञतत्पात्रे

(२७) परि-व्यवात् क्रियः

(२८) परा-वेर्जेः

(२९) समः क्ष्णोः

(३०) अपस्किरः

(३१) उदश्वरः साप्यात्

(३२) समस्तृतीयया

(३३) क्रीडोऽकूजने

(३४) अन्वाङ्-परेः

(३५) शप उपलम्भने

(३६) आशिषि नाथः

(३७) भुनजोऽत्राणे

(३८) हृगो गतताच्छील्ये

(३९) पूजा-ऽऽचार्यक-भृत्युत्क्षेप-ज्ञान-विग-णन-व्यये नियः

(४०) कर्तृस्थामूर्त्ताऽऽप्यात्

(४१) शदेः शिति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(४२) म्रियतेरद्यतन्याशिषि च
(४३) क्यङ्षो नवा
(४४) द्युद्भ्योऽद्यतन्याम्
(४५) वृद्भ्यः स्य-सनोः
(४६) कृपः श्वस्तन्याम्
(४७) क्रमोऽनुपसर्गात्
(४८) वृत्ति-सर्ग-तायने
(४९) परोपात्
(५०) वेः स्वार्थे
(५१) प्रोपादारम्भे
(५२) आङो ज्योतिरुद्गमे
(५३) दागोऽस्वास्यप्रसार-विकासे
(५४) नु-प्रच्छः
(५५) गमेः क्षान्तौ
(५६) ह्वः स्पर्द्धे
(५७) सं-नि-वेः
(५८) उपात्
(५९) यमः स्वीकारे
(६०) देवार्चा-मैत्री-सङ्गम-पथिकर्तृक-मन्त्रकरणे स्थः
(६१) वा लिप्सायाम्
(६२) उदोऽनूर्ध्वेहे
(६३) सं-वि-प्रा-ऽवात्
(६४) ज्ञीप्सा-स्थेये
(६५) प्रतिज्ञायाम्
(६६) समो गिरः
(६७) अवात्
(६८) निह्नवे ज्ञः
(६९) सं-प्रतेरस्मृतौ
(७०) अननोः सनः
(७१) श्रुवोऽनाङ्-प्रतेः
(७२) स्मृ-दृशः
(७३) शको जिज्ञासायाम्
(७४) प्राग्वत्
(७५) आमः कृगः
(७६) गन्धना-ऽवक्षेप-सेवा-साहस-प्रतियत्न-प्रकथनोपयोगे
(७७) अधेः प्रसहने
(७८) दीप्ति-ज्ञान-यत्न-विम-त्युपसंभाषोपमन्त्रणे वदः
(७९) व्यक्तवाचां सहोक्तौ
(८०) विवादे वा
(८१) अनोः कर्मण्यसति
(८२) ज्ञः
(८३) उपात् स्थः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(८४) समो गमृच्छि-प्रच्छि-श्रु-वित्-स्वरत्यर्त्ति-दृशः
(८५) वेः कृगः शब्दे चाऽनाशे
(८६) आङो यम-हनः, स्वेऽङ्गे च
(८७) व्युदस्तपः
(८८) अणिक्कर्मणिक्कर्तृ-काण्णिगोऽस्मृतौ
(८९) प्रलम्भे गृधि-वञ्चेः
(९०) लीङ्-लिनोऽर्चा-ऽभिभवे चाऽऽचाकर्त्तर्यपि
(९१) स्मिङः प्रयोक्तुः स्वार्थे
(९२) बिभेतेर्भीष् च
(९३) मिथ्याकृगोऽभ्यासे
(९४) परिमुहा-ऽऽयमा-ऽऽयस-पा-ट्धे-वद-वस-दमा-ऽद-रुच-नृतः फलवति
(९५) ई-गितः
(९६) ज्ञोऽनुपसर्गात्
(९७) वदोऽपात्
(९८) समुदाङो यमेरग्रन्थे
(९९) पदान्तरगम्ये वा
(१००) शेषात् परस्मै
(१०१) परानोः कृगः
(१०२) प्रत्यभ्यतेः क्षिपः
(१०३) प्राद् वहः
(१०४) परेर्मृषश्च
(१०५) व्याङ्-परे रमः
(१०६) वोपात्
(१०७) अणिगि प्राणिकर्तृका-नाप्याण्णिगः
(१०८) चल्याहारार्थेङ्-बुध-युध-प्रु-द्रु-स्रु-नश-जनः

[तृतीयाध्याये चतुर्थः पादः]

(१) गुपौ-धूप-विच्छि-पणि-पनेरायः
(२) कमेर्णिङ्
(३) ऋतेर्डीयः
(४) अशवि ते वा
(५) गुप्-तिजो गर्हा-क्षान्तौ सन्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(६) कितः संशय-प्रतीकारे
(७) शान्-दान्-मान्-बधान्निशाना-ऽऽर्जव-विचार-वैरूप्ये दीर्घश्चेतः
(८) धातोः कण्ड्वादेर्यक्
(९) व्यञनादेरेकस्वराद् भृशा-ऽऽभीक्ष्ण्ये यङ् वा
(१०) अटचर्त्ति-सूत्रि-मूत्रि-सूच्यशूर्णोः
(११) गत्यर्थात् कुटिले
(१२) गृ-लुप-सद-चर-जप-जभ-दश-दहो गर्ह्ये
(१३) न गृणा-शुभ-रुचः
(१४) बहुलं लुप्
(१५) अचि
(१६) नोतः
(१७) चुरादिभ्यो णिच्
(१८) युजादेर्नवा
(१९) भूङः प्राप्तौ णिङ्
(२०) प्रयोक्तृव्यापारे णिग्
(२१) तुमर्हादिच्छायां सन्नतत्सनः
(२२) द्वितीयायाः काम्यः
(२३) अमाव्ययात् क्यन् च
(२४) आधाराच्चोपमानादाचारे
(२५) कर्तुः किप्, गल्भ-क्लीब-होडात्तु डित्
(२६) क्यङ्
(२७) सो वा लुक् च
(२८) ओजोऽप्सरसः
(२९) च्व्यर्थे भृशादेः स्तोः
(३०) डाच्-लोहितादिभ्यः षित्
(३१) कष्ट-कक्ष-कृच्छ्र-सत्र-गहनाय पापे क्रमणे
(३२) रोमन्थाद् व्याप्यादुच्चर्वणे
(३३) फेनोष्म-बाष्प-धूमादुद्गमने
(३४) सुखादेरनुभवे
(३५) शब्दादेः कृतौ वा
(३६) तपसः क्यन्
(३७) नमो-वरिवश्चित्रङोऽर्चा-सेवा-ऽऽश्चर्ये
(३८) अज्ञान्निरसने णिङ्
(३९) पुच्छादुत्-परि-व्यसने
(४०) भाण्डात् समाचितौ
(४१) चीवरात् परिधा-ऽर्जने
(४२) णिज्बहुलं नाम्नः कृगादिषु
(४३) व्रताद् भुजि-तन्निवृत्त्योः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(४४) सत्या-ऽर्थ-वेदस्याः
(४५) श्वेताश्वा-ऽश्वतर-गालोडिता-ऽऽह्वरकस्या-ऽश्व-तरेत-कलुक्
(४६) धातोरनेकस्वरादाम् परोक्षायाः कृभ्वस्ति चानु तदन्तम्
(४७) दया-ऽया-ऽऽस्-कासः
(४८) गुरुनाम्यादेरनृच्छूण्णोः
(४९) जागृष-समिन्धेर्नवा
(५०) भी-ह्री-भृ-होस्तिव्वत्
(५१) वेत्तेः कित्
(५२) पञ्चम्याः कृग्
(५३) सिजद्यतन्याम्
(५४) स्पृश-मृश-कृष-तृप-दृपो वा
(५५) ह-शिटो नाम्युपान्त्याद-दृशोऽनिटः सक्
(५६) स्लिषः
(५७) नाऽसत्त्वाश्लेषे
(५८) णि-श्रि-द्रु-स्रु-कमः कर्त्तरि ङः
(५९) ट्धे-श्वेर्वा
(६०) शास्त्यसू-वक्ति-ख्यातेरङ्
(६१) सर्त्त्यर्तेर्वा
(६२) ह्वा-लिप्-सिचः
(६३) वाऽऽत्मने
(६४) लदिद्-द्युतादि-पुष्यादेः परस्मै
(६५) ऋदिच्छ्वि-स्तम्भू-म्रुचू-म्लुचू-ग्रुचू-ग्लुचू-ग्लुञ्चू-ग्रो वा
(६६) ञिच् ते पदस्तलुक् च
(६७) दीप-जन-बुधि-पूरि-ताय-प्यायो वा
(६८) भाव-कर्मणोः
(६९) स्वर-ग्रह-दृश-हन्म्यः स्य-सिजाशीः-श्वस्तन्यां ञिट् वा
(७०) क्यः शिति
(७१) कर्त्तर्यनद्भ्यः शव्
(७२) दिवादेः श्यः
(७३) भ्रास-भ्लास-भ्रम-क्रम-क्लम-त्रसि-त्रुटि-लषि-यसि-संयसेर्वा
(७४) कुषि-रञ्जेर्व्याप्ये वा परस्मै च
(७५) स्वादेः श्नुः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(७६) वाऽक्षः
(७७) तक्षः स्वार्थे वा
(७८) स्तम्भू-स्तुम्भू-स्कम्भू-स्कुम्भू-स्कोः श्ना च
(७९) क्रचादेः
(८०) व्यञ्जनाच्छ्नाहेरानः
(८१) तुदादेः शः
(८२) रुधां स्वराच्छ्नो नलुक् च
(८३) कृग्-तनादेरुः
(८४) सृजः श्राद्धे ञि-क्या-ऽऽत्मने तथा
(८५) तपेस्तपःकर्मकात्
(८६) एकधातौ कर्मक्रिययैका-कर्मक्रिये
(८७) पचि-दुहेः
(८८) न कर्मणा ञिच्
(८९) रुधः
(९०) स्वर-दुहो वा
(९१) तपः कर्त्रनुतापे च
(९२) णि-स्नु-श्र्यात्मनेपदा-कर्मकात्
(९३) भूषार्थ-सन्-किरादिभ्यश्च ञि-क्यौ
(९४) करणक्रियया क्वचित्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[चतुर्थाध्याये प्रथमः पादः]

(१)द्विर्धातुः परोक्षा-डे , प्राक् तु स्वरे स्वरविधेः
(२) आद्योंऽश एकस्वरः
(३) सन्-यङश्च
(४) स्वरादेर्द्वितीयः
(५) न ब-द-नं संयोगादिः
(६) अयि रः
(७) नाम्नो द्वितीयाद् यथेष्टम्
(८) अन्यस्य
(९) कण्ड्वादेस्तृतीयः
(१०) पुनरेकेषाम्
(११) यिः सन् वेर्ष्यः
(१२) हवः शिति
(१३) चराचर-चलाचल-पतापत-वदावद-घनाघन-पाटूपटं वा
(१४) चिक्लिद-चक्नसम्
(१५) दाश्वत्-साह्वत्-मीढ्वत्
(१६) ज्ञप्यापो ज्ञीपीप् , न च द्विः , सि सनि
(१७) ऋध ईर्त्
(१८) दम्भो धिप्-धीप्
(१९) अव्याप्यस्य मुचेर्मोंग्वा
(२०) मि-मी-मा-दामित् स्वरस्य
(२१) रभ-लभ-शक-पत-पदामिः
(२२) राधेर्वधे
(२३) अवित्परोक्षा-सेट्थवोरेः
(२४) अनादेशादेरकव्यञ्जन-मध्येऽतः
(२५) तॄ-त्रप-फल-भजाम्
(२६) जॄ-भ्रम-वम-त्रस-फण-स्यम-स्वन-राज-भ्राज-भ्रास-भ्लासो वा
(२७) वा श्रन्थ-ग्रन्थो नूलुक् च
(२८) दम्भः
(२९) थे वा
(३०) न शस-दद-वादि-गुणिनः
(३१) हौ दः
(३२) देर्दिगिः परोक्षायाम्
(३३) डे पिबः पीप्य्
(३४) अडे हि-हनो हो घः पूर्वात्
(३५) जेर्गिः सन्-परोक्षयोः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(३६) चेः किर्वा
(३७) पूर्वस्याऽस्वे स्वरे योरियुव्
(३८) ऋतोऽत्
(३९) ह्रस्वः
(४०) ग-होर्जः
(४१) द्युतेरिः
(४२) द्वितीय-तुर्ययोः पूर्वौ
(४३) तिर्वा ष्ठिवः
(४४) व्यञ्जनस्याऽनादेर्लुक्
(४५) अघोषे शिटः
(४६) क-ङश्च-ञ्
(४७) न कवतेर्यङः
(४८) आ-गुणावन्यादेः
(४९) न हाको लुपि
(५०) वञ्च-स्रंस-ध्वंस-भ्रंश-कस-पत-पद-स्कन्दोऽन्तो नी
(५१) मुरतोऽनुनासिकस्य
(५२) जप-जभ-दह-दश-भञ्ज-पशः
(५३) चर-फलाम्
(५४) ति चोपान्त्याऽतोनोदुः
(५५) ऋमतां री
(५६) रि-रौ च लुपि
(५७) निजां शित्येत्
(५८) पृ-भृ-मा-हाङामिः
(५९) सन्यस्य
(६०) ओर्जा-ऽन्तस्था-पवर्गेऽवर्णे
(६१) श्रु-स्रु-द्रु-प्रु-ष्लु-च्योर्वा
(६२) स्वपो णावुः
(६३) असमानलोपे सन्वल्लघुनि ङे
(६४) लघोर्दीर्घोऽस्वरादेः
(६५) स्मृ-दृ-त्वर-प्रथ-म्रद-स्तृ-स्पशेरः
(६६) वा वेष्ट-चेष्टः
(६७) ई च गणः
(६८) अस्याऽऽदेराः परोक्षायाम्
(६९) अनातो नश्चान्त ऋदाद्यशौ-संयोगस्य
(७०) भू-स्वपोरदुतौ
(७१) ज्या-व्ये-व्यधि-व्यचि-व्यथेरिः
(७२) यजादि-वश्-वचः सस्वरान्तस्था ग्वृत्
(७३) न वयो यू
(७४) वेरयः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(७५) अविति वा
(७६) ज्यश्च यपि
(७७) व्यः
(७८) संपरेर्वा
(७९) यजादि-वचेः किति
(८०) स्वपेर्यङ्-ङे च
(८१) ज्या-व्यधः क्ङिति
(८२) व्यचोऽनसि
(८३) वशेरयङि
(८४) ग्रह-ब्रस्च-भ्रस्ज-प्रच्छः
(८५) व्ये-स्यमोर्यङि
(८६) चायः की
(८७) द्वित्वे ह्वः
(८८) णौ ङ-सनि
(८९) श्वेर्वा
(९०) वा परोक्षा-यङि
(९१) प्यायः पी
(९२) क्तयोरनुपसर्गस्य
(९३) आङोऽन्धूधसोः
(९४) स्फायः स्फी वा
(९५) प्रसमः स्त्यः स्ती
(९६) प्रात् तश्च मो वा
(९७) श्यः शी द्रवमूर्त्ति-स्पर्शे नश्राऽस्पर्शे
(९८) प्रतेः
(९९) वाऽभ्यवाभ्याम्
(१००) श्रः शृतं हविः-क्षीरे
(१०१) श्रपेः प्रयोक्त्रैक्ये
(१०२) य्वृत् सकृत्
(१०३) दीर्घमवोऽन्त्यम्
(१०४) स्वर-हन-गमोः सनि धुटि
(१०५) तनो वा
(१०६) क्रमः क्त्वि वा
(१०७) अहन्-पञ्चमस्य क्ङि-क्ङिति
(१०८) अनुनासिके च च्छ्-वः शूट्
(१०९) मव्यवि-श्रिवि-ज्वरि-त्वरेरुपान्त्येन
(११०) राल्लुक्
(१११) क्तेऽनिटश्च-जोः क-गौ घिति
(११२) न्यङ्कूद्र-मेघादयः
(११३) न वञ्चेर्गतौ
(११४) यजेर्यज्ञाङ्गे
(११५) घ्यण्यावश्यके
(११६) नि-प्राद् युजः शक्ये

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(११७) भुजो भक्ष्ये
(११८) त्यज-यज-प्रवचः
(११९) वचोऽशब्दनाम्नि
(१२०) भुज-न्युब्जं पाणि-रोगे
(१२१) वीरुन्-न्यग्रोधौ

[चतुर्थाध्याये द्वितीयः पादः]

(१) आत् सन्ध्यक्षरस्य
(२) न शिति
(३) व्यस्थव्-णवि
(४) स्फुर-स्फुलोर्घञि
(५) वाऽपगुरो णमि
(६) दीङः सनि वा
(७) यबक्ङिति
(८) मिग्-मीगोऽखलचलि
(९) लीङ्-लिनोर्वा
(१०) णौ क्री-जीङः
(११) सिध्यतेरज्ञाने
(१२) चि-स्फुरोर्नवा
(१३) वियः प्रजने
(१४) रुहः पः
(१५) लियो नोऽन्तः स्नेहद्रवे
(१६) लो लः
(१७) पातेः
(१८) धूग्-प्रीगोर्नः
(१९) वो विधूनने जः
(२०) पा-शा-छा-सा-वे-व्या-ह्वो यः
(२१) अर्त्ति-री-व्ली-ह्री-क्नूयि-क्ष्माय्यातां पुः
(२२) स्फायृ स्फाव्
(२३) शदिरगतौ शात्
(२४) घटादेर्ह्रस्वो दीर्घस्तु वा ञि-णम्परे
(२५) कगे-वनू-जनै-जॄष्-क्नस्-रञः
(२६) अमोऽकम्यमि-चमः
(२७) पर्यपात् स्खदः
(२८) शमोऽदर्शने
(२९) यमोऽपरिवेषणे णिचि च
(३०) मारण-तोषण-निशाने ज्ञश्च
(३१) चहणः शाठ्ये

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(३२) ज्वल-ह्वल-ह्मल-ग्ला-
स्ना-वनू-वम-नमोऽनुप-
सर्गस्य वा
(३३) छदेरिस्-मन्-त्रट्-कौ
(३४) एकोपसर्गस्य च घे
(३५) उपान्त्यस्याऽसमान
लोपि-शास्वृदितो डे
(३६) भ्राज-भास-भाष-दीप-
पीड-जीव-मील-कण-
रण-वण-भण-श्रण-ह्वे-
हेठ-लुट-लुप-लपां नवा
(३७) ऋदृवर्णस्य
(३८) जिघ्रतेरिः
(३९) तिष्ठतेः
(४०) ऊद् दुषो णौ
(४१) चित्ते वा
(४२) गोहः स्वरे
(४३) भुवो वः परोक्षा-ऽद्यतन्योः
(४४) गम-हन-जन-खन-घसः
स्वरेऽनङि क्ङिति लुक्
(४५) नो व्यञ्जनस्याऽनुदितः
(४६) अश्वोऽनर्चायाम्
(४७) लङ्गि-कम्प्योरुपतापा-
ऽङ्गविकृत्योः
(४८) भञ्जेर्ञौ वा
(४९) दंश-सञ्जः शवि
(५०) अकट्-घिनोश्च रञ्जेः
(५१) णौ मृगरमणे
(५२) घञि भाव-करणे
(५३) स्यदो जवे
(५४) दशना-ऽवोदैधौद्म-
प्रश्रथ-हिमश्रथम्
(५५) यमि-रमि-नमि-गमि-
हनि-मनि-वनति-तना-
देर्धुटि क्ङिति
(५६) यपि
(५७) वा मः
(५८) गमां कौ
(५९) न तिकि दीर्घश्च
(६०) आः खनि-सनि-जनः
(६१) सनि
(६२) ये नवा
(६३) तनः क्ये
(६४) तौ सनस्तिकि
(६५) वन्याङ् पञ्चमस्य
(६६) अपाचायश्चिः क्तौ
(६७) ह्लादो ह्लद् क्तयोश्च
(६८) ऋ-ल्वादेरेषां तो नोऽप्रः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(६९) रदादमूर्च्छ-मदः क्तयोर्दस्य च
(७०) सूयत्याद्योदितः
(७१) व्यञ्जनान्तस्थाऽऽ तो-ऽख्या-ध्यः
(७२) पू-दिव्यञ्चेर्नाशा-ऽद्यूता-ऽनपादाने
(७३) सेर्ग्रासे कर्म्मकर्त्तरि
(७४) क्षेः क्षी चाऽघ्यार्थे
(७५) वाऽऽक्रोश-दैन्ये
(७६) ऋ-ह्री-घ्रा-ध्रा- त्रोन्द-नुद-विन्तेर्वा
(७७) दु-गोरू च
(७८) क्षै-शुषि-पचो म-क-वम्
(७९) निर्वाणमवाते
(८०) अनुपसर्गाः क्षीबोल्लाघ-कृश-परिकृश-फुल्लोत्फुल्ल- संफुल्लाः
(८१) भित्तं शकलम्
(८२) वित्तं धन-प्रतीतम्
(८३) हु-धुटो हेर्धिः
(८४) शासस्-हनः शाध्येधि-जहि
(८५) अतः प्रत्ययाल्लुक्
(८६) असंयोगादोः
(८७) वम्यवितिं वा
(८८) कृगो यि च
(८९) अतः शित्युत्
(९०) श्ना-ऽस्त्योर्लुक्
(९१) वा द्विषातोऽनः पुस्
(९२) सिज्-विदोऽभुवः
(९३) द्रचुक्त-जक्षपञ्चतः
(९४) अन्तो नो लुक्
(९५) शौ वा
(९६) श्नश्चाऽऽतः
(९७) एषामी व्यञ्जनेऽदः
(९८) इर्दरिद्रः
(९९) भियो नवा
(१००) हाकः
(१०१) आ च हौ
(१०२) यि लुक्
(१०३) ओतः श्ये
(१०४) जा ज्ञा-जनोऽत्यादौ
(१०५) प्वादेर्ह्रस्वः
(१०६) गमिषद्यमश्छः
(१०७) वेगे सर्त्तेर्धावि
(१०८) श्रौति-कृवु-धिवु-पा-घ्रा-ध्मा-स्था-म्रा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दाम्-दृश्यर्त्ति-शद-
सदः शृ-कृ-धि-पिब-
जिघ्र-धम-तिष्ठ-मन-
यच्छ-पश्यर्च्छ-शीय-
सीदम्

(१०९) क्रमो दीर्घः परस्मै
(११०) ष्ठिवू-क्लम्वाऽऽचमः
(१११) शम्सप्तकस्य श्ये
(११२) ष्ठिव्-सिवोऽनटि वा
(११३) म-व्यस्याः
(११४) अनतोऽन्तोऽदात्मने
(११५) शीङो रत्
(११६) वेत्तेर्नवा
(११७) तिवां णवः परस्मै
(११८) ब्रूगः पञ्चानां पञ्चाऽऽहश्च
(११९) आशिषि तु-ह्योस्तातङ्
(१२०) आतो णव औः
(१२१) आतामाते-आथामाथे
आदिः
(१२२) यः सप्तम्याः
(१२३) याम्-युसोरियमियुसौ

[चतुर्थाध्याये तृतीयः पादः]

(१) नामिनो गुणोऽक्ङिति
(२) उ-श्नोः
(३) पुस्-पौ
(४) लघोरुपान्त्यस्य
(५) मिदः श्ये
(६) जागुः किति
(७) ऋवर्ण-दृशोऽङि
(८) स्कृच्छृतोऽकि परोक्षायाम्
(९) संयोगादृदर्त्तेः
(१०) क्य-यङाऽऽशीर्ये
(११) न वृद्धिश्चाऽविति क्ङिल्लोपे
(१२) भवतेः सिजलुपि
(१३) सूतेः पञ्चम्याम्
(१४) द्व्युक्तोपान्त्यस्य शिति
स्वरे
(१५) ह्विणोरप्विति व्-यौ
(१६) इको वा
(१७) कुटादेर्ङिद्ध्वंदञ्णित्
(१८) विजेरिट्
(१९) वोर्णोः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(२०) शिदवित्
(२१) इन्ध्यसंयोगात् परोक्षा किद्वत्
(२२) स्वञेर्नवा
(२३) ज-नशो न्युपान्त्ये तादिः क्त्वा
(२४) ऋत्-तृष-मृष-कृश-वञ्च-लुञ्च-थ-फः सेट्
(२५) वौ व्यञ्जनाऽऽदेः सन् चाऽय्-वः
(२६) उति शवर्हाऽद्भ्यः क्तौ भावाऽऽरम्भे
(२७) न-डीङ्-शीङ्-पूङ्-धृषि-क्ष्विदि-स्विदि-मिदः
(२८) मृषः क्षान्तौ
(२९) क्त्वा
(३०) स्कन्द-स्यन्दः
(३१) क्षुध-क्लिश-कुष-गुध-मृङ-मृद-वद-वसः
(३२) रुद-विद-मुष-ग्रह-स्वप-प्रच्छः सन् च
(३३) नामिनोऽनिट्
(३४) उपान्त्ये
(३५) सिजाशिषावात्मने
(३६) ऋवर्णात्
(३७) गमो वा
(३८) हनः सिच्
(३९) यमः सूचने
(४०) वा स्वीकृतौ
(४१) इश्च स्था-दः
(४२) मृजोऽस्य वृद्धिः
(४३) ऋतः स्वरे वा
(४४) सिचि परस्मै समानस्याऽङिति
(४५) व्यञ्जनानामनिटि
(४६) वोर्ण्णुगः सेटि
(४७) व्यञ्जनादेर्वोपान्त्यस्याऽतः
(४८) वद-व्रज-लः
(४९) न श्वि-जागृ-शस-क्षण-ह्म्येदितः
(५०) ञ्णिति
(५१) नामिनोऽकलि-हलेः
(५२) जागुर्ञि-णवि
(५३) आत ऐः कृञ्औ
(५४) न जन-बधः
(५५) मोऽकमि-यमि-रमि-नमि-गमि-वमा-ऽऽचमः
(५६) विश्रमेर्वा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(५७) उद्यमोपरमौ
(५८) णिद्वाऽन्त्यो णव्
(५९) उत और्विति व्यञ्जनेऽद्धेः
(६०) वोर्ण्णोः
(६१) न दि-स्योः
(६२) तृहः श्नादीत्
(६३) ब्रूतः परादिः
(६४) यङ्-तु-रु-स्तोर्बहुलम्
(६५) सः सिजस्तेर्दि-स्योः
(६६) पिबैति-दा-भू-स्थः सिचो लुप् परस्मै न चेट्
(६७) ट्धे-घ्रा-शा-छा-सो वा
(६८) तन्भ्यो वा त-थासि नू-णोश्च
(६९) सनस्तत्रा वा
(७०) धुड्-ह्रस्वाल्लुगनिटस्त-थोः
(७१) इट ईति
(७२) सो धि वा
(७३) अस्तेः सि हस्त्वेति
(७४) दुह-दिह-लिह-गुहो दन्त्यात्मने वा सकः
(७५) स्वरेऽतः
(७६) दरिद्रोऽद्यतन्यां वा
(७७) अशित्यस्सन्-णकञ्-णका-ऽनटि
(७८) व्यञ्जनाद् देः सश्च दः
(७९) सेः सू-द्-धां च रुर्वा
(८०) योऽशिति
(८१) क्यो वा
(८२) अतः
(८३) णेरनिटि
(८४) सेट्क्तयोः
(८५) आमन्ताऽऽल्वाऽऽय्येत्नावय्
(८६) लघोर्यपि
(८७) वाऽऽघ्रोः
(८८) मेङो वा मित्
(८९) क्षेः क्षी
(९०) क्षय्य-जय्यौ शक्तौ
(९१) क्रय्यः क्रयार्थे
(९२) सस्तः सि
(९३) दीयू दीङः क्ङिति स्वरे
(९४) इडेत्-पुसि चाऽऽतो लुक्
(९५) संयोगाऽऽदेर्वाऽऽशिष्येः
(९६) गा-पा-स्था-सा-दा-मा-हाकः
(९७) ई व्यञ्जनेऽयपि
(९८) घ्रा-ध्मोर्यङि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(९९) हनो घ्नी वधे
(१००) ञ्णिति घात्
(१०१) ञि-णवि घन्
(१०२) नशेर्नेश् वाऽङि
(१०३) श्वयत्यसू-वच-पतः श्वा-ऽऽस्थ-वोच-पप्तम्
(१०४) शीङः एः शिति
(१०५) क्ङिति यि शय्
(१०६) उपसर्गादूहो ह्रस्वः
(१०७) आशिषीणः
(१०८) दीर्घश्चि-यङ्-यक्-क्येषु च
(१०९) ऋतो री
(११०) रिः श-क्या-ऽऽशीर्ये
(१११) ईश्च्वाववर्णस्या-ऽनव्ययस्य
(११२) क्यनि
(११३) क्षुत्-तृड्-गर्धेऽश-नायोदन्य-धनायम्
(११४) वृषाऽश्वान् मैथुने स्सोऽन्तः
(११५) अस् च लौल्ये

[चतुर्थाध्याये चतुर्थः पादः]

(१) अस्ति-ब्रुवोर्भू-वचावशिति
(२) अघञ्क्यबलच्यजेर्वी
(३) त्रने वा
(४) चक्षो वाचि कृशांग्-ख्यांग्
(५) नवा परोक्षायाम्
(६) भृज्जो भर्ज्
(७) प्राद् दागस्त आरम्भे क्ते
(८) नि-वि-स्वन्ववात्
(९) स्वरादुपसर्गाद् दस्ति कित्यधः
(१०) दत्
(११) दो-सो-मा-स्थ इः
(१२) छा-शोर्वा
(१३) शो व्रते
(१४) हाको हिः क्त्वि
(१५) धागः
(१६) यपि चाऽदो जग्ध्
(१७) घस्लृ सनद्यतनी-घञ्चलि
(१८) परोक्षायां नवा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(१९) वेर्वय्
(२०) ऋः शृ-द्रु-प्रः
(२१) हनो वध आशिष्यञौ
(२२) अद्यतन्यां वा त्वात्मने
(२३) इणिकोर्गा
(२४) णावज्ञाने गमुः
(२५) सनीङश्च
(२६) गा परोक्षायाम्
(२७) णौ सन्-डे वा
(२८) वाऽद्यतनी-क्रियाति-पत्त्योर्गीङ्
(२९) अड् धातोरादिर्ह्यस्तन्यां चाऽमाङा
(३०) एत्यस्तेर्वृद्धिः
(३१) स्वरादेस्तासु
(३२) स्ताद्यशितोऽत्रोणादेरिट्
(३३) तेर्ग्रहादिभ्यः
(३४) गृह्णोऽपरोक्षायां दीर्घः
(३५) वृतो नवाऽनाशीः-सिच्परस्मै च
(३६) इट् सिजाशिषोरात्मने
(३७) संयोगाद् ऋतः
(३८) धूगौदितः
(३९) निष्कुषः
(४०) क्तयोः
(४१) जृ-व्रश्चः क्त्वः
(४२) ऊदितो वा
(४३) क्षुध-वसस्तेषाम्
(४४) लुभ्यञ्चेर्विमोहार्चे
(४५) पूङ्-क्लिशिभ्यो नवा
(४६) सह-लुभेच्छ-रुष-रिषस्तादेः
(४७) इवृध-भ्रस्ज-दम्भ-श्रि-यूर्ण्णु-भर-ज्ञपि-सनि-तनि-पति-वृद्-दरिद्रः सनः
(४८) ऋ-स्मि-पूङञ्जशौ-कृ-गृ-दृ-धृ-प्रच्छः
(४९) हनृतः स्यस्य
(५०) कृत-चृत-नृत-च्छृद-तृदोऽसिचः सादेर्वा
(५१) गमोऽनात्मने
(५२) स्नोः
(५३) क्रमः
(५४) तुः
(५५) न वृद्भ्यः
(५६) एकस्वरादनुस्वारेतः
(५७) ऋवर्ण्ण-श्रूयूर्ण्णुगः कितः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(५८) उवर्णात्
(५९) ग्रह-गुहश्च सनः
(६०) स्वार्थे
(६१) डीय-श्व्यैदितः क्त्वोः
(६२) वेटोऽपतः
(६३) सं-नि-वेरर्दः
(६४) अविदूरेऽभेः
(६५) वर्तेर्वृत्तं ग्रन्थे
(६६) धृष-शसः प्रगल्भे
(६७) कषः कृच्छ्रे-गहने
(६८) घुषेरविशब्दे
(६९) बलि-स्थूले दृढः
(७०) क्षुब्ध-विरिब्ध-स्वान्त-ध्वान्त-लग्न-म्लिष्ट-फाण्ट-बाढ-परिवृढं मन्थ-स्वर-मनस्-तमस्-सक्ता-ऽस्पष्टा-ऽनायास-भृश-प्रभौ
(७१) आदितः
(७२) नवा भावा-ऽऽरम्भे
(७३) शकः कर्म्मणि
(७४) णौ दान्त-शान्त-पूर्ण-दस्त-स्पष्ट-च्छन्न-ज्ञप्तम्
(७५) श्वस-जप-वम-रुष-त्वर-संघुषा-ऽऽस्वना-ऽमः
(७६) हृषेः केश-लोम-विस्मय-प्रतिघाते
(७७) अपचितः
(७८) सृजि-दृशि-स्कृ-स्वरा-ऽत्वतस्तृज्नित्यानिटस्थवः
(७९) ऋतः
(८०) ऋ-वृ-व्ये-ऽद इट्
(८१) स्क्रसृ-वृ-भृ-स्तु-द्रु-श्रु-स्रोर्व्यञनादेः परोक्षायाः
(८२) घसेकस्वराऽऽतः क्सोः
(८३) गम-हन-विद्लृ-विश-दृशो वा
(८४) सिचोऽञेः
(८५) धूग्-सु-स्तोः परस्मै
(८६) यमि-रमि-नम्यातः सोऽन्तश्च
(८७) ईशीडः से-ध्वे-स्व-ध्वमोः
(८८) रुत्पञ्चकाच्छिदयः
(८९) दि-स्योरीट्
(९०) अदश्चाऽट्
(९१) संपरेः कृगः स्सट्
(९२) उपाद् भूषा-समवाय-प्रतियत्न-विकार-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वाक्याध्याहारे
(९३) किरो लवने
(९४) प्रतेश्च वधे
(९५) अपाच्चतुष्पात्-पक्षि-शुनि
हृष्टा-ऽन्ना-ऽऽश्रयार्थे
(९६) वौ विष्किरो वा
(९७) प्रात् तुम्पतेर्गवि
(९८) उदितः स्वरान्नोऽन्तः
(९९) मुचादि-तृफ-दृफ-
गुफ-शुभोभः शे
(१००) जभः स्वरे
(१०१) रध इटि तु परोक्षायामेव
(१०२) रभोऽपरोक्षा-शवि
(१०३) लभः
(१०४) आङो यि
(१०५) उपात् स्तुतौ
(१०६) ञि-ख्णमोर्वा
(१०७) उपसर्गात् खल्घञोश्च
(१०८) सु-दुर्भ्यः
(१०९) नशो धुटि
(११०) मस्जेः सः
(१११) अः सृजि-दृशोऽकिति
(११२) स्पृशादि-सृपो वा
(११३) ह्रस्वस्य तः पित्कृति
(११४) अतो म आने
(११५) आसीनः
(११६) क्रतां क्ङितीर्
(११७) ओष्ठचादुर्
(११८) इसासः शासोऽङ्-
व्यञ्जने
(११९) क्वौ
(१२०) आङः
(१२१) य्वोः प्वय्व्यञ्जने लुक्
(१२२) कृतः कीर्त्तिः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[पञ्चमाध्याये प्रथमः पादः]

(१) आ तुमोऽत्यादिः कृत्
(२) बहुलम्
(३) कर्त्तरि
(४) व्याप्ये घुर-केलिम-कृष्टपच्यम्
(५) संगतेऽजर्यम्
(६) रुच्या-ऽव्यथ्य-वास्तव्यम्
(७) भव्य-गेय-जन्य-रम्या-ऽऽपात्या-ऽऽप्लाव्यं नवा
(८) प्रवचनीयादयः
(९) श्लिष-शीङ्-स्था-ऽऽस-वस-जन-रुह-जृ-भजेः क्तः
(१०) आरम्भे
(११) गत्यर्था-ऽकर्मक-पिब-भुजेः
(१२) अद्यर्थाच्चाऽऽधारे
(१३) क्त्वा-तुमम् भावे
(१४) भीमादयोऽपादाने
(१५) संप्रदानाच्चान्यत्रोणादयः
(१६) असरूपोऽपवादे वोत्सर्गः प्राक् क्तेः
(१७) ऋवर्ण-व्यञ्जनाद् घ्यण्
(१८) पाणि-समवाभ्यां सृजः
(१९) उवर्णादावश्यके
(२०) आसु-यु-वपि-रपि-लपि-त्रपि-डिपि-दभि-चम्यानमः
(२१) वाऽऽधारेऽमावस्या
(२२) संचाय्य-कुण्डपाय्य-राजसूयं क्रतौ
(२३) प्रणाय्यो निष्कामा-ऽसंमते
(२४) धाय्या-पाय्य-सान्नाय्य-निकाय्यमृङ्-मान-हवि-र्निवासे
(२५) परिचाय्योपचाय्या-ऽऽ-नाय्य-समूह्य-चित्यमग्नौ
(२६) याज्या दानर्चि
(२७) तव्या-ऽनीयौ
(२८) य एचाऽऽतः
(२९) शकि-तकि-चति-यति-शसि-सहि-यजि-भजि-पवर्गात्
(३०) यम-मद-गदोऽनुपसर्गात्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(३१) चरेराङस्त्वगुरौ
(३२) वर्योपसर्या-ऽवद्य-पण्यमुपेयर्तुमती-गर्ह्य-विक्रेये
(३३) स्वामि-वैश्येऽर्यः
(३४) वह्यं करणे
(३५) नाम्नो वदः क्यप् च
(३६) हृत्या-भूयं भावे
(३७) अग्निचित्या
(३८) खेय-मृषोद्ये
(३९) कुप्य-भिद्योध्य-सिध्य-तिष्य-पुष्य-युग्या-ऽऽज्य-सूर्यं नाम्नि
(४०) दृ-वृग्-स्तु-जुषेति-शासः
(४१) ऋदुपान्त्यादकृपि-चृदृचः
(४२) कृ-वृषि-मृजि-शंसि-गुहि-दुहि-जपो वा
(४३) जि-विपू-न्यो हलि-मुञ्ज-कल्के
(४४) पदा-ऽस्वैरि-बाह्या-पक्ष्ये ग्रहः
(४५) भृगोऽसंज्ञायाम्
(४६) समो वा
(४७) ते कृत्याः
(४८) णक-तृचौ
(४९) अच्
(५०) लिहादिभ्यः
(५१) ब्रुवः
(५२) नन्द्यादिभ्योऽनः
(५३) ग्रहादिभ्यो णिन्
(५४) नाम्युपान्त्य-प्री-कृ-गृ-ज्ञः कः
(५५) गेहे ग्रहः
(५६) उपसर्गादातो डोऽश्यः
(५७) व्याघ्रा-ऽऽघ्रे प्राणि-नसोः
(५८) घ्रा-ध्मा-पा-दृधे-दृशः शः
(५९) साहि-साति-वेद्युदेजि-धारि-पारि-चेतेरनुपसर्गात्
(६०) लिम्प-विन्दः
(६१) नि-गवादेर्नाम्नि
(६२) वा ज्वलादि-दु-नी-भू-ग्रहा-ऽऽस्रोर्णः
(६३) अवहृ-सा-संस्रोः
(६४) तनू-व्यधीण्-श्वसातः
(६५) नृत्-खन्-रञ्जः शिल्पिन्यकट्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(६६) गस्थकः
(६७) टनण्
(६८) हः काल-व्रीह्योः
(६९) प्रु-सृ-ल्वोऽकः साधौ
(७०) आशिष्यकन्
(७१) तिक्कृतौ नाम्नि
(७२) कर्मणोऽण्
(७३) शीलि-कामि-
भक्ष्याचरीक्षि-क्षमो णः
(७४) गायोऽनुपसर्गाट्टक्
(७५) सुरा-सीधोः पिबः
(७६) आतो डोऽह्वा-वा-मः
(७७) समः ख्यः
(७८) दश्चाऽऽङः
(७९) प्राज्ञश्च
(८०) आशिषि हनः
(८१) क्लेशादिभ्योऽपात्
(८२) कुमार-शीर्षाण्णिन्
(८३) अचित्ते टक्
(८४) जाया-पतेश्चिह्नवति
(८५) ब्रह्मादिभ्यः
(८६) हस्ति-बाहु-कपाटाच्छक्तौ
(८७) नगरादगजे
(८८) राजघः
(८९) पाणिघ-ताडघौ शिल्पिनि
(९०) कुक्ष्यात्मोदराद् भृगः खिः
(९१) अर्होऽच्
(९२) धनु-र्दण्ड-त्सरु-लाङ्गला-
ऽङ्कुशर्ष्टि-यष्टि-शक्ति-
तोमर-घटाद् ग्रहः
(९३) सूत्राद् धारणे
(९४) आयुधादिभ्यो
धृगोऽदण्डादेः
(९५) हृगो वयोऽनुद्यमे
(९६) आङः शीले
(९७) दृति-नाथात् पशावि:
(९८) रजः-फले-मलाद् ग्रहः
(९९) देव-वातादापः
(१००) शकृत्-स्तम्बाद् वत्स-
व्रीहौ कृगः
(१०१) किम्-यत्-तद्-बहोरः
(१०२) सङ्ख्या-ऽह-र्दिवा-
विभा-निशा-प्रभा-
भाश्चित्र-कर्त्राद्यन्ता-
ऽनन्त-कार-बाह्वरु-
र्धनु-र्नान्दी-लिपि-
लिवि-बलि-भक्ति-क्षेत्र-
जङ्घा-क्षपा-क्षणदा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रजनि-दोषा-दिन-दिवसाट्टः

(१०३) हेतु-तच्छीला-ऽनुकूले-ऽशब्द-श्लोक-कलह-गाथा-वैर-चाटुसूत्र-मन्त्र-पदात्

(१०४) भृतौ कर्मणः

(१०५) क्षेम-प्रिय-मद्र-भद्रात् खा-ऽण्

(१०६) मेघर्त्ति-भया-ऽभयात् खः

(१०७) प्रिय-वशाद् वदः

(१०८) द्विषन्तप-परन्तपौ

(१०९) परिमाणार्थ-मित-नखात् पचः

(११०) कूला-ऽभ्र-करीषात् कषः

(१११) सर्वात् सहश्च

(११२) भृ-वृ-जि-तृ-तप-दमेश्च नाम्नि

(११३) धारेर्धर्च

(११४) पुरन्दर-भगन्दरौ

(११५) वाचंयमो व्रते

(११६) मन्याण्णिन्

(११७) कर्तुः खश्

(११८) एजेः

(११९) शुनी-स्तन-मुञ्ज-कूला-ऽऽस्य-पुष्पाट्ठेः

(१२०) नाडी-घटी-खरी-मुष्टि-नासिका-वाताद् ध्मश्च

(१२१) पाणि-करात्

(१२२) कूलादुद्रुजोद्वहः

(१२३) वहा-ऽभ्रालिहः

(१२४) बहु-विध्वरुस्तिलात् तुदः

(१२५) ललाट-वात-शर्द्धात् तपा-ऽज-हाकः

(१२६) असूर्योग्राद् दृशः

(१२७) इरम्मदः

(१२८) नग्न-पलित-प्रिया-ऽन्ध स्थूल-सुभगा-ऽऽढच-तदन्ताच्च्व्यर्थेऽच्वेर्भुवः खिष्णु-खुकञ्

(१२९) कृगः खनट् करणे

(१३०) भावे चाऽऽशिताद् भुवः खः

(१३१) नाम्नो गमः खड्-डौ च , विहायसस्तु विहः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(१३२) सुग-दुर्गमाधारे
(१३३) निर्गो देशे
(१३४) शमो नाम्न्यः
(१३५) पार्श्वादिभ्यः शीङः
(१३६) ऊर्ध्वादिभ्यः कर्तुः
(१३७) आधारात्
(१३८) चरेष्टः
(१३९) भिक्षा-सेना-ऽऽदायात्
(१४०) पुरो-ऽग्रतो-ऽग्रेः सर्त्तेः
(१४१) पूर्वात् कर्तुः
(१४२) स्था-पा-स्रा-त्रः कः
(१४३) शोकापनुद-तुन्दपरि-मृज-स्तम्बेरम-कर्णेजपं प्रिया-ऽलस-हस्ति-सूचके
(१४४) मूलविभुजादयः
(१४५) दुहेर्दुघः
(१४६) भजो विण्
(१४७) मन्-वन्-क्विप्-विच् क्वचित्
(१४८) क्विप्
(१४९) स्पृशोऽनुदकात्
(१५०) अदोऽनन्नात्
(१५१) क्रव्यात्-क्रव्यादावाम-पक्वादौ
(१५२) त्यदाद्यन्य-समानादु-पमानाद् व्याप्ये दृशः टक्-सकौ च
(१५३) कर्तुर्णिन्
(१५४) अजातेः शीले
(१५५) साधौ
(१५६) ब्रह्मणो वदः
(१५७) व्रता-ऽऽभीक्ष्ण्ये
(१५८) करणाद् यजो भूते
(१५९) निन्द्ये व्याप्यादिन् विक्रियः
(१६०) हनो णिन्
(१६१) ब्रह्म-भ्रूण-वृत्रात् क्विप्
(१६२) कृगः सु-पुण्य-पाप-कर्म-मन्त्र-पदात्
(१६३) सोमात् सुगः
(१६४) अग्नेश्चेः
(१६५) कर्मण्यग्न्यर्थे
(१६६) दृशः क्विप्
(१६७) सह-राजभ्यां कृग्-युधेः
(१६८) अनोर्जनेर्डः
(१६९) सप्तम्याः
(१७०) अजातेः पञ्चम्याः
(१७१) क्वचित्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(१७२) सु-यजोर्ङ्वनिप्
(१७३) जृषोऽतृः
(१७४) क्त-क्तवतू

[पञ्चमाध्याये द्वितीयः पादः]

(१) श्रु-सद-वस्भ्यः परोक्षा वा
(२) तत्र क्वसु-कानौ तद्वत्
(३) वेयिवदनाश्वदनूचानम्
(४) अद्यतनी
(५) विशेषाविवक्षा-व्यामिश्रे
(६) रात्रौ वसोऽन्त्ययामा-ऽस्वप्नर्यद्य
(७) अनद्यतने ह्यस्तनी
(८) ख्याते दृश्ये
(९) अयदि स्मृत्यर्थे भविष्यन्ती
(१०) वाऽऽकाङ्क्षायाम्
(११) कृतास्मरणा-ऽतिनिह्नवे परोक्षा
(१२) परोक्षे
(१३) ह-शश्वद्-युगान्तःप्रच्छ्ये ह्यस्तनी च
(१४) अविवक्षिते
(१५) वाऽद्यतनी पुरादौ
(१६) स्मे च वर्त्तमाना
(१७) ननौ पृष्टोक्तौ सद्वत्
(१८) न-न्वोर्वा
(१९) सति
(२०) शत्रानशावेष्यति तु सस्यौ
(२१) तौ माङ्याक्रोशेषु
(२२) वा वेत्तेः क्वसुः
(२३) पूङ्-यजः शानः
(२४) वयः-शक्ति-शीले
(२५) धारीङोऽकृच्छ्रेऽतृश्
(२६) सुग्-द्विषार्हः सत्रि-शत्रु-स्तुत्ये
(२७) तृन् शील-धर्म-साधुषु
(२८) भ्राज्यलङ्कृग्-निराकृग्-भू-सहि-रुचि-वृति-वृधि-चरि-प्रजना-ऽपत्रप - इष्णुः
(२९) उदः पचि-पति-पदि-मदेः
(३०) भू-जेः ष्णुक्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(३१) स्था-ग्ला-म्ला-पचि-परिमृजि-क्षेः स्नुः
(३२) त्रसि-गृधि-धृषि-क्षिपः क्नुः
(३३) सन्-भिक्षा-ऽऽशंसेरुः
(३४) विन्द्विच्छू
(३५) शृ-वन्देरारुः
(३६) दा-ट्धे-सि-शद-सदो रुः
(३७) शीङ्-श्रद्धा-निद्रा-तन्द्रा-दयि-पति-गृहि-स्पृहेरालुः
(३८) ङौ सासहि-वावहि-चाचलि-पापति
(३९) सस्रि-चक्रि-दधि-जङ्गि-नेमिः
(४०) शृ-कम-गम-हन-वृष-भू-स्थ उकण्
(४१) लष-पत-पदः
(४२) भूषा-क्रोधार्थ-जु-सृ-गृधि-ज्वल-शुचश्चाऽनः
(४३) चाल-शब्दार्थादकर्मकात्
(४४) इ-ङितो व्यञ्जनाऽ-ऽद्यन्तात्
(४५) न णिङ्-य-सूद-दीप-दीक्षः
(४६) द्रम-क्रमो यङः
(४७) यजि-जपि-दंशि-वदादूकः
(४८) जागुः
(४९) शमष्टकाद् घिनण्
(५०) युज-भुज-भज-त्यज-रञ्ज-द्विष-दुष-द्रुह-दुहा-ऽभ्याहनः
(५१) आङः क्रीड-मुषः
(५२) प्राच्च यम-यसः
(५३) मथ-लपः
(५४) वेश्च द्रोः
(५५) वि-परि-प्रात् सर्त्तेः
(५६) समः पृचैप्-ज्वरेः
(५७) सं-वेः सृजः
(५८) सं-परि-व्यनु-प्राद् वदः
(५९) वेर्विच-कत्थ-स्रम्भ-कष-कस-लस-हनः
(६०) व्यपा-ऽभेर्लषः
(६१) सम्-प्राद् वसात्
(६२) समत्यपा-ऽभि-व्यभेश्वरः
(६३) समनु-व्यवाद् रुधः
(६४) वेर्दहः
(६५) परेर्देवि-मुहश्च

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(६६) क्षिप-रटः
(६७) वादेश्च णकः
(६८) निन्द-हिंस-क्लिश-खाद-विनाशि-व्याभाषा-ऽसूया-ऽनेकस्वरात्
(६९) उपसर्गाद् देवृ-देवि-क्रुशः
(७०) वृङ्-भिक्षि-लुण्टि-जल्पि-कुट्टाट्टाकः
(७१) प्रात् सू-जोरिन्
(७२) जीण-दृ-क्षि-विश्रि-परिभू-वमा-ऽभ्यमा-ऽव्यथः
(७३) सृ-घस्यदो मरक्
(७४) भञ्जि-भासि-मिदो घुरः
(७५) वेत्ति-च्छिद-भिदः कित्
(७६) भियो रु-रुक-लुकम्
(७७) सृ-जीण्-नशष्ट्वरप्
(७८) गत्वरः
(७९) स्म्यजस-हिंस-दीप-कम्प-कम-नमो रः
(८०) तृषि-धृषि-स्वपो नजिङ्
(८१) स्थेश-भास-पिस-कसो वरः
(८२) यायावरः
(८३) दिद्युद्-दद्दद्-जगज्जुहू-वाक्-प्राट्-धी-श्री-द्रू-स्रू-ज्वायतस्तू-कटप्रू-परिव्राड्-भ्राजादयः किपः
(८४) शं-सं-स्वयं-वि-प्राद् भुवो डुः
(८५) पुव इत्रो दैवते
(८६) ऋषि-नाम्नोः करणे
(८७) लू-धू-सू-खन-चर-सहा-ऽर्तेः
(८८) नी-दाव्-शसू-यु-युज-स्तु-तुद-सि-सिच-मिह-पत-पा-नहस्त्रट्
(८९) हल-क्रोडास्ये पुवः
(९०) दंशेस्त्रः
(९१) धात्री
(९२) ज्ञानेच्छा-ऽर्चार्थ-ऽीच्छील्यादिभ्यः क्तः
(९३) उणादयः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[पञ्चमाध्याये तृतीयः पादः]

(१) वत्स्यंति गम्यादिः
(२) वा हेतुसिद्धौ क्तः
(३) कषोऽनिटः
(४) भविष्यन्ती
(५) अनद्यतने श्वस्तनी
(६) परिदेवने
(७) पुरा-यावतोर्वर्त्तमाना
(८) कदा-कर्ह्योर्नवा
(९) किंवृत्ते लिप्सायाम्
(१०) लिप्स्यसिद्धौ
(११) पञ्चम्यर्थहेतौ
(१२) सप्तमी चोर्ध्वमौहूर्त्तिके
(१३) क्रियायां क्रियार्थायां तुम् णकच् भविष्यन्ती
(१४) कर्मणोऽण्
(१५) भाववचनाः
(१६) पद-रुज-विश-स्पृशो घञ्
(१७) सर्त्तेः स्थिर-व्याधि-बल-मत्स्ये
(१८) भावा-ऽकर्त्रोः
(१९) इङोऽपादाने तु टिद्
वा
(२०) श्रो वायु-वर्ण-निवृत्ते
(२१) निरभेः पू-ल्वः
(२२) रोरुपसर्गात्
(२३) भू-श्र्यदोऽल्
(२४) न्यादो नवा
(२५) सं-नि-व्युपाद् यमः
(२६) नेर्नद-गद-पठ-स्वन-क्कणः
(२७) वैणे क्कणः
(२८) युवर्ण-वृ-दृ-वश-रण-गमृद्-ग्रहः
(२९) वर्षादयः क्लीबे
(३०) समुदोऽजः पशौ
(३१) सृ-ग्लहः प्रजना-ऽक्षे
(३२) पणेर्मानि
(३३) संमद-प्रमदौ हर्षे
(३४) हनोऽन्तर्घना-ऽन्तर्घणौ देशे
(३५) प्रघण-प्रघाणौ गृहांशे
(३६) निघोद्घ-सङ्घोद्घना-ऽपघनोपघ्नं निमित-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रशस्त-गणा-ऽत्या-
धाना-ऽङ्गा-ऽऽसन्नम्
(३७) मूर्त्ति-निचिता-ऽभ्रे घनः
(३८) व्ययो-द्रोः करणे
(३९) स्तम्बाद् घ्रश्च
(४०) परेर्घः
(४१) ह्वः समाह्वया-ऽऽह्वयौ
द्यूत-नाम्नोः
(४२) न्यभ्युप-वेर्वाश्चोत्
(४३) आङो युद्धे
(४४) आहावो निपानम्
(४५) भावेऽनुपसर्गात्
(४६) हनो वा वध् च
(४७) व्यध-जप-मद्भ्यः
(४८) नवा कण-यम-हस-
स्वनः
(४९) आङो रु-प्लोः
(५०) वर्षविघ्नेऽवाद् ग्रहः
(५१) प्राद् रश्मि-तुलासूत्रे
(५२) वृगो वस्त्रे
(५३) उदः श्रेः
(५४) यु-पू-द्रोर्घञ्
(५५) ग्रहः
(५६) न्यवाच्छापे
(५७) प्राल्लिप्सायाम्
(५८) समो मुष्टौ
(५९) यु-दु-द्रोः
(६०) नियश्चाऽनुपसर्गाद् वा
(६१) वोदः
(६२) अवात्
(६३) परेर्द्यूते
(६४) भुवोऽवज्ञाने वा
(६५) यज्ञे ग्रहः
(६६) संस्तोः
(६७) प्रात् स्नु-द्रु-स्तोः
(६८) अयज्ञे स्त्रः
(६९) वेरशब्दे प्रथने
(७०) छन्दोनाम्नि
(७१) क्षु-श्रोः
(७२) न्युदो ग्रः
(७३) किरो धान्ये
(७४) नेर्वुः
(७५) इणोऽभ्रेषे
(७६) परेः क्रमे
(७७) व्युपात् शीङः
(७८) हस्तप्राप्ये चेरस्तेये
(७९) चिति-देहा-ऽऽवा-
सोपसमाधाने कश्चाऽऽदेः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(८०) सङ्ज्ञेऽनूर्ध्वे
(८१) माने
(८२) स्थादिभ्यः कः
(८३) ट्वितोऽथुः
(८४) ड्वितस्त्रिमक् तत्कृतम्
(८५) यजि-स्वपि-रक्षि-यति-प्रच्छो नः
(८६) विच्छो नङ्
(८७) उपसर्गाद् दः किः
(८८) व्याप्यादाधारे
(८९) अन्तर्द्धिः
(९०) अभिव्याप्तौ भावेऽनञिन्
(९१) स्त्रियां क्तिः
(९२) श्वादिभ्यः
(९३) समिणासुगः
(९४) साति-हेति-यूति-जूति-ज्ञप्ति-कीर्त्तिः
(९५) गा-पा-पचो भावे
(९६) स्थो वा
(९७) आस्यटि-व्रज्-यजः क्यप्
(९८) भृगो नाम्नि
(९९) समज-निपन्निषद-शीङ्-सुग्-विदि-चरि-मनीणः
(१००) कृगः श च वा
(१०१) मृगयेच्छा-याच्ञा-तृष्णा-कृपा-भा-श्रद्धाऽन्तर्द्धा
(१०२) परेः सृ-चरेर्यः
(१०३) वाऽटाट्यात्
(१०४) जागुरश्च
(१०५) शंसि-प्रत्ययात्
(१०६) क्तेटो गुरोर्व्यञ्जनात्
(१०७) षितोऽङ्
(१०८) भिदादयः
(१०९) भीषि-भूषि-चिन्ति-पूजि-कथि-कुम्बि-चर्चि-स्पृहि-तोलि-दोलिभ्यः
(११०) उपसर्गादातः
(१११) णि-वेत्त्यास-श्रन्थ-घट्ट-वन्देरनः
(११२) इषोऽनिच्छायाम्
(११३) पर्यधेर्वा
(११४) क्रुत्संपदादिभ्यः क्विप्
(११५) भ्यादिभ्यो वा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(११६) व्यतिहारेऽनीहादिभ्यो ञः
(११७) नञोऽनिः शापे
(११८) ग्ला-हा-ज्यः
(११९) प्रश्ना-ऽऽख्याने वेञ्
(१२०) पर्यायाऽर्हणोत्पत्तौ च णकः
(१२१) नाम्नि पुंसि च
(१२२) भावे
(१२३) क्लीबे क्तः
(१२४) अनट्
(१२५) यत्कर्मस्पर्शात् कर्त्रङ्गसुखं ततः
(१२६) रम्यादिभ्यः कर्त्तरि
(१२७) कारणम्
(१२८) भुजि-पत्यादिभ्यः कर्मा-ऽपादाने
(१२९) करणा-ऽऽधारे
(१३०) पुन्नाम्नि घः
(१३१) गोचर-संचर-वह-व्रज-व्यज-खला-ऽऽपण-निगम-बक-भग-कषा-ऽऽकष-निकषम्
(१३२) व्यञ्जनाद् घञ्
(१३३) अवात् तॄ-स्तृभ्याम्
(१३४) न्याया-ऽऽवाया-ऽध्या-योद्याव-संहारा-ऽवहारा-ऽऽधार-दार-जारम्
(१३५) उदङ्कोऽतोये
(१३६) आनायो जालम्
(१३७) खनो ड-डरेके-कवक-घं च
(१३८) इ-कि-स्तिव् स्वरूपा-ऽर्थे
(१३९) दुः-स्वीषतः कृच्छ्रा-ऽकृच्छ्रार्थे खल्
(१४०) च्व्यर्थे कर्त्राप्याद् भू-कृगः
(१४१) शासू-युधि-दृशि-धृषि-मृषा-ऽऽतोऽनः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[पञ्चमाध्याये चतुर्थः पादः]

(१) सत्सामीप्ये सद्धद् वा
(२) भूतवच्चाऽऽशंस्ये वा
(३) क्षिप्रा-ऽऽशंसार्थयो-भविष्यन्ती-सप्तम्यौ
(४) सम्भावने सिद्धवत्
(५) नाऽनद्यतनः प्रबन्धा-ऽऽसत्त्योः
(६) एष्यत्यवधौ देशस्या-ऽर्वाग्भागे
(७) कालस्याऽनहोरात्राणाम्
(८) परे वा
(९) सप्तम्यर्थे क्रियातिपत्तौ क्रियातिपत्तिः
(१०) भूते
(११) वोतात् प्राक्
(१२) क्षेपेऽपि-जात्वोर्वर्त्तमाना
(१३) कथमि सप्तमी च वा
(१४) किंवृत्ते सप्तमी-भविष्यन्त्यौ
(१५) अश्रद्धा-ऽमर्षेऽन्यत्रापि
(१६) किङ्किला-ऽस्त्यर्थयो-भविष्यन्ती
(१७) जातु-यद्-यदा-यदौ सप्तमी
(१८) क्षेपे च यच्च यत्रे
(१९) चित्रे
(२०) शेषे भविष्यन्त्ययदौ
(२१) सप्तम्युता-ऽप्योर्बाढे
(२२) सम्भावनेऽलमर्थे तदर्थानुक्तौ
(२३) अयदि श्रद्धाधातौ नवा
(२४) सतीच्छाऽर्थात्
(२५) वर्त्स्यति हेतु-फले
(२६) कामोक्तावकच्चिति
(२७) इच्छार्थे सप्तमी-पञ्चम्यौ
(२८) विधि-निमन्त्रणा-ऽऽ-मन्त्रणा-ऽधीष्ट-सम्प्रश्न-प्रार्थने
(२९) प्रैषा-ऽनुज्ञा-ऽवसरे कृत्य-पञ्चम्यौ
(३०) सप्तमी चोर्ध्वमौहूर्त्तिके
(३१) स्मे पञ्चमी
(३२) अधीष्टौ
(३३) काल-वेला-समये

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तुम्वाऽवसरे
(३४) सप्तमी यदि
(३५) शक्तार्हे कृत्याश्च
(३६) णिन् चाऽऽवश्यका-ऽऽधमर्ण्ये
(३७) अर्हे तृच्
(३८) आशिष्याशी:-पञ्चम्यौ
(३९) माङ्यद्यतनी
(४०) सस्मे ह्यस्तनी च
(४१) धातोः सम्बन्धे प्रत्यया:
(४२) भृशा-ऽऽभीक्ष्ण्ये हि-स्वौ यथाविधि त-ध्वमौ च तद्युष्मदि
(४३) प्रचये नवा सामान्यार्थस्य
(४४) निषेधेऽलं-खल्वो: क्त्वा
(४५) पराऽवरे
(४६) निमील्यादि-मेऽस्तुल्यकर्तृके
(४७) प्राक्काले
(४८) ख्णम् चाभीक्ष्ण्ये
(४९) पूर्वा-ऽग्रे-प्रथमे
(५०) अन्यथैवं-कथमित्थम: कृगोऽनर्थकात्
(५१) यथा-तथादीर्घोत्तरे
(५२) शापे व्याप्यात्
(५३) स्वाद्वर्थाद् अदीर्घात्
(५४) विद्-दृग्भ्य: कात्स्न्र्ये णम्
(५५) यावतो विन्द-जीव:
(५६) चर्मोदरात् पूरे:
(५७) वृष्टिमान ऊलुक् चास्य वा
(५८) चेलार्थात् क्नोपे:
(५९) गात्र-पुरुषात् स्न:
(६०) शुष्क-चूर्ण-रूक्षात् पिषस्तस्यैव
(६१) कृग्-ग्रहोऽकृत-जीवात्
(६२) निमूलात् कष:
(६३) हनश्च समूलात्
(६४) करणेभ्य:
(६५) स्व-स्नेहनार्थात् पुष-पिष:
(६६) हस्तार्थाद् ग्रह-वर्ति-वृत:
(६७) बन्धेर्नाम्नि
(६८) आधारात्
(६९) कर्तुर्जीव-पुरुषान्नश्-वह:

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(७०) ऊर्ध्वात् पूः-शुषः
(७१) व्याप्याच्चेवात्
(७२) उपात् किरो लवने
(७३) दंशेस्तृतीयया
(७४) हिंसार्थादेकाऽऽप्यात्
(७५) उपपीड-रुध-
कर्षस्तत्सप्तम्या
(७६) प्रमाण-समासत्त्योः
(७७) पञ्चम्या त्वरायाम्
(७८) द्वितीयया
(७९) स्वाङ्गेनाऽध्रुवेण
(८०) परिक्लेश्येन
(८१) विश-पत-पद-स्कन्दो
वीप्सा-ऽऽभीक्ष्ण्ये
(८२) कालेन तृप्यस्वः
क्रियाऽन्तरे
(८३) नाम्ना ग्रहा-ऽऽदिशः
(८४) कृगोऽव्ययेनाऽनिष्टोक्तौ
क्त्वा-णमौ
(८५) तिर्यचाऽपवर्गे
(८६) स्वाङ्गतश्च्व्यर्थे नाना-
विना-धार्थेन भुवश्च
(८७) तूष्णीमा
(८८) आनुलोम्येऽन्वचा
(८९) इच्छार्थे कर्मणः सप्तमी
(९०) शक-धृष-ज्ञा-रभ-लभ-
सहा-ऽर्ह-ग्लाघटा-
ऽस्ति-समर्थार्थे च तुम्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[षष्ठाध्याये प्रथमः पादः]

(१) तद्धितोऽणादिः
(२) पौत्रादि वृद्धम्
(३) वंश्य-ज्यायोभ्रात्रो-
जीवति प्रपौत्राद्यस्त्री युवा
(४) सपिण्डे वयः-स्थानाधिके
जीवद् वा
(५) युव-वृद्धं कुत्सा-ऽर्चे वा
(६) संज्ञा दुर्वा
(७) त्यदादिः
(८) वृद्धिर्यस्य स्वरेष्वादिः
(९) एदोद् देश एवेयादौ
(१०) प्राग्देशे
(११) वा-ऽऽद्यात्
(१२) गोत्रोत्तरपदाद् गोत्रादिवा-
ऽजिह्माकात्य-हरितकात्यात्
(१३) प्राग् जितादण्
(१४) धनादेः पत्युः
(१५) अनिदम्यणपवादे च
दित्यदित्यादित्य-यम-
पत्युत्तर- पदाञ्ञ्यः
(१६) बहिषष्टीकण् च
(१७) कल्यग्नेरेयण्
(१८) पृथिव्या ञा-ऽञ्
(१९) उत्सादेरञ्
(२०) बष्कयादसमासे
(२१) देवाद् यञ् च
(२२) अः स्थाम्नः
(२३) लोम्नोऽपत्येषु
(२४) द्विगोरनपत्ये य-
स्वरादेर्लुबद्धिः
(२५) प्राग् वतः स्त्री-
पुंसात् नञ्-स्नञ्
(२६) त्वे वा
(२७) गोः स्वरे यः
(२८) ङसोऽपत्ये
(२९) आद्यात्
(३०) वृद्धाद् यूनि
(३१) अत इञ्
(३२) बाह्वादिभ्यो गोत्रे
(३३) वर्मणोऽचक्रात्
(३४) अजादिभ्यो धेनोः
(३५) ब्राह्मणाद्वा
(३६) भूयस्-सम्भूयो-ऽम्भो-
ऽमितौजसः स्लुक् च

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(३७) शालङ्क्यौदि-षाडि-वाङ्गलि
(३८) व्यास-वरुट-सुधातृ-निषाद-बिम्ब-चण्डाला-दन्त्यस्य चाऽक्
(३९) पुनर्भू-पुत्र-दुहितृ-ननान्दुरनन्तरेऽञ्
(४०) परस्त्रियाः परशुश्वाऽसावर्ण्ये
(४१) विदादेर्वृद्धे
(४२) गर्गादेर्यञ्
(४३) मधु-ब्रभ्रोर्ब्राह्मण-कौशिके
(४४) कपि-बोधादाङ्गिरसे
(४५) वतण्डात्
(४६) स्त्रियां लुप्
(४७) कुञ्जादेर्ञायन्यः
(४८) स्त्रीबहुष्वायनञ्
(४९) अश्वादेः
(५०) शप-भरद्वाजादात्रेये
(५१) भर्गात् त्रैगर्त्ते
(५२) आत्रेयाद् भारद्वाजे
(५३) नडादिभ्य आयनण्
(५४) यञिञः
(५५) हरितादेरञः
(५६) क्रोष्ट्र-शलङ्कोर्लुक् च
(५७) दर्भ-कृष्णा-ऽग्निशर्म-रण-शरद्वच्छुनकादाग्रायण-ब्राह्मण-वार्षगण्य-वाशिष्ठ-भार्गव-वात्स्ये
(५८) जीवन्त-पर्वताद् वा
(५९) द्रोणाद् वा
(६०) शिवादेरण्
(६१) ऋषि-वृष्ण्यन्धक-कुरुभ्यः
(६२) कन्या-त्रिवेण्याः कनीन-त्रिवणं च
(६३) शुङ्गाभ्यां भारद्वाजे
(६४) विकर्ण-च्छगलाद् वात्स्या-ऽऽत्रेये
(६५) णश्च विश्रवसो विश्लुक् च वा
(६६) सङ्ख्या-सं-भद्रान्मातुर्मातुर्च
(६७) अदोर्नदी-मानुषीनाम्नः
(६८) पीला-साल्वा-मण्डूकाद् वा
(६९) दितेश्चैयण् वा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(७०) ङ्याप्-त्यूङः
(७१) द्विस्वरादनद्याः
(७२) इतोऽनिञः
(७३) शुभ्रादिभ्यः
(७४) श्याम-लक्षणाद् वाशिष्ठे
(७५) विकर्ण-कुषीतकात् काश्यपे
(७६) भ्रुवो भ्रुव् च
(७७) कल्याण्यादेरिन् चाऽन्तस्य
(७८) कुलटाया वा
(७९) चटकाण्णैरः , स्त्रियां तु लुप्
(८०) क्षुद्राभ्य एरण् वा
(८१) गोधाया दुष्टे णारश्च
(८२) जण्ट-पण्टात्
(८३) चतुष्पाद्भ्य एयञ्
(८४) गृष्ट्यादेः
(८५) वाडवेयो वृषे
(८६) रेवत्यादेरिकण्
(८७) वृद्धस्त्रियाः क्षेपे णश्च
(८८) भ्रातुर्व्यः
(८९) ईयः स्वसुश्च
(९०) मातृ-पित्रादेर्डेयणीयणौ
(९१) श्वशुराद् यः
(९२) जातौ राज्ञः
(९३) क्षत्रादियः
(९४) मनोर्या-ऽणौ षश्चान्तः
(९५) माणवः कुत्सायाम्
(९६) कुलादीनः
(९७) यैयकञावसमासे वा
(९८) दुष्कुलादेयण् वा
(९९) महाकुलाद् वाऽञीनञौ
(१००) कुर्वादेर्ण्यः
(१०१) सम्राजः क्षत्रिये
(१०२) सेनान्त-कारु-लक्ष्मणादिञ् च
(१०३) सुयाम्नः सौवीरेष्वाय-निञ्
(१०४) पाण्टाहृति-मिमताण्णश्च
(१०५) भागवित्ति-तार्णविन्द-वा-ऽऽकशापेयान्निन्दाया-मिकण् वा
(१०६) सौयामायनि-यामुन्दा-यनि-वार्ष्यायणेरीयश्च वा
(१०७) तिकादेरायनिञ्
(१०८) दगु-कोशल-कर्मार-च्छाग-वृषाद् यादिः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(१०९) द्विस्वरादणः
(११०) अवृद्धाद् दोर्नवा
(१११) पुत्रान्तात्
(११२) चर्मि-वर्मि-गारेट-कार्कटच-काक-लङ्का-वाकिनाच्च कश्चान्तो-ऽन्त्यस्वरात्
(११३) अदोरायनिः प्रायः
(११४) राष्ट्र-क्षत्रियात् सरूपाद् राजा-ऽपत्ये द्विरञ्
(११५) गान्धारि-साल्वेया-भ्याम्
(११६) पुरु-मगध-कलिङ्ग-सूरमस-द्विस्वरादणञ्
(११७) साल्वांश-प्रत्यग्रथ-कलकूटाऽश्मकादिञ्
(११८) दु-नादि-कुर्वित्-कोशला-ऽजादाञ्ञ्यः
(११९) पाण्डोर्ड्यण्
(१२०) शकादिभ्यो द्रेर्लुप्
(१२१) कुन्त्यवन्तेः स्त्रियाम्
(१२२) कुरोर्वा
(१२३) द्रेरञणोऽप्राच्य-भर्गादेः
(१२४) बहुष्वस्त्रियाम्
(१२५) यस्कादेर्गोत्रे
(१२६) यञञोऽश्यापर्णान्त-गोपवनादेः
(१२७) कौण्डिन्या-ऽऽगस्त्ययोः कुण्डिना-ऽगस्ती च
(१२८) भृग्वङ्गिरस्-कुत्स-वशिष्ठ-गोतमा-ऽत्रेः
(१२९) प्राग्भरते बहुस्वरादिञः
(१३०) वोपकादेः
(१३१) तिककितवादौ द्वन्द्वे
(१३२) द्रचादेस्तथा
(१३३) वाऽन्येन
(१३४) द्व्येकेषु षष्ठ्यास्तत्पुरुषे यञादेर्वा
(१३५) न प्रागूजितीये स्वरे
(१३६) गर्ग-भार्गविका
(१३७) यूनि लुप्
(१३८) वायनणायनिञोः
(१३९) द्रीञो वा
(१४०) ञिदार्षादणिञोः
(१४१) अब्राह्मणात्
(१४२) पैलाऽऽदेः
(१४३) प्राच्येञोऽतौल्वल्यादेः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[षष्ठाध्याये द्वितीयः पादः]

(१) रागाट्टो रक्ते
(२) लाक्षा-रोचनादिकण्
(३) शकल-कर्दमाद् वा
(४) नील-पीतादकम्
(५) उदितगुरोर्भाद् युक्तेऽब्दे
(६) चन्द्रयुक्तात् काले ,
लुप् त्वप्रयुक्ते
(७) द्वन्द्वादीयः
(८) श्रवणा-ऽश्वत्थान्नाम्न्यः
(९) षष्ठ्याः समूहे
(१०) भिक्षाऽऽदेः
(११) क्षुद्रकमालवात् सेनानाम्नि
(१२) गोत्रोक्ष-वत्सोष्ट्र-वृद्धा-
ऽजोरभ्र-मनुष्य-राज-
राजन्य-राजपुत्रादकञ्
(१३) केदाराण्ण्यश्च
(१४) कवचि-हस्त्यचित्ताच्चेकण्
(१५) धेनोरनञः
(१६) ब्राह्मण-माणव-
वाडवाद् यः
(१७) गणिकाया ण्यः
(१८) केशाद् वा
(१९) वाऽश्वादीयः
(२०) पर्श्वा ङ्ण्
(२१) ईनोऽहः क्रतौ
(२२) पृष्ठाद् यः
(२३) चरणाद् धर्मवत्
(२४) गो-रथ-वातात् त्रल्-
कटचलूलम्
(२५) पाशादेश्च ल्यः
(२६) श्वादिभ्योऽञ्
(२७) खलादिभ्यो लिन्
(२८) ग्राम-जन-बन्धु-गज-
सहायात् तल्
(२९) पुरुषात् कृत-हित-वध-
विकारे चैयञ्
(३०) विकारे
(३१) प्राण्यौषधि-वृक्षेभ्योऽवयवे
च
(३२) तालाद् धनुषि
(३३) त्रपु-जतोः षोन्तश्च
(३४) शम्या लः
(३५) पयो-द्रोर्यः
(३६) उष्ट्रादकञ्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(३७) उमोर्णाद् वा
(३८) एण्या एयञ्
(३९) कौशेयम्
(४०) परशव्याद् यलुक् च
(४१) कंसीयाञ्ञ्यः
(४२) हेमार्थान्माने
(४३) द्रोर्वयः
(४४) मानात् क्रीतवत्
(४५) हेमादिभ्योऽञ्
(४६) अभक्ष्या-ऽऽच्छादने वा मयट्
(४७) शर-दर्भ-कूदी-तृण-सोम-वल्वजात्
(४८) एकस्वरात्
(४९) दोरप्राणिनः
(५०) गोः पुरीषे
(५१) व्रीहेः पुरोडाशे
(५२) तिल-यवादनाम्नि
(५३) पिष्टात्
(५४) नाम्नि कः
(५५) ह्योगोदोहादीनञ् हियङ्गुश्चास्य
(५६) अपो यञ् वा
(५७) लुब् बहुलं पुष्प-मूले
(५८) फले
(५९) प्लक्षादेरण्
(६०) जम्ब्वा वा
(६१) न द्विरद्रुवय-गोमय-फलात्
(६२) पितृ-मातुर्व्य-डुलं भ्रातरि
(६३) पित्रोर्डामहट्
(६४) अवेर्दुग्धे सोढ-दूस-मरीसम्
(६५) राष्ट्रेऽनञ्जादिभ्यः
(६६) राजन्यादिभ्योऽकञ्
(६७) वसातेर्वा
(६८) भौरिक्यैषुकार्यादेर्विध-भक्तम्
(६९) निवासा-ऽदूरभव इति देशे नाम्नि
(७०) तदत्राऽस्ति
(७१) तेन निर्वृत्ते च
(७२) नद्यां मतुः
(७३) मध्वादेः
(७४) नड-कुमुद-वेतस-महिषाड्डित्
(७५) नड-शादाद् वलः
(७६) शिखायाः
(७७) शिरीषादिक-कणौ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(७८) शर्कराया इकणीया-ऽण् च
(७९) रोऽश्मादेः
(८०) प्रेक्षादेरिन्
(८१) तृणादेः सल्
(८२) काशादेरिलः
(८३) अरीहणादेरकण्
(८४) सुपन्थ्यादेर्ण्यः
(८५) सुतङ्गमादेरिञ्
(८६) बलादेर्यः
(८७) अहरादिभ्योऽञ्
(८८) सख्यादेरेयण्
(८९) पन्थ्यादेरायनण्
(९०) कर्णादेरायनिञ्
(९१) उत्करादेरीयः
(९२) नडादेः कीयः
(९३) कृशाश्वादेरीयण्
(९४) ऋश्यादेः कः
(९५) वराहादेः कण्
(९६) कुमुदादेरिकः
(९७) अश्वत्थादेरिकण्
(९८) साऽस्य पौर्णमासी
(९९) आग्रहायण्यश्वत्थादिकण्
(१००) चैत्री-कार्त्तिकी-फाल्गुनी-श्रवणाद् वा
(१०१) देवता
(१०२) पैङ्गाक्षीपुत्रादेरीयः
(१०३) शुक्रादियः
(१०४) शतरुद्रात् तौ
(१०५) अपोनपादपान्नपा-तस्तृ चाऽऽतः
(१०६) महेन्द्राद् वा
(१०७) क-सोमाट्टयण्
(१०८) द्यावापृथिवी-शुनासीरा-ऽग्नीषोम-मरुत्वद्-वास्तोष्पति-गृहमेधा-दीय-यौ
(१०९) वाय्वृतु-पित्रुषसो यः
(११०) महाराज-प्रोष्ठपदादिकण्
(१११) कालाद् भववत्
(११२) आदेः छन्दसः प्रगाथे
(११३) योदधृ-प्रयोजनाद् युद्धे
(११४) भावघञोऽस्यां णः
(११५) श्यैनम्पाता-तैलम्पाता
(११६) प्रहरणात् क्रीडायां णः
(११७) तद् वेत्त्यधीते
(११८) न्यायादेरिकण्
(११९) पद-कल्प-लक्षणान्त-क्रत्वाख्याना-ऽऽख्यायि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कात्
(१२०) अकल्पात् सूत्रात्
(१२१) अधर्म-क्षत्र-त्रि-संसर्गाऽङ्गाद् विद्यायाः
(१२२) याज्ञिकौक्थिक-लौकायितिकम्
(१२३) अनुब्राह्मणादिन्
(१२४) शत-षष्टेः पथ इकट्
(१२५) पदोत्तरपदेभ्य इकः
(१२६) पद-क्रम-शिक्षा-मीमांसा-साम्नोऽकः
(१२७) स-सर्वपूर्वात् लुप्
(१२८) सङ्घचाकात् सूत्रे
(१२९) प्रोक्तात्
(१३०) वेदेनब्राह्मणमत्रैव
(१३१) तेन च्छन्ने रथे
(१३२) पाण्डुकम्बलादिन्
(१३३) दृष्टे साम्नि नाम्नि
(१३४) गोत्रादङ्कवत्
(१३५) वामदेवाद् यः
(१३६) डिद् वाऽण्
(१३७) वा जाते द्विः
(१३८) तत्रोद्धृते पात्रेभ्यः
(१३९) स्थण्डिलाच्छेते व्रती
(१४०) संस्कृते भक्ष्ये
(१४१) शूलोखाद् यः
(१४२) क्षीरादेयण्
(१४३) दध्न इकण्
(१४४) वोदश्वितः
(१४५) क्वचित्

[षष्ठाध्याये तृतीयः पादः]

(१) शेषे
(२) नद्यादेर्ढेयण्
(३) राष्ट्रादियः
(४) दूरादेत्यः
(५) उत्तरादाहञ्
(६) पारावारादीनः
(७) व्यस्त-व्यत्यस्तात्
(८) द्यु-प्रागपागुदक्-प्रतीचो यः
(९) ग्रामादीनञ् च
(१०) कत्र्यादेश्चैयकञ्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(११) कुण्डघादिभ्यो यलुक् च
(१२) कुल-कुक्षि-ग्रीवाच्छ्वाऽस्यलङ्कारे
(१३) दक्षिणा-पश्चात्-पुरसस्त्यण्
(१४) वहल्यूर्दि-पर्दि-कापिश्याष्टायनण्
(१५) रङ्कोः प्राणिनि वा
(१६) केहाऽमा-त्र-तसस्त्यच्
(१७) नेर्ध्रुवे
(१८) निसो गते
(१९) ऐषमो-ह्यस्-श्वसो वा
(२०) कन्थाया इकण्
(२१) वर्णावकञ्
(२२) रूप्योत्तरपदा-ऽरण्याण्णः
(२३) दिक्पूर्वादनाम्नः
(२४) मद्रादञ्
(२५) उदग्ग्रामाद् यकृल्लोम्नः
(२६) गौष्ठी-तैकी-नैकेती-गोमती-शूरसेन-वाहीक-रोमक-पटच्चरात्
(२७) शकलादेर्यञः
(२८) वृद्धेञः
(२९) न द्विस्वरात् प्राग्-भरतात्
(३०) भवतोरिकणीयसौ·
(३१) पर-जन-राज्ञोऽकीयः
(३२) दोरीयः
(३३) उष्णादिभ्यः कालात्
(३४) व्यादिभ्यो णिकेकणौ
(३५) काश्यादेः
(३६) वाहीकेषु ग्रामात्
(३७) वोशीनरेषु
(३८) वृजि-मद्राद् देशात् कः
(३९) उवर्णादिकण्
(४०) दोरेव प्राचः
(४१) ईतोऽकञ्
(४२) रोपान्त्यात्
(४३) प्रस्थ-पुर-वहान्त-योपान्त्य-धन्वार्थात्
(४४) राष्ट्रेभ्यः
(४५) बहुविषयेभ्यः
(४६) धूमादेः
(४७) सौवीरेषु कूलात्
(४८) समुद्रान्नृ-नावोः
(४९) नगरात् कुत्सा-दाक्ष्ये
(५०) कच्छा-ऽग्नि-वक्त्र-वर्त्तोत्तरपदात्
(५१) अरण्यात् पथि-न्याया-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ऽध्यायेभ-नर-विहारे
(५२) गोमये वा
(५३) कुरु-युगन्धराद् वा
(५४) साल्वाद् गो-यवाग्वपत्तौ
(५५) कच्छादेर्नृ-नृस्थे
(५६) कोपान्त्याच्चाऽण्
(५७) गर्त्तोत्तरपदादीयः
(५८) कटपूर्वात् प्राचः
(५९) क-खोपान्त्य-कन्था-
पलद-नगर-ग्राम-
ह्रदोत्तरपदाद् दोः
(६०) पर्वतात्
(६१) अनरे वा
(६२) पर्ण-कृकणाद् भारद्वाजात्
(६३) गहादिभ्यः
(६४) पृथीवीमध्यान्मध्यमश्चास्य
(६५) निवासाच्चरणेऽण्
(६६) वेणुकादिभ्य ईयण्
(६७) वा युष्मदस्मदोऽञीनञौ
युष्माका-ऽस्माकं चास्यै-
कत्वे तु तवक-ममकम्
(६८) द्वीपादनुसमुद्रं ण्यः
(६९) अर्धाद् यः
(७०) सपूर्वादिकण्
(७१) दिक्पूर्वात् तौ
(७२) ग्राम-राष्ट्रांशादणिकणौ
(७३) परा-ऽवरा-
ऽधमोत्तमादेर्यः
(७४) अमोऽन्ता-ऽवो-ऽधसः
(७५) पश्चादाद्यन्ता-ऽग्रादिमः
(७६) मध्यान्मः
(७७) मध्य उत्कर्षा-ऽपकर्षयोरः
(७८) अध्यात्मादिभ्य इकण्
(७९) समानपूर्व-लोकोत्तरपदात्
(८०) वर्षा-कालेभ्यः
(८१) शरदः श्राद्धे कर्मणि
(८२) नवा रोगा-ऽऽतपे
(८३) निशा-प्रदोषात्
(८४) श्वसस्तादिः
(८५) चिर-परुत्-परारेस्त्नः
(८६) पुरो नः
(८७) पूर्वाह्णा-ऽपराह्णात् तनट्
(८८) सायं-चिरं-प्राह्णे-
प्रगे-ऽव्ययात्
(८९) भर्तु-सन्ध्यादेरण्
(९०) संवत्सरात् फल-पर्वणोः
(९१) हेमन्ताद् वा , तलुक् च
(९२) प्रावृष एण्यः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(९३) स्थामा-ऽजिनान्ताल्लुप्
(९४) तत्र कृत-लब्ध-क्रीत-सम्भूते
(९५) कुशले
(९६) पथोऽकः
(९७) कोऽश्मादेः
(९८) जाते
(९९) प्रावृष इकः
(१००) नाम्नि शरदोऽकञ्
(१०१) सिन्ध्वपकरात् का-ऽणौ
(१०२) पूर्वाह्ला-ऽपराह्ला-ऽऽर्द्रा-मूल-प्रदोषा-ऽवस्करादकः
(१०३) पथः पन्थ च
(१०४) अश्व वाऽमावास्यायाः
(१०५) श्रविष्ठा-ऽषाढादीयण् च
(१०६) फल्गुन्याष्टेः
(१०७) बहुला-ऽनुराधा-पुष्यार्थ-पुनर्वसु-हस्त-विशाखा-स्वातेर्लुप्
(१०८) चित्रा-रेवती-रोहिण्याः स्त्रियाम्
(१०९) बहुलमन्येभ्यः
(११०) स्थानान्त-गोशाल-खरशालात्
(१११) वत्सशालाद्वा
(११२) सोदर्य-समानोदर्यौ
(११३) कालाद् देये ऋणे
(११४) कलाप्यश्वत्थ-यवबुसो-माव्यासैषमसोऽकः
(११५) ग्रीष्मा-ऽवरसमादकञ्
(११६) संवत्सरा-ऽऽग्रहायण्या इकण् च
(११७) साधु-पुष्यत्-पच्यमाने
(११८) उप्ते
(११९) आश्वयुज्या अकञ्
(१२०) ग्रीष्म-वसन्ताद् वा
(१२१) व्याहरति मृगे
(१२२) जयिनि च
(१२३) भवे
(१२४) दिगादिदेहांशाद् यः
(१२५) नाम्न्युदकात्
(१२६) मध्याद् दिनण्-णेया मोऽन्तश्च
(१२७) जिह्वामूला-ऽङ्गुलेश्चेयः
(१२८) वर्गान्तात्
(१२९) ईन-यौ चाशब्दे
(१३०) दृति-कुक्षि-कलशि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वस्त्यहेरेयण्
(१३१) आस्तेयम्
(१३२) ग्रीवातोऽण् च
(१३३) चतुर्मासान्नाम्नि
(१३४) यज्ञे ञ्यः
(१३५) गम्भीर-पञ्चजन-बहिर्देवात्
(१३६) परिमुखादेरव्ययीभावात्
(१३७) अन्तःपूर्वादिकण्
(१३८) पर्यनोर्ग्रामात्
(१३९) उपाज्जानु-नीवि-कर्णात् प्रायेण
(१४०) रूढावन्तःपुरादिकः
(१४१) कर्ण-ललाटात् कल्
(१४२) तस्य व्याख्याने च ग्रन्थात्
(१४३) प्रायो बहुस्वरादिकण्
(१४४) ऋगृद्-द्विस्वर-यागेभ्यः
(१४५) ऋषेरध्याये
(१४६) पुरोडाश-पौरोडाशा-दिकेकटौ
(१४७) छन्दसो यः
(१४८) शिक्षादेश्चाण्
(१४९) तत आगते
(१५०) विद्या-योनिसम्ब-न्धादकञ्
(१५१) पितुर्यौ वा
(१५२) ऋत इकण्
(१५३) आयस्थानात्
(१५४) शुण्डिकादेरण्
(१५५) गोत्रादङ्कवत्
(१५६) नृ-हेतुभ्यो रूप्य-मयटौ वा
(१५७) प्रभवति
(१५८) वैडूर्यः
(१५९) त्यदादेर्मयट्
(१६०) तस्येदम्
(१६१) हल-सीरादिकण्
(१६२) समिध आधाने टेन्यण्
(१६३) विवाहे द्वन्द्वादकल्
(१६४) अदेवासुरादिभ्यो वैरे
(१६५) नटान्नृत्ते ञ्यः
(१६६) छन्दोगौक्थिक-याज्ञिक-बह्वृचाच्च धर्मा-ऽऽम्नाय-संघे
(१६७) आथर्वणिकादणि-कलुक् च
(१६८) चरणादकञ्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(१६९) गोत्राददण्डमाणव-शिष्ये
(१७०) रैवतिकादेरीयः
(१७१) कौपिञ्जल-हास्तिपदादण्
(१७२) सङ्घ-घोषा-ऽङ्क-लक्षणेऽञ्-यञिञः
(१७३) शाकलादकञ् च
(१७४) गृहेऽग्नीधो रण् धश्च
(१७५) स्थात् साऽऽदेश्च वोद्भङ्गे
(१७६) यः
(१७७) पत्रपूर्वादऽञ्
(१७८) वाहनात्
(१७९) वाह्य-पथ्युपकरणे
(१८०) वहेस्तुरिश्चादिः
(१८१) तेन प्रोक्ते
(१८२) मौदादिभ्यः
(१८३) कठादिभ्यो वेदे लुप्
(१८४) तित्तिरि-वरतन्तु-खण्डिकोखादीयण्
(१८५) छगलिनो णेयिन्
(१८६) शौनकादिभ्यो णिन्
(१८७) पुराणे कल्पे
(१८८) काश्यप-कौशिकाद् वेदवच्च
(१८९) शिलालि-पाराश-र्यान्नट-भिक्षुसूत्रे
(१९०) कृशाश्व-कर्मन्दादिन्
(१९१) उपज्ञाते
(१९२) कृते
(१९३) नाम्नि मक्षिकादिभ्यः
(१९४) कुलालादेरकञ्
(१९५) सर्वचर्मण ईनेनञौ
(१९६) उरसो या-ऽणौ
(१९७) छन्दस्यः
(१९८) अमोऽधिकृत्य ग्रन्थे
(१९९) ज्योतिषम्
(२००) शिशुक्रन्दादिभ्य ईयः
(२०१) द्वन्द्वात् प्रायः
(२०२) अभिनिष्क्रामति द्वारे
(२०३) गच्छति पथि दूते
(२०४) भजति
(२०५) महाराजादिकण्
(२०६) अचित्ताददेशकालात्
(२०७) वासुदेवा-ऽर्जुनादकः
(२०८) गोत्र-क्षत्रियेभ्योऽकञ् प्रायः
(२०९) सरूपाद् द्रेः सर्वं राष्ट्रवत्
(२१०) टस्तुल्यदिशि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(२११) तसिः
(२१२) यश्चोरसः
(२१३) सेर्निवासादस्य
(२१४) आभिजनात्
(२१५) शण्डिकादेर्ण्यः
(२१६) सिन्ध्वादेरञ्
(२१७) सलातुरादीयण्
(२१८) तूदी-वर्मत्या एयण्
(२१९) गिरेरीयोऽस्त्राजीवे

[षष्ठाध्याये चतुर्थः पादः]

(१) इकण्
(२) तेन जित-जयद्-दीव्यत्-खनत्सु
(३) संस्कृते
(४) कुलत्थ-कोपान्त्यादण्
(५) संसृष्टे
(६) लवणादः
(७) चूर्ण-मुद्गाभ्यामिनणौ
(८) व्यञ्जनेभ्य उपसिक्ते
(९) तरति
(१०) नौ-द्विस्वरादिकः
(११) चरति
(१२) पर्पादिरिकट्
(१३) पदिकः
(१४) श्वगणाद् वा
(१५) वेतनादेर्जीविति
(१६) व्यस्ताच्च क्रय-विक्रयादिकः
(१७) वस्त्रात्
(१८) आयुधादीयश्च
(१९) व्रातादीनञ्
(२०) निर्वृत्तेऽक्षद्यूतादेः
(२१) भावादिमः
(२२) याचिता-ऽपमित्यात् कण्
(२३) हरत्युत्सङ्गादेः
(२४) भस्त्रादेरिकट्
(२५) विवध-वीवधाद् वा
(२६) कुटिलिकाया अण्
(२७) ओजस्-सहो-ऽम्भसो वर्तते
(२८) तं प्रत्यनोर्लोमिप-कूलात्
(२९) परेर्मुख-पार्श्वात्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(३०) रक्षदुञ्छतोः
(३१) पक्षि-मत्स्य-मृगार्थाद् घ्नति
(३२) परिपन्थात् तिष्ठति च
(३३) परिपथात्
(३४) अवृद्धेर्गृह्णति गर्ह्ये
(३५) कुसीदादिकट्
(३६) दशैकादशादिकश्च
(३७) अर्थ-पद-पदोत्तरपद-ललाम-प्रतिकण्ठात्
(३८) परदारादिभ्यो गच्छति
(३९) प्रतिपथादिकश्च
(४०) माथोत्तरपद-पदव्याक्रन्दाद् धावति
(४१) पश्चात्यनुपदात्
(४२) सुस्नातादिभ्यः पृच्छति
(४३) प्रभूतादिभ्यो ब्रुवति
(४४) माशब्द इत्यादिभ्यः
(४५) शाब्दिक-दार्दरिक-लालाटिक-कौक्कुटिकम्
(४६) समूहार्थात् समवेते
(४७) पर्षदो ण्यः
(४८) सेनाया वा
(४९) धर्मा-ऽधर्माच्चरति
(५०) षष्ठ्या धर्म्ये
(५१) ऋन्नरादेरण्
(५२) विभाजयितृ-विशसितुर्णीड्लुक् च
(५३) अवक्रये
(५४) तदस्य पण्यम्
(५५) किशरादेरिकट्
(५६) शलालुनो वा
(५७) शिल्पम्
(५८) मड्डुक-झर्झराद् वाऽण्
(५९) शीलम्
(६०) अङ्स्थाच्छत्राऽऽदेरञ्
(६१) तूष्णीकः
(६२) प्रहरणम्
(६३) परश्वधाद् वाऽण्
(६४) शक्ति-यष्टेष्टीकण्
(६५) वेष्टयादिभ्यः
(६६) नास्तिका-ऽऽस्तिक-दैष्टिकम्
(६७) वृत्तोऽपपाठोऽनुयोगे
(६८) बहुस्वरपूर्वादिकः
(६९) भक्ष्यं हितमस्मै
(७०) नियुक्तं दीयते
(७१) श्राणा-मांसौदनादिको

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वा
(७२) भक्तौदनाद्वाऽणिकट्
(७३) नवयज्ञादयोऽस्मिन् वर्तन्ते
(७४) तत्र नियुक्ते
(७५) अगारान्तादिकः
(७६) अदेश-कालादध्यायिनि
(७७) निकटादिषु वसति
(७८) सतीर्थ्यः
(७९) प्रस्तार-संस्थान-तदन्त-कठिनान्तेभ्यो व्यवहरति
(८०) संख्यादेश्चाऽऽर्हदलुचः
(८१) गोदानादीनां ब्रह्मचर्ये
(८२) चन्द्रायणं च चरति
(८३) देवव्रतादीन् डिन्
(८४) डकश्चाष्टाचत्वारिंशतं वर्षाणाम्
(८५) चातुर्मास्यं तौ यलुक् च
(८६) क्रोश-योजनपूर्वाच्छताद् योजनाच्चाऽभिगमार्हे
(८७) तद् यात्येभ्यः
(८८) पथ इकट्
(८९) नित्यं णः पन्थश्च
(९०) शङ्कूत्तर-कान्तारा-ऽज-वारि-स्थल-जङ्गलादेस्ते-नाऽऽहृते च
(९१) स्थलादेर्मधुक-मरिचेऽण्
(९२) तुरायण-पारायणं यजमाना-ऽधीयाने
(९३) संशयं प्राप्ते ज्ञेये
(९४) तस्मै योगादेः शक्ते
(९५) योग-कर्मभ्यां योकञौ
(९६) यज्ञानां दक्षिणायाम्
(९७) तेषु देये
(९८) काले कार्ये च भववत्
(९९) व्युष्टादिष्वण्
(१००) यथाकथाचाण्णः
(१०१) तेन हस्ताद् यः
(१०२) शोभमाने
(१०३) कर्म-वेषाद् यः
(१०४) कालात् परिजय्य-लभ्य-कार्य-सुकरे
(१०५) निर्वृत्ते
(१०६) तं भावि-भूते
(१०७) तस्मै भृता-ऽधीष्टे च
(१०८) षण्मासादवयसि ण्येकौ
(१०९) समाया ईनः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(११०) रात्र्यहः-संवत्सराच्च द्विगोर्वा

(१११) वर्षादश्च वा

(११२) प्राणिनि भूते

(११३) मासाद् वयसि यः

(११४) ईनञ् च

(११५) षण्मासाद् य-यणिकण्

(११६) सोऽस्य ब्रह्मचर्यतद्वतोः

(११७) प्रयोजनम्

(११८) एकागाराच्चौरे

(११९) चूडादिभ्योऽण्

(१२०) विशाखा-ऽषाढान्मन्थ-दण्डे

(१२१) उत्थापनादेरीयः

(१२२) विशि-रुहि-पदि-पूरि-समापेरनात् सपूर्वपदात्

(१२३) स्वर्ग-स्वस्तिवाचना-दिभ्यो य-लुपौ

(१२४) समयात् प्राप्तः

(१२५) ऋत्वादिभ्योऽण्

(१२६) कालाद् यः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(१२७) दीर्घः
(१२८) आकालिकमिकश्चाद्यन्ते
(१२९) त्रिंशद्-विंशतेर्ड-कोऽसंज्ञायामाऽर्हदर्थे
(१३०) सङ्ख्या-डतेश्चाऽशत्-ति-ष्टेः कः
(१३१) शतात् केवलादत-स्मिन् येकौ
(१३२) वाऽतोरिकः
(१३३) कार्षापणादिकट् प्रतिश्चास्य वा
(१३४) अर्धात् पल-कंस-कर्षात्
(१३५) कंसा-ऽर्धात्
(१३६) सहस्र-शतमानादण्
(१३७) शूर्पाद् वाऽञ्
(१३८) वसनात्
(१३९) विंशतिकात्
(१४०) द्विगोरीनः
(१४१) अनाम्न्यद्विः प्लुप्
(१४२) नवाऽणः
(१४३) सुवर्ण-कार्षापणात्
(१४४) द्वि-त्रि-बहोर्निष्क-विस्तात्
(१४५) शताद् यः
(१४६) शाणात्
(१४७) द्वि-त्र्यादेर्या-ऽण् वा
(१४८) पण-पाद-माषाद् यः
(१४९) खारी-काकणीभ्यः कच्
(१५०) मूल्यैः क्रीते
(१५१) तस्य वापे
(१५२) वात-पित्त-श्लेष्म-सन्निपाताच्छमन-कोपने
(१५३) हेतौ संयोगोत्पाते
(१५४) पुत्राद् येयौ
(१५५) द्विस्वर-ब्रह्मवर्चसाद् योऽसङ्ख्या-परिमाणा-ऽश्वादेः
(१५६) पृथिवी-सर्वभूमेरीश-ज्ञातयोश्चाञ्
(१५७) लोक-सर्वलोकाज्ज्ञाते
(१५८) तदत्राऽस्मै वा वृद्ध्याय-लाभोपदा-शुल्कं देयम्
(१५९) पूरणा-ऽर्धादिकः
(१६०) भागाद् येकौ
(१६१) तं पचति द्रोणाद् वाऽञ्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(१६२) सम्भवदवहरतोश्च
(१६३) पात्रा-ऽऽचिता-ऽऽढकादीनो वा
(१६४) द्विगोरीनेकटौ वा
(१६५) कुलिजाद् वा लुप् च
(१६६) वंशादेर्भाराद्धरद्-वहदावहत्सु
(१६७) द्रव्य-वस्नात् केकम्
(१६८) सोऽस्य भृति-वस्नांशम्
(१६९) मानम्
(१७०) जीवितस्य सन्
(१७१) सङ्ख्याया: संघ-सूत्र-पाठे
(१७२) नाम्नि
(१७३) विंशत्यादय:
(१७४) त्रैंश-चात्वारिंशम्
(१७५) पञ्चद्-दशद् वर्गे वा
(१७६) स्तोमे डट्
(१७७) तमर्हति
(१७८) दण्डादेर्य:
(१७९) यज्ञादिय:
(१८०) पात्रात् तौ
(१८१) दक्षिणा-कडङ्गर-स्थालीबिलादीय-यौ
(१८२) छेदादेर्नित्यम्
(१८३) विरागाद् विरङ्गश्च
(१८४) शीर्षच्छेदाद् यो वा
(१८५) शालीन-कौपीना-ऽऽर्त्विजीनम्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[सप्तमाध्याये प्रथमः पादः]

(१) यः
(२) वहति रथ-युग-प्रासङ्गात्
(३) धुरो यैयण्
(४) वामाद्यादेरीनः
(५) अश्वैकादेः
(६) हल-सीरादिकण्
(७) शकटादण्
(८) विध्यत्यनन्येन
(९) धनगणाल्लब्धरि
(१०) णोऽन्नात्
(११) हृद्य-पद्य-तुल्य-मूल्य-वश्य-पथ्य-वयस्य-धेनुष्या-गार्हपत्य-जन्य-धर्म्यम्
(१२) नौ-विषेण तार्य-वध्ये
(१३) न्याया-ऽर्थादनपेते
(१४) मत-मदस्य करणे
(१५) तत्र साधौ
(१६) पथ्यतिथि-वसति-स्वपतेरेयण्
(१७) भक्ताण्णः
(१८) पर्षदो ण्य-णौ
(१९) सर्वजनाण्ण्येनञौ
(२०) प्रतिजनादेरीनञ्
(२१) कथादेरिकण्
(२२) देवतान्तात् तदर्थे
(२३) पाद्या-ऽर्घ्ये
(२४) ण्योऽतिथेः
(२५) सादेश्चा तदः
(२६) हलस्य कर्षे
(२७) सीतया संगते
(२८) ईयः
(२९) हविरन्नभेदा-ऽपूपादेर्यो वा
(३०) उवर्ण-युगादेर्यः
(३१) नाभेर्नभ् चादेहांशात्
(३२) नृ चोधसः
(३३) शुनो वश्चोदृत्
(३४) कम्बलान्नाम्नि
(३५) तस्मै हिते
(३६) न राजा-ऽऽचार्य-ब्राह्मण-वृष्णः
(३७) प्राण्यङ्ग-रथ-तिल-यव-वृष-ब्रह्म-माषाद् यः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(३८) अव्यजात् ष्यप्
(३९) चरक-माणवादीनञ्
(४०) भोगोत्तरपदा-
ऽऽत्मभ्यामीनः
(४१) पञ्च-सर्व-विश्वाज्जनात्
कर्मधारये
(४२) महत्-सर्वादिकण्
(४३) सर्वाण्णो वा
(४४) परिणामिनि तदर्थे
(४५) चर्मण्यञ्
(४६) ऋषभोपानहाञ्ञ्यः
(४७) छदिर्बलेरेयण्
(४८) परिखाऽस्य स्यात्
(४९) अत्र च
(५०) तद्
(५१) तस्याऽर्हे क्रियायां वत्
(५२) स्यादेरिवे
(५३) तत्र
(५४) तस्य
(५५) भावे त्व-तल्
(५६) प्राक् त्वादगडुलादेः
(५७) नञ्तत्पुरुषादबुधादेः
(५८) पृथ्वादेरिमन् वा
(५९) वर्ण-दृढादिभ्यष्ट्यण् च
वा
(६०) पति-राजान्त-गुणाङ्ग-
राजादिभ्यः कर्मणि च
(६१) अर्हतस्तो न्त् च
(६२) सहायाद् वा
(६३) सखि-वणिग्-दूताद् यः
(६४) स्तेनान्नलुक् च
(६५) कपि-ज्ञातेरेयण्
(६६) प्राणिजाति-वयोऽर्थादञ्
(६७) युवादेरण्
(६८) हायनान्तात्
(६९) य्वृवर्णाल्लघ्वादेः
(७०) पुरुष-हृदयादसमासे
(७१) श्रोत्रियाद् यलुक् च
(७२) योपान्त्याद् गुरूपोत्तमाद-
सुप्रख्यादकञ्
(७३) चोरादेः
(७४) द्वन्द्वाल्लित्
(७५) गोत्र-चरणाच्छ्लाघा-
ऽत्याकार-प्राप्त्यवगमे
(७६) होत्राभ्य ईयः
(७७) ब्रह्मणस्त्वः
(७८) शाकट-शाकिनौ क्षेत्रे
(७९) धान्येभ्य ईनञ्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(८०) व्रीहि-शालेरेयण्
(८१) यव-यवक-षष्टिकाद् यः
(८२) वाऽणु-माषात्
(८३) वोमा-भङ्गा-तिलात्
(८४) अलाब्वाश्च कटो रजसि
(८५) अह्ना गम्येऽश्वादीनञ्
(८६) कुलाज्जल्पे
(८७) पील्वादेः कुणः पाके
(८८) कर्णादिर्मूले जाहः
(८९) पक्षात् तिः
(९०) हिमादेलुः सहे
(९१) बल-वातादूलः
(९२) शीतोष्ण-तृप्रादालुरसहे
(९३) यथामुख-संमुखादीनस्तद् दृश्यतेऽस्मिन्
(९४) सर्वादेः पथ्यङ्ग-कर्म-पत्र-पात्र-शरावं व्याप्नोति
(९५) आप्रपदम्
(९६) अनुपदं बद्धा
(९७) अयानयं नेयः
(९८) सर्वाऽन्नमत्ति
(९९) परोवरीण-परम्परीण-पुत्रपौत्रीणम्
(१००) यथाकामा-ऽनुकामा-ऽत्यन्तं गामिनि
(१०१) पारावारं व्यस्त-व्यत्यस्तं च
(१०२) अनुग्वलम्
(१०३) अध्वानं येनौ
(१०४) अभ्यमित्रमीयश्च
(१०५) समांसमीना-ऽद्यश्वीना-ऽद्यप्रातीना-ऽऽगवीन-साप्तपदीनम्
(१०६) अषडक्षा-ऽऽशितं-ग्वलङ्कर्मा-ऽलंपुरुषादीनः
(१०७) अदिक्स्त्रियां वाऽञ्चः
(१०८) तस्य तुल्ये कः संज्ञा-प्रतिकृत्योः
(१०९) न नृ-पूजार्थ-ध्वज-चित्रे
(११०) अपण्ये जीवने
(१११) देव-पथादिभ्यः
(११२) बस्तेरेयञ्
(११३) शिलाया एयच्च
(११४) शाखादेर्यः
(११५) द्रोर्भव्ये
(११६) कुशाग्रादीयः
(११७) काकतालीयादयः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(११८) शर्करादेरण्
(११९) अः सपत्न्याः
(१२०) एकशालाया इकः
(१२१) गोण्यादेश्चेकण्
(१२२) कर्कलोहिताट्टीकण् च
(१२३) वेर्विस्तृते शाल-शङ्कटौ
(१२४) कटः
(१२५) सं-प्रोन्नेः संकीर्ण-प्रकाशा-ऽधिक-समीपे
(१२६) अवात् कुटारश्चावनते
(१२७) नासानति-तद्वतोष्टीट-नाट-भ्रटम्
(१२८) नेरिन-पिट-काश्विक्-चि-चिकश्चाऽस्य
(१२९) बिड-बिरीसौ नीरन्ध्रे च
(१३०) क्लिन्नाल्लश्चक्षुषि चिल्-पिल्-चुल् चास्य
(१३१) उपत्यका-ऽधित्यके
(१३२) अवेः संघात-विस्तारे कट-पटम्
(१३३) पशुभ्यः स्थाने गोष्ठः
(१३४) द्वित्वे गोयुगः
(१३५) षट्त्वे षङ्गवः
(१३६) तिलादिभ्यः स्नेहे तैलः
(१३७) तत्र घटते कर्मणष्ठः
(१३८) तदस्य सञ्जातं तारकादिभ्य इतः
(१३९) गर्भादप्राणिनि
(१४०) प्रमाणान्मात्रट्
(१४१) हस्ति-पुरुषाद् वाऽण्
(१४२) वोर्ध्वं दघ्नट् द्वयसट्
(१४३) मानादसंशये लुप्
(१४४) द्विगोः संशये च
(१४५) मात्रट्
(१४६) शन्-शद्-विंशतेः
(१४७) डिन्
(१४८) इदं-किमोऽतुरियू-किय् चास्य
(१४९) यत्-तदेतदो डावादिः
(१५०) यत्-तत्-किमः सङ्ख्याया डतिर्वा
(१५१) अवयवात् तयट्
(१५२) द्वि-त्रिभ्यामयट् वा
(१५३) द्व्यादेर्गुणान्मूल्य-क्रेये मयट्
(१५४) अधिकं तत्सङ्ख्यमस्मिन्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शत-सहस्रे शति-शद्-
दशान्तायाः डः
(१५५) सङ्ख्यापूरणे डट्
(१५६) विंशत्यादेर्वा तमट्
(१५७) शतादि-मासा-
ऽर्द्धमास-संवत्सरात्
(१५८) षष्ट्यादेरसङ्ख्यादेः
(१५९) नो मट्
(१६०) पित् तिथट् बहु-गण-
पूग-संघात्
(१६१) अतोरिथट्
(१६२) षट्-कति-कतिपयात्
थट्
(१६३) चतुरः
(१६४) येयौ च लुक् च
(१६५) द्वेस्तीयः
(१६६) त्रेस्तृ च
(१६७) पूर्वमनेन सादेश्चेन्
(१६८) इष्टादेः
(१६९) श्राद्धमद्यभुक्तमिकेनौ
(१७०) अनुपद्यन्वेष्टा
(१७१) दाण्डाजिनिका-
ऽऽयः शूलिक-पार्श्वकम्
(१७२) क्षेत्रेऽन्यस्मिन् नाश्य
इयः
(१७३) छन्दोऽधीते श्रोत्रश्च
वा
(१७४) इन्द्रियम्
(१७५) तेन वित्ते चञ्चु-चणौ
(१७६) पूरणाद् ग्रन्थस्यग्राहके
को लुक् चाऽस्य
(१७७) ग्रहणाद् वा
(१७८) सस्याद् गुणात् परिजाते
(१७९) धन-हिरण्ये कामे
(१८०) स्वाङ्गेषु सक्ते
(१८१) उदरे त्विकणाद्यूने
(१८२) अंशं हारिणि
(१८३) तन्त्रादचिरोद्धृते
(१८४) ब्राह्मणान्नाम्नि
(१८५) उष्णात्
(१८६) शीताच्च कारिणि
(१८७) अधेरारूढे
(१८८) अनोः कमितरि
(१८९) अभेरीश्च वा
(१९०) सोऽस्य मुख्यः
(१९१) शृङ्खलकः करभे
(१९२) उदुत्सोरुन्मनसि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(१९३) काल-हेतु-फलाद् रोगे
(१९४) प्रायोऽन्नमस्मिन् नाम्नि
(१९५) कुल्माषादण्
(१९६) वटकादिन्
(१९७) साक्षाद् द्रष्टा

[सप्तमाध्याये द्वितीयः पादः]

(१) तदस्याऽस्त्यस्मिन्निति मतुः
(२) आ यात्
(३) नावादेरिकः
(४) शिखादिभ्य इन्
(५) व्रीह्यादिभ्यस्तौ
(६) अतोऽनेकस्वरात्
(७) अशिरसोऽशीर्षश्च
(८) अर्था-ऽर्थान्ताद् भावात्
(९) व्रीह्यर्थ-तुन्दादेरिलश्च
(१०) स्वाङ्गाद् विवृद्धात् ते
(११) वृन्दादारकः
(१२) शृङ्गात्
(१३) फल-बर्हाच्चेनः
(१४) मलादीमसश्च
(१५) मरुत्-पर्वणस्तः
(१६) वलि-वटि-तुण्डेर्भः
(१७) ऊर्णा-ऽहं-शुभमो युस्
(१८) कं-शंभ्यां युस्-ति-यस्-तु-त-व-भम्
(१९) बल-वात-दन्त-ललाटादूलः
(२०) प्राण्यङ्गादातो लः
(२१) सिध्मादि-क्षुद्रजन्तु-रुग्भ्यः
(२२) प्रज्ञा-पर्णोदक-फेनाल्लेलौ
(२३) काला-जटा-घाटात् क्षेपे
(२४) वाच आला-ऽऽटौ
(२५) ग्मिन्
(२६) मध्वादिभ्यो रः
(२७) कृष्यादिभ्यो वलच्
(२८) लोम-पिच्छादेः शेलम्
(२९) नोऽङ्गादेः
(३०) शाकी-पलाली-दर्व्वा ह्रस्वश्च
(३१) विष्वचो विषुश्च

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(३२) लक्ष्म्या अनः
(३३) प्रज्ञा-श्रद्धा-ऽर्चा-वृत्तेर्णः
(३४) ज्योत्स्नादिभ्योऽण्
(३५) सिकता-शर्करात्
(३६) इलश्च देशे
(३७) द्यु-द्रोर्मः
(३८) काण्डा-ऽऽण्ड-भाण्डादीरः
(३९) कच्छ्वा डुरः
(४०) दन्तादुन्नतात्
(४१) मेधा-रथान्नवेरः
(४२) कृपा-हृदयादालुः
(४३) केशाद् वः
(४४) मण्यादिभ्यः
(४५) हीनात् स्वाङ्गादः
(४६) अभ्रादिभ्यः
(४७) अस्-तपो-माया-मेधा-स्रजो विन्
(४८) आमयाद् दीर्घश्च
(४९) स्वाम्निन्नीशे
(५०) गोः
(५१) ऊर्जो विन्-वलावस् चान्तः
(५२) तमिस्राऽर्णव-ज्योत्स्नाः
(५३) गुणादिभ्यो यः
(५४) रूपात् प्रशस्ता-ऽऽहतात्
(५५) पूर्णमासोऽण्
(५६) गोपूर्वादत इकण्
(५७) निष्कादेः शत-सहस्रात्
(५८) एकादेः कर्मधारयात्
(५९) सर्वादेरिन्
(६०) प्राणिस्थादस्वाङ्गाद् द्वन्द्व-रुग्-निन्द्यात्
(६१) वाता-ऽतीसार-पिशाचात् कश्चान्तः
(६२) पूरणाद् वयसि
(६३) सुखादेः
(६४) मालायाः क्षेपे
(६५) धर्म-शील-वर्णान्तात्
(६६) बाहूर्वादेर्बलात्
(६७) मन्-मा-ऽज्ञादेर्नाम्नि
(६८) हस्त-दन्त-कराज्जातौ
(६९) वर्णाद् ब्रह्मचारिणि
(७०) पुष्करादेर्देशे
(७१) सूक्त-साम्नोरीयः
(७२) लुब् वाऽध्याया-ऽनुवाके
(७३) विमुक्तादेरण्
(७४) घोषदादेरकः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(७५) प्रकारे जातीयर्
(७६) कोऽप्वादेः
(७७) जीर्ण-गोमूत्रा-ऽवदात-सुरा-यव-कृष्णाच्छा-ल्याच्छादन-सुरा-ऽहि-व्रीहि-तिले
(७८) भूतपूर्वे प्चरट्
(७९) गोष्ठादीनञ्
(८०) षष्ठ्या रूप्य-प्चरट्
(८१) व्याश्रये तसुः
(८२) रोगात् प्रतीकारे
(८३) पर्यभेः सर्वोभये
(८४) आद्यादिभ्यः
(८५) क्षेपा-ऽतिग्रहा-ऽव्यथेष्वकर्तुस्तृतीयायाः
(८६) पाप-हीयमानेन
(८७) प्रतिना पञ्चम्याः
(८८) अहीय-रुहोऽपादाने
(८९) किमद्ध्वादिसर्वाद्यवैपुल्य-बहोः पित् तस्
(९०) इतोऽतः कुतः
(९१) भवत्वायुष्मद्-दीर्घायुर्देवानांप्रियैकार्थात्
(९२) त्रप् च
(९३) क्व-कुत्रा-ऽत्रेह
(९४) सप्तम्याः
(९५) किम्-यत्-तत्-सर्वैका-ऽन्यात् काले दा
(९६) सदा-ऽधुनेदानीं-तदानीमेतर्हि
(९७) सद्यो-ऽद्य-परेद्यव्यह्नि
(९८) पूर्वा-ऽपरा-ऽधरोत्तरा-ऽन्या-ऽन्यतरेतरादेद्युस्
(९९) उभयाद् द्युस् च
(१००) ऐषमः-परुत्-परारि वर्षे
(१०१) अनद्यतने र्हिः
(१०२) प्रकारे था
(१०३) कथमित्थम्
(१०४) सङ्ख्याया धा
(१०५) विचाले च
(१०६) वैकाद् ध्यमञ्
(१०७) द्वि-त्रेर्धमञेधौ वा
(१०८) तद्धति धण्
(१०९) वारे कृत्वस्
(११०) द्वि-त्रि-चतुरः सुच्
(१११) एकात् सकृच्चास्य
(११२) बहोर्धाऽऽसन्ने

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(११३) दिक्शब्दाद् दिग्-देश-कालेषु प्रथमा-पञ्चमी-सप्तम्याः
(११४) ऊर्ध्वाद् रि-रिष्टातौ उपश्चास्य
(११५) पूर्वा-ऽवरा-ऽधरेभ्यो-ऽसस्तातौ पुरवधश्चैषाम्
(११६) परा-ऽवरात् स्तात्
(११७) दक्षिणोत्तराच्चाऽतस्
(११८) अधरा-ऽपराच्चाऽऽत्
(११९) वा दक्षिणात् प्रथमा-सप्तम्या आः
(१२०) आ-ऽऽही दूरे
(१२१) वोत्तरात्
(१२२) अदूरे एनः
(१२३) लुबञ्चेः
(१२४) पश्चोऽपरस्य दिक्पूर्वस्य चाऽऽति
(१२५) वोत्तरपदेऽर्धे
(१२६) कृ-भ्वस्तिभ्यां कर्म-कर्तृभ्यां प्रागतत्तत्त्वे च्विः
(१२७) अरुर्मनश्चक्षुश्चेतो-रहो-रजसां लुक् च्वौ
(१२८) इसुसोर्बहुलम्
(१२९) व्यञ्जनस्यान्त ई
(१३०) व्याप्तौ स्सात्
(१३१) जातेः सम्पदा च
(१३२) तत्राऽधीने
(१३३) देये त्रा च
(१३४) सप्तमी-द्वितीयाद् देवादिभ्यः
(१३५) तीय-शम्ब-बीजात् कृगा कृषौ डाच्
(१३६) सङ्ख्यादेर्गुणात्
(१३७) समयाद् यापनायाम्
(१३८) सपत्र-निष्पत्रादति-व्यथने
(१३९) निष्कुलान्निष्कोषणे
(१४०) प्रिय-सुखादानुकूल्ये
(१४१) दुःखात् प्रातिकूल्ये
(१४२) शूलात् पाके
(१४३) सत्यादशपथे
(१४४) मद्र-भद्राद् वपने
(१४५) अव्यक्तानुकरणादने-कस्वरात् कृ-भ्वस्तिना-ऽनितौ द्विश्च
(१४६) इतावतो लुक्
(१४७) न द्वित्वे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(१४८) तो वा
(१४९) डाच्यादौ
(१५०) बह्वल्पार्थात् कारका-
दिष्टा-ऽनिष्टे ष्ठास्
(१५१) संख्यैकार्थाद् वीप्सायां
शस्
(१५२) संख्यादेः पादादिभ्यो
दान-दण्डे चाऽकलुक् च
(१५३) तीयाट्टीकण् न विद्या
चेत्
(१५४) निष्फले तिलात्
पिञ्ज-पेजौ
(१५५) प्रायोऽतोर्द्वयसट्-मात्रट्
(१५६) वर्णा-ऽव्ययात् स्वरूपे
कारः
(१५७) रादेफः
(१५८) नाम-रूप-भागाद्
धेयः
(१५९) मर्तादिभ्यो यः
(१६०) नवादीन-तन-त्नं च
नू चास्य
(१६१) प्रात् पुराणे नश्च
(१६२) देवात् तल्
(१६३) होत्राया ईयः
(१६४) भेषजादिभ्यष्ठ्यण्
(१६५) प्रज्ञादिभ्योऽण्
(१६६) श्रोत्रौषधि-कृष्णाच्छ-
रीर-भेषज-मृगे
(१६७) कर्मणः सन्दिष्टे
(१६८) वाच इकण्
(१६९) विनयादिभ्यः
(१७०) उपायाद्ध्रस्वश्च
(१७१) मृदस्तिकः
(१७२) स-स्नौ प्रशस्ते

[सप्तमाध्याये तृतीयः पादः]

(१) प्रकृते मयट्
(२) अस्मिन्
(३) तयोः समूहवच्च बहुषु
(४) निन्द्ये पाशप्
(५) प्रकृष्टे तमप्
(६) द्वयोर्विभज्ये च तरप्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(७) क्वचित् स्वार्थे
(८) किं-त्याद्ये-ऽव्ययादसत्त्वे तयोरन्तस्याऽऽम्
(९) गुणाङ्गाद् वेष्ठेयसू
(१०) त्यादेश्च प्रशस्ते रूपप्
(११) अतमबादेरीषदसमाप्ते कल्पब्-देश्यब्-देशीयर्
(१२) नाम्नः प्राग् बहुर्वा
(१३) न तमबादिः कपो-ऽच्छिन्ना-दिभ्यः
(१४) अनत्यन्ते
(१५) यावादिभ्यः कः
(१६) कुमारीक्रीडनेयसोः
(१७) लोहितान्मणौ
(१८) रक्ता-ऽनित्यवर्णयोः
(१९) कालात्
(२०) शीतोष्णाद्दतौ
(२१) लून-वियातात् पशौ
(२२) स्नाताद् वेदसमाप्तौ
(२३) तनु-पुत्रा-ऽणु-बृहती-शून्यात् सूत्र-कृत्रिम-निपुणा-ऽऽच्छादन-रिक्ते
(२४) भागेऽष्टमाञ्ञः
(२५) षष्ठात्
(२६) माने कश्च
(२७) एकादाकिन् चासहाये
(२८) प्राग् नित्यात् कप्
(२९) त्यादि-सर्वादेः स्वरेष्व-न्त्यात् पूर्वोऽक्
(३०) युष्मदस्मदोऽसोभादि-स्यादेः
(३१) अव्ययस्य को द् च
(३२) तूष्णीकाम्
(३३) कुत्सिता-ऽल्पा-ऽज्ञाते
(३४) अनुकम्पा-तद्युक्तनीत्योः
(३५) अजातेर्नृनाम्नो बहुस्वरादियेकेलं वा
(३६) वोपादेरडा-ऽकौ च
(३७) ऋवर्णोवर्णात् स्वरादे-रादेर्लुक् प्रकृत्या च
(३८) लुक्युत्तरपदस्य कपून्
(३९) लुक् चाजिनान्तात्
(४०) षड्वर्जैकस्वरपूर्वपदस्य स्वरे
(४१) द्वितीयात् स्वरादूर्ध्वम्
(४२) सन्ध्यक्षरात् तेन
(४३) शेवलाद्यादेस्तृतीयात्
(४४) क्वचित् तुर्यात्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(४५) पूर्वपदस्य वा
(४६) ह्रस्वे
(४७) कुटी-शुण्डाद् रः
(४८) शम्या रु-रौ
(४९) कुत्वा डुपः
(५०) कासू-गोणीभ्यां तरट्
(५१) वत्सोक्षा-ऽश्वर्षभाद्भ्रासे पित्
(५२) वैकाद् द्वयोर्निर्धार्ये डतरः
(५३) यत्-तत्-किमन्यात्
(५४) बहूनां प्रश्ने डतमश्च वा
(५५) वैकात्
(५६) क्तात् तमबादेश्चानत्यन्ते
(५७) न सामिवचने
(५८) नित्यं ञ-ञिनोऽण्
(५९) विसारिणो मत्स्ये
(६०) पूगादमुख्यकाञ्ञ्यो द्रिः
(६१) व्रातादस्त्रियाम्
(६२) शस्त्रजीविसङ्घाञ्ञ्यड् वा
(६३) वाहीकेष्वब्राह्मण-राजन्येभ्यः
(६४) वृकाट्टेण्यण्
(६५) यौधेयादेरञ्
(६६) पर्श्वादेरण्
(६७) दामन्यादेरीयः
(६८) श्रुमच्छमीवच्छिखावच्छा-लावदूर्णावद्-विदभृदभि-जितो गोत्रेऽणो यञ्
(६९) समासान्तः
(७०) न किमः क्षेपे
(७१) नञ्तत्पुरुषात्
(७२) पूजास्वतेः प्राक् टात्
(७३) बहोर्डे
(७४) इज् युद्धे
(७५) द्विदण्ड्यादिः
(७६) ऋक्-पूः-पथ्यपोऽत्
(७७) धुरोऽनक्षस्य
(७८) सङ्ख्या-पाण्डूदक्-कृष्णाद् भूमेः
(७९) उपसर्गादध्वनः
(८०) समवा-ऽन्धात् तमसः
(८१) तप्ता-ऽन्ववाद् रहसः
(८२) प्रत्यन्ववात् साम-लोम्नः
(८३) ब्रह्म-हस्ति-राज-पल्याद् वर्चसः
(८४) प्रतेरुरसः सप्तम्याः
(८५) अक्ष्णोऽप्राण्यङ्गे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(८६) सं-कटाभ्याम्
(८७) प्रति-परो-ऽनोरव्ययीभावात्
(८८) अनः
(८९) नपुंसकाद् वा
(९०) गिरि-नदी-पौर्णमास्या-ग्रहायण्यपञ्चमवर्ग्याद् वा
(९१) संख्याया नदी-गोदावरीभ्याम्
(९२) शरदादेः
(९३) जराया जरस् च
(९४) सरजसोपशुना-ऽनुगवम्
(९५) जात-महद्-वृद्धादुक्ष्णः कर्मधारयात्
(९६) स्त्रियाः पुंसो द्वन्द्वाच्च
(९७) ऋक्सामर्ग्यजुष-धेन्वन-डुह-वाङ्मनसा-ऽहो-रात्र-रात्रिंदिव-नक्तं-दिवा-ऽहर्दिवोर्वष्टीव-पदष्टिवा-ऽक्षिभ्रुव-दारगवम्
(९८) चवर्ग-द-ष-हः समाहारे
(९९) द्विगोरन्नह्नोऽट्
(१००) द्वि-त्रेरायुषः
(१०१) वाऽज्जलेरलुकः
(१०२) खार्या वा
(१०३) वाऽर्धाच्च
(१०४) नावः
(१०५) गोस्तत्पुरुषात्
(१०६) राजन्-सखेः
(१०७) राष्ट्राख्याद् ब्रह्मणः
(१०८) कु-महद्भ्यां वा
(१०९) ग्राम-कौटात् तक्ष्णः
(११०) गोष्ठा-ऽतेः शुनः
(१११) प्राणिन उपमानात्
(११२) अप्राणिनि
(११३) पूर्वोत्तर-मृगाच्च सक्थ्नः
(११४) उरसोऽग्रे
(११५) सरो-ऽनो-ऽश्मा-ऽयसो जाति-नाम्नोः
(११६) अह्नः
(११७) संख्यातादह्नश्च वा
(११८) सर्वा-ऽश-संख्या-ऽव्ययात्
(११९) संख्यातैक-पुण्य-वर्षा-दीर्घाच्च रात्रेरत्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(१२०) पुरुषायुष-द्विस्ताव-त्रिस्तावम्
(१२१) श्वसो वसीयसः
(१२२) निसश्च श्रेयसः
(१२३) नञव्ययात् संख्याया ऽडः
(१२४) संख्या-ऽव्ययादङ्गुलेः
(१२५) बहुव्रीहेः काष्ठे टः
(१२६) सक्थ्यक्ष्णः स्वाङ्गे
(१२७) द्वित्रेर्मूर्ध्नो वा
(१२८) प्रमाणी-संख्याड्डः
(१२९) सुप्रात-सुश्व-सुदिव-शारिकुक्ष-चतुरस्रैणी-पदा-ऽजपद-प्रोष्ठपद-भद्रपदम्
(१३०) पूरणीभ्यस्तत्प्राधान्ये-ऽप्
(१३१) नञ्-सु-व्युप-त्रेश्चतुरः
(१३२) अन्तर्बहिर्भ्यां लोम्नः
(१३३) भान्नेतुः
(१३४) नाभेर्नाम्नि
(१३५) नञ्-बहोर्ऋचो माणव-चरणे
(१३६) नञ्-सु-दुर्भ्यः सक्ति-सक्थि-हलेर्वा
(१३७) प्रजाया अस्
(१३८) मन्दा-ऽल्पाच्च मेधायाः
(१३९) जातेरीयः सामान्य-वति
(१४०) भृतिप्रत्ययान्मासादिकः
(१४१) द्विपदाद् धर्मादन्
(१४२) सु-हरित-तृण-सोमाज्जम्भात्
(१४३) दक्षिणेर्मा व्याधयोगे
(१४४) सु-पूत्युत्-सुरभेर्गन्धादिद् गुणे
(१४५) वाऽऽगन्तौ
(१४६) वाऽल्पे
(१४७) वोपमानात्
(१४८) पात् पादस्याऽह-स्त्यादेः
(१४९) कुम्भपद्यादिः
(१५०) सु-संख्यात्
(१५१) वयसि दन्तस्य दतृः
(१५२) स्त्रियां नाम्नि
(१५३) श्यावा-ऽरोकाद् वा
(१५४) वाऽग्रान्त-शुद्ध-शुभ्र-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृष-वराहा-ऽहि-मूषिक-शिखरात्
(१५५) सं-प्राज्जानोर्ज्ञु-ज्ञौ
(१५६) वोर्ध्वात्
(१५७) सुहृद्-दुर्हृन्मित्रा-ऽमित्रे
(१५८) धनुषो धन्वन्
(१५९) वा नाम्नि
(१६०) खर-खुरान्नासिकाया नस्
(१६१) अस्थूलाच्च नसः
(१६२) उपसर्गात्
(१६३) वेः खु-ख्र-ग्रम्
(१६४) जायाया जानिः
(१६५) व्युदः काकुदस्य लुक्
(१६६) पूर्णाद् वा
(१६७) ककुदस्याऽवस्थायाम्
(१६८) त्रिककुद् गिरौ
(१६९) स्त्रियामूधसो न्
(१७०) इनः कच्
(१७१) ऋन्नित्यदितः
(१७२) दध्युरः-सर्पिर्मधूपानच्छालेः
(१७३) पुमनडुन्नौ-पयो-लक्ष्म्या

एकत्वे
(१७४) नञोऽर्थात्
(१७५) शेषाद् वा
(१७६) न नाम्नि
(१७७) ईयसोः
(१७८) सहात् तुल्ययोगे
(१७९) भ्रातुः स्तुतौ
(१८०) नाडी-तन्त्रीभ्यां स्वाङ्गे
(१८१) निष्प्रवाणिः
(१८२) सुभ्रूवादिभ्यः

[सप्तमाध्याये चतुर्थः पादः]

(१) वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते
(२) केकय-मित्रयु-प्रलयस्य यादेरिय् च
(३) देविका-शिंशपा-दीर्घसत्र-श्रेयसस्तत्प्राप्तावाः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(४) वहीनरस्यैत्
(५) य्वः पदान्तात् प्रागैदौत्
(६) द्वारादेः
(७) न्यग्रोधस्य केवलस्य
(८) न्यङ्कोर्वा
(९) न ञ-स्वङ्गादेः
(१०) श्वादेरिति
(११) इञः
(१२) पदस्यानिति वा
(१३) प्रोष्ठ-भद्राज्जाते
(१४) अंशादृतोः
(१५) सु-सर्वा-ऽर्द्धाद् राष्ट्रस्य
(१६) अमद्रस्य दिशः
(१७) प्राग्ग्रामाणाम्
(१८) संख्या-ऽधिकाभ्यां वर्षस्याऽभाविनि
(१९) मान-संवत्सरस्या-शाण-कुलिजस्याऽनाम्नि
(२०) अर्धात् परिमाणस्या-ऽनतो वा त्वादेः
(२१) प्राद् वाहणस्यैये
(२२) एयस्य
(२३) नञः क्षेत्रज्ञेश्वर-कुशल-चपल-निपुण-शुचेः
(२४) जङ्गल-धेनु-वलज-स्योत्तरपदस्य तु वा
(२५) हृद्-भग-सिन्धोः
(२६) प्राचां नगरस्य
(२७) अनुशतिकादीनाम्
(२८) देवतानामात्वादौ
(२९) आतो नेन्द्र-वरुणस्य
(३०) सारवैक्ष्वाक-मैत्रेय-भ्रौण-हत्य-धैवत्य-हिरण्मयम्
(३१) वाऽन्तमा-ऽन्तितमा-ऽन्तितो-ऽन्तिया-ऽन्तिषत्
(३२) विन्-मतोर्णिष्ठियसौ लुप्
(३३) अल्प-यूनोः कन् वा
(३४) प्रशस्यस्य श्रः
(३५) वृद्धस्य च ज्यः
(३६) ज्यायान्
(३७) बाढा-ऽन्तिकयोः साध-नेदौ
(३८) प्रिय-स्थिर-स्फिरोरु-गुरु-बहुल-तृप्र-दीर्घ-वृद्ध-वृन्दारकस्येमनि च
प्रा-स्था-स्फा-वर-गर-बंह-त्रप-द्राघ-वर्ष-वृन्दम्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(३९) पृथु-मृदु-भृश-कृश-दृढ-परिवृढस्य ऋतो रः
(४०) बहोर्णिष्ठि भूयू
(४१) भूर्लुक् चेवर्णस्य
(४२) स्थूल-दूर-युव-ह्रस्व-क्षिप्र-क्षुद्रस्यान्तस्थादे-र्गुणश्च नामिनः
(४३) त्रन्त्यस्वरादेः
(४४) नैकस्वरस्य
(४५) दण्डि-हस्तिनोरायने
(४६) वाशिन आयनौ
(४७) एये जिह्माशिनः
(४८) ईनेऽध्वा-ऽऽत्मनोः
(४९) इकण्यथर्वणः
(५०) यूनोऽके
(५१) अनोऽटचे ये
(५२) अणि
(५३) संयोगादिनः
(५४) गाथि-विदथि-केशि-पणि-गणिनः
(५५) अनपत्ये
(५६) उक्ष्णो लुक्
(५७) ब्रह्मणः
(५८) जातौ
(५९) अवर्मणो मनोऽपत्ये
(६०) हितनाम्नो वा
(६१) नोऽपदस्य तद्धिते
(६२) कलापि-कुथुमि-तैतलि-जाजलि-लाङ्गलि-शिख-ण्डि-शिलालि-सब्रह्मचा-रि-पीठसर्पि-सूकरसद्म-सुपर्वणः
(६३) वाऽश्मनो विकारे
(६४) चर्म-शुनः कोश-सङ्कोचे
(६५) प्रायोऽव्ययस्य
(६६) अनीना-ऽटचह्नोऽतः
(६७) विंशतेस्तेर्डिति
(६८) अवर्णेवर्णस्य
(६९) अकद्रू-पाण्ड्वोरुवर्णस्यैये
(७०) अस्वयम्भुवोऽव्
(७१) ऋवर्णोवर्ण-दोसिसु-सशश्वदकस्मात्त इकस्येतो लुक्
(७२) असकृत् संभ्रमे
(७३) भृशा-ऽऽभीक्ष्ण्या-ऽविच्छेदे द्विः प्राक् तमबादेः
(७४) नानावधारणे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(७५) आधिक्या-ऽऽनुपूर्व्ये
(७६) डतर-डतमौ समानां स्त्रीभावप्रश्ने
(७७) पूर्व-प्रथमावन्यतोऽतिशये
(७८) प्रोपोत्-सम् पादपूरणे
(७९) सामीप्येऽधोऽध्युपरि
(८०) वीप्सायाम्
(८१) प्लुप् चादावेकस्य स्यादेः
(८२) द्वन्द्वं वा
(८३) रहस्य-मर्यादोक्ति-व्युत्क्रान्ति-यज्ञपात्रप्रयोगे
(८४) लोकज्ञातेऽत्यन्तसाहचर्ये
(८५) आबाधे
(८६) नवा गुणः सदृशे रित्
(८७) प्रिय-सुखं चाकृच्छ्रे
(८८) वाक्यस्य परिवर्जने
(८९) सम्मत्यसूया-कोप-कुत्सनेष्वाद्यामन्त्र्यमादौ स्वरेष्वन्त्यश्च प्लुतः
(९०) भर्त्सने पर्यायेण
(९१) त्यादेः साकाङ्क्षस्याङ्गेन
(९२) क्षिया-ऽऽशीः-प्रैषे
(९३) चितीवार्थे
